॥ॐ॥ श्रीगुरुभ्यो नमः॥ वंदे सरस्वतीं देवीं वाङ्मनःकार्यकर्मभिः वाक्प्रसादो यया लब्धो दुस्तरस्त्रिदशैर
पि १ मनवे वाचस्पतये शुक्राय पराशराय ससुताय चाणक्याय विदुषे नमोनमः शास्त्रकर्तृभ्यः २ प्र
णम्य विघ्नहर्तारं गणाध्यक्षमुमासुतं नीतिशास्त्रमिदं वक्ष्ये कथामार्गनिबंधनं ३ सकलशास्त्रार्थसारं जग
नो ति समालोक्य विष्णुशर्मेदं तंत्रैः पंचभिरेतच्चकार सुमनोहरं शास्त्रं ४ तद्यथानुश्रूयते अस्ति दाक्षिणात्ये जनप
दे मिहिलारोप्यं नाम नगरं तत्र सकलार्थिशास्त्रकल्पद्रुमः प्रवरनृपमुकुटमणिमंजरीनिचयचर्चितचरणः सकल
कलापारंगतोऽमरशक्तिर्नाम राजा बभूव तस्य च त्रयः पुत्राः परमदुर्मेधसो वसुशक्तिः उग्रशक्तिः अनंतशक्ति
श्चेति बभूवुः अथ तान् शास्त्रविमुखान् समालोक्य स राजा सचिवानाहूय प्रोवाच भो ज्ञातमेतद्भवद्भिर्यन्ममैते।
पुत्राः शास्त्रविमुखा विवेकरहिताः तदेतान् पश्यतो मे हतकंटकमपि राज्यं न सौख्यमावहति अथवा साध्विद
मुच्यते अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरौ यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् १ तथा च किं तया
क्रियते धेन्वा या न सूते न दुग्धदा कोऽर्थः पुत्रेण जातेन यो न विद्वान्न भक्तिमान् २ अपि च॥ वरं गर्भस्रावो
वरमृतुषु नैवाभिगमनं वरं वंध्या भार्या वरमपि च कन्यैव जनिता वरं जातः प्रेतो वरमपि च गर्भेऽस्थितिरहो न चा
विद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः ३ एकेनापि गुणवता जंतुः सुपुत्रेण किं न पर्याप्तं मणिरेकोऽपि विशुद्धः २
करोति दारिद्र्यविद्रवणं ४ एकेनापि गुणवता जातिविशुद्धेन चानुकल्पेन स्वकुलममलं कृतमखिलं महता मुक्ता
फलेनापि ५ तच्चिंत्यतां सर्वगुणानां मूलं एकेनापि सुपुत्रेण सिंही स्वपिति निर्भया सहैव दशभिः पुत्रैर्भारं वह
ति गर्दभी ६ तदेतेषां बुद्धिप्रबोधनं यथा भवति तथा केनाप्युपायेनानुष्ठीयतामिति तन्मदीयवृत्तिभुजां नानां।

पंडितानां पंचशतानि संति यन्मदीयमनोरथाः संसिद्धिं यांति तथानुष्ठीयतामिति तत्रैकः प्रोवाच देव द्वादशभिर्वर्षैर्व्या
करणं श्रूयते यदि कथमपि ज्ञायते ततो धर्मार्थकाममोक्षशास्त्राणि ज्ञायंते ततो बुद्धिप्रबोधनं भवति अ
थ तन्मध्ये सुमतिनामाऽमात्यः प्राह हे देव अशाश्वतोऽयं जीवितविषयः प्रभूतकालज्ञेयानि शास्त्राणि तत्संक्षे
पादत्र किंचिदेतेषां बुद्धिप्रबोधनार्थं निश्चिंत्यतामिति उक्तं च यतः अनंतपारं किल शब्दशास्त्रं स्वल्पं तथायु
र्बहवश्च विघ्नाः सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवांबुमध्यात् १ तदत्रास्ति विष्णुशर्मा नाम ब्राह्म
णः सकलशास्त्रसंसिद्धिलब्धकीर्तिः तस्मै समर्पयैतान् स नूनं द्राक्प्रबुद्धान् करिष्यति सोऽपि राजा तदाकर्ण्य वि
ष्णुशर्माणमाहूय प्रोवाच भो भगवन् मदनुग्रहार्थमेतान् कुमारान् अर्थशास्त्रं प्रति यथा द्राक् अनन्यसदृशा
न् विदधासि तथा कार्यं अहं त्वां शासनशतेन नियोजयिष्यामि अथ विष्णुशर्मा तं राजानमुवाच देव श्रूयतां मेत
थ्यवचनं नाहं विद्याविक्रयं शासनशतेन करोमि एतान् पुनर्मासषट्केन यदि नीतिशास्त्रज्ञान् करोमि तदा।
स्वनामत्यागं करोमि इति किं बहुना श्रूयतां ममैष सिंहनादो नाहमर्थलिप्सुर्ब्रवीमि न च मे अशीतिवर्षस्य व्यावृ
त्तसर्वेंद्रियार्थस्य किंचिदर्थेन प्रयोजनं किंतु त्वत्प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि तल्लिख्यतामिति।
अद्यतनो दिवसः मद्यदहं षण्मासाभ्यंतरे तव पुत्रान्नीतिशास्त्रं प्रति अनन्यसदृशान्न करोमि ततो नार्हति मे देवो
देवमार्गं संदर्शयितुं पद्भ्यां संगृह्य स्वर्मशातमपाहशुभमिति एतां ब्राह्मणस्य असंभाव्यां प्रतिज्ञां श्रुत्वा ससचिवो रा
जा विस्मयान्वितः तस्मै कुमारान् समर्पितवान् अथासौ तदाकर्ण्य परिहृष्टमनाः स्तान् तस्मै सादरं समर्प्य राजा
परं निर्वृतिं जगाम विष्णुशर्मा तानादाय स्वगृहं गत्वा तदर्थं मित्रभेदं मित्रसंप्राप्तिं काकोलूकीयं लब्धप्रणा
शं अपरीक्षितकारितमित्येतानि पंचतंत्राणि रचयित्वा पाठितास्ते राजपुत्राः तेऽपि तान्यधीत्य नरपत्यनुग्रहे

णमासषट्केन यथोक्ताः संजाताः ततः प्रभृति एतत् पंचतंत्रकं नाम नीतिशास्त्रं भूतले प्रवृत्तं बालबोधनार्थं किं बहुना
यत्रैतन्मनुजः प्रायो नीतिशास्त्रं शृणोति वा न पराभवमाप्नोति शक्रादपि कदाचित् २ तदामुखमेतत् अथेदमारभ्य
ते मित्रप्राप्तिर्नाम प्रथमतंत्रं यस्यायमाद्यः श्लोकः ॥ असाधना अपि प्राज्ञा बुद्धिमंतो बहुश्रुताः साधयंत्याशु कार्या
णि काककूर्ममृगाखुवत् १ राजपुत्राः पृच्छंति कथमेतत् विष्णुशर्मा कथयति अस्ति दाक्षिणात्ये जनपदे महिलारो
प्यं नाम नगरं तस्य नातिदूरे महोच्छ्रायो महास्कंधशाखोपचितो न्यग्रोधः सर्वाश्रयोस्ति उक्तंच ॥ छायासुप्तमृगः श
कुंतनिवहैरानीलनीलच्छदः कीटैरावृतकोटरः कपिकुलैः स्कंधे कृतप्रश्रयः विस्रब्धं मधुपैर्निपीतकुसुमः श्लाघ्यः स
एव द्रुमः सर्वांगैर्बहुसत्वसंघसुखदो भूभारभूतो परः १ तत्र लघुपतनको नाम वायसः प्रतिवसति स्म । एकदाचित्प्राण
यात्रार्थं पुरमुद्दिश्य प्रातः प्रचलितः तदधिष्ठाननिवासिनं पक्षिबंधननिमित्तमायातं मुग्रस्फुटितकरचरणमुद्धव।
पिंडिकमतिपरुषशरीरं स्थवीरं रक्तायतनयनं श्वेतिरंगुग्मयमानमूर्ध्वबद्धशरीरो हस्ते जालकूटपाणिं किंबहुना द्विती
यं कालपाशहस्तमवतारमीव पापस्य हृदयमिव अधर्मस्योपदिष्टारमिव सर्वपातकानां सुहृदमिव मृत्योर्विवक्षिन्या
मागतं व्याधमेकमपश्यत् अथ तं दृष्ट्वा शंकितमना व्यचिंतयत् किमयं चिकीर्षति किमात्मवार्थं अद्यो स्विदन्यो
ऽस्याध्यवसायः स कौतुकवशस्तमेवकृतानुगत्यावस्थितः अथ व्याधः प्रपितत्रैकांदे शाजालं वितत्य धान्यकणान्विकी
र्य दृशो नातिदूरे निभृतः स्थितः अथ विचिंत्य तत्क्षणाद्दिनिर्द्वंत्य तमेव पादपं गत्वा प्रवन्नि विदंगमान् प्रोवाचैवमहो
त्माघातकः प्रमत्तैर्त्व शालितंडुलहस्तो न विश्वसनीयः एषजालं प्रसार्य तंडुलान्प्रक्षिप्यते लवद्भिः कालकूटसदृशा दृष्ट २
व्याः एवं वदतस्तस्य सलुब्धकस्तत्र वटतले समागत्य तज्जालं प्रसार्य सिंदुवारसदृशां स्तंडुलान्प्रक्षिप्य नातिदूरं गत्वा।
निभृतं स्थितः अथ ये तत्र पक्षिणः संति लघुपतनकवाक्यार्गलया नियंत्रितास्तान्हालाहलमीव मन्यमानास्तत्रैव स्थि
ताः ततश्च ॥

कांतरे कपोतसैत्तः परिवृत्तश्चित्रग्रीवो नाम कपोतराजः प्राणयात्रार्थं परिभ्रमन्तां स्तंडुलान्दूरतोऽपश्यत् अथ लघुपतन
केनसदृक्कोडकं निवार्यमाणोपि स्वोदरार्थं मां वंचयत्ययं व राकइति मत्वा जिह्वालोल्यात् तत्क्षणार्थं तस्मात् जालं पतत्
सन्निपातसमकालमेव सपरिवारः स्नायुपाशैर्बद्धश्च अथवा दैवप्रतिकूलतया नवत्यैवं न कश्चिद्दोषः अथ प्राक्षि
दमुच्यते जिह्वालोल्यप्रसक्तानां जलमध्यनिवासिनां अचिंतितो वधोऽज्ञानं मीनानामिव दृश्यते १ उक्तंच ॥ पौल
स्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान् रामेणापि वनेन हेममहरिणः स्यात् संभवो लक्षितः अक्षैश्चापि युधि
ष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथं प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते १ तथाच ॥ कृतांतपा
शबद्धानां दैवेनाविष्टचेतसां बुद्धयः कुब्जगामिन्यो भवंति महतामपि २ एतस्मिन्नंतरे लुब्धकोपि तान्बद्धा
न्विज्ञाय प्रहृष्टमनाः लकुटमुद्यम्य वधार्थं प्रधावितः चित्रग्रीवोपि स्वानुचरः पाशबंधस्य व्यसनाकुलः समाया
तं दृष्ट्वा प्रत्युत्पन्नमतिः तयातान्कपोतानुवाच अहो नमैवं २ यतः सर्वेषु व्यसनेष्वेव बुद्धिर्यस्य न हीयते स तेषां
पारमभ्येति प्राप्नोति परमं सुखं १ तत्सर्वेपि एकचित्तीभूय संघातेनोत्पत्य तस्माद्दर्शनं गत्वा जालमिदं कृतनीयं
अन्यथा संघातं विना न शक्यते जालमपहर्तुं अन्यथा मृत्युं प्राप्स्यथ यतः तनवोप्यायतानित्यं तनवो बहुलाः
समाः बहून्बहुत्वादायासान्संहतीत्युपमा सती १ असंहतचित्तानां मृत्युर्भवति उक्तंच एकोदराः पृथग्ग्रीवा
ः अन्योन्यफलभक्षिणः असंहता विनश्यंति भारंडा इव पक्षिणः २ कपोताः पृच्छंति कथमेतत् चित्रग्रीवः कथय
ते कस्मिंश्चित्सरसि भारंडानाम पक्षिणः प्रतिवसंतिस्म तेषामुदरमेकं ग्रीवे द्वे भवतः अथ तेषां मध्यात्
कस्यापि पक्षिणः स्वेछया विचरतः एकाग्रीवया अमृतं प्राप्तं द्वितीयया निहितं मम मार्धं देहि अथ यदा
तयानदत्तं तदा द्वितीयग्रीवया कोपाक्रांतया न्विष्य विषं भक्षितं भक्षिते विषे एकोदरत्वान्मृत्युरभवत् अतो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

हे ब्रवीमि एकोदराः पृथग्ग्रीवा इति कथा २ एवं नः संघात एव समर्थः इति श्रुत्वा ते कपोतास्तज्जीवितार्थिनः संघा
तेन जालमपहृत्य शूकरणमात्रमुड्डय वियति विज्ञानसंबंधं कृत्वा निर्भयं प्रस्थिताः लुब्धकोपि पक्षिभिर्जालं
मपहृतं दिक्ष्वा विस्मितमनाः उर्द्ध्वतनूरुहाः ईदृक्पूर्वमित्याकलय्य चित्रं इमं श्लोकमपठत् संहतास्तु हरंतीमे म
म जालं विहंगमाः यदा तु निपतिष्यंति तदा मे वशमेष्यंति २ इति विचार्य मार्गानुसर्तुमारब्धः चित्रग्रीवोपि तं क्रूर चा
मनुगच्छंतं दृष्ट्वा तदभिप्रायं ज्ञात्वा नाकुलगिरितटविषमभूभागानां उपरि गंतुमारब्धः लघुपतनकोपि चित्रग्रीव
स्य तत्स्वरूपचरितं तव्याधस्य उड्डरितसारेण विस्मितमना ऊर्द्ध्वमवस्थ मुहुर्मुहुर्निरीक्षमाणः आहारचिंतामनु
व्यकोऽत्रकपरस्तदेव कपोतहं तमनुगतश्चिंतयति किमयं दुरात्मा करिष्यति अथ लुब्धकोपि विषममार्गा
व्यवहितं कपोतचक्रं ज्ञात्वा निराशः इति निवृत्तोऽब्रवीत् यतः न हि भवति यन्न भाव्यं भवति च भाव्यं विना
पि यत्नेन करतलगतमपि नश्यति यस्य च भवितव्यता नास्ति २ किंच पराङ्मुखे विधौ चेत्स्यात् कथंचिद्द्रविणागमः
तत्सोन्यदपि च संगृह्य याति शंखनिधिर्यथा २ तदा स्तां तावद्विहगामिषलाभः कुटुंबजीवनोपायभूतं तज्जाल
मपि नष्टं अत्रांतरे चित्रग्रीवस्तं निराशं प्रत्यावृत्तं दृष्ट्वा तान्कपोतानुवाच भो विश्रब्धं गम्यतां निवृत्तोऽसौ दुरा
त्मा घातकस्तदस्माकं प्रमदारोप्येन गरगमनं श्रेयः यतस्तत्र प्रागुत्तरदिग्भागे हिरण्यनामा मूषको मम प्रिय
सुहृत् प्रतिवसति स चास्माकमविलंबितं पाशच्छेदं करिष्यति समर्थश्चाय मापद्विमोक्षणायेति उक्तं च सर्वे
षामेव मर्त्यानां व्यसने समुपस्थिते वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न संदधे २ अथ तथैवानुष्ठिते हिर ३
ण्यमुखकं दिहृस्यैव स्तेसर्वेत्ति बिलदुर्गमासाद्य भूमाववतेरुः अथवा अनागतभयं दृष्ट्वा नीतिशास्त्र
विशारदः अवसन्मूषकस्तत्र कृत्वा शतमुखं बिलं २ उक्तं च दंष्ट्राविरहितः सर्पो दंतहीनो यथा गजः सर्वे

षां जायते वश्यो दुर्गहीनस्तथा नृपः २ तथा च न गजानां सहस्रेण न लक्षेणापि वाजिनां तत्कर्म सिध्यते सम्यक् दुर्गेणै
केन सिध्यति २ शतमेकोपि संधत्ते प्राकारस्थो धनुर्धरः तस्माद्दुर्गं प्रशंसंति नीतिशास्त्रविदो जनाः ४ अथैवं प्र
तिपक्षिपाशशंकितहृदयो हिरण्योपि बिडालपदमात्रं निजबिलदुर्गमनुसृत्य तच्छ्रुत्वा दुर्गांतर्गत एव
हिरण्योऽब्रवीत् भद्र को भवान् किमर्थमायातः कीदृक्वृत्तश्च स्वनंतं तत्कथ्यतां तत् श्रुत्वापि चित्रग्रीवो नाम
कपोतराजस्तव सुहृत् ततस्त्वरमागच्छ गुरुतरं प्रयोजनमस्ति तदाकर्ण्य पुलकितवपुः परिहृष्टात्मा त्वर
माणो निःक्रामन्नब्रवीत् सुहृदः स्नेहमापन्ना लोचनानंददायिनः गृहे गृहवतां नित्यं आगच्छंति महात्मनः २ त
था च न च नेति यस्य समागच्छंति नित्यशः चित्ते स्यात् तस्य सौख्यस्य न किंचित्प्रतिमं भवेत् ४ अथ चित्रग्रीवं
सपरिवारं पाशबद्धं लोक्य सविषादं हिरण्योब्रवीत् भद्र किमिदं कृतो वा कथयति सोब्रवीत् भद्र जानन्नपि किं
मे पृच्छसि उक्तं च यतः यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र च शुभाशुभं आत्मकर्म तस्माच्च तेन च तथा च
तदा च तच्च तावच्च तत्र च कृतांतवशादुपैति २ विलोचनानां विकचोत्पलत्विषां जगन्मदस्त्रेण विलोकितं हरिः य
दाश्रु मृत्युः पुरतो वितन्वते तदा प्रजा त्यंचप्रद्रववश्यो दति २ सपादयोजनशतादामिषं वे क्षते खगः सोपि पार्श्व
स्थितं दैवाद्बंधनं नैव पश्यति ३ अपि च शशिदिवाकरयोर्ग्रहपीडनं गजविहंगभुजंगमबंधनं मतिमतां च समी
क्ष्य दरिद्रतां विधिरहो बलवानिति मे मतिः ४ किंच व्योमैकांतविहारिणोपि विहगाः संप्राप्नुवंत्यापदं बध्यंते निपु
णैरगाधसलिलान्मीनाः समुद्रादपि दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः कालो हि व्यसनप्रसारित
भुजो गृह्णाति दूरादपि ५ अथ हिरण्य एवमुक्त्वा चित्रग्रीवस्य पाशं छेत्तुमारब्धः चित्रग्रीवेण निषिद्धः भद्र [illegible]

तत् मातात्प्रथमं पाशं छिंधि यत्तो किंत्वस्मत्पाशान्नश्य तदाकर्ण्य हिरण्यः प्रकंपितः आह नयुक्तमुक्तं भवता यतः स्वा
मिनोऽनंतरं भृत्याः स आह मैवं वद अस्मानपि परित्यज्य मामाश्रिता एते सर्वे वराकास्तत्कथमेतावन्मात्रमपि।
सन्मानं करोमि यतः सन्मानं यः सदा धत्ते भृत्यानां क्षितिपोऽधिकं वित्ताभावेपि तं भृत्याः त्यजंति न हि कर्हिचित् २
विश्वासः संपदां मूलं तेन यूथपति मृगः।। सिंहो मृगाधिपत्येपि न मृगैरुपसेव्यते २ अपरं कदाचिन्मम पाशच्छि
न्ने तावदेते वेदनामनुभवंति अथ संपापात्मा लुब्धकः समभ्येति तदवश्यं नरकपातो ममेति उक्तं च सदाचारेषु
भृत्येषु सीदत्स्वपि हि यः प्रभुः सुखी स्यान्नरकं याति सपरत्रेह सीदति २ ततः श्रुत्वा प्रहृष्टो हिरण्य आह नावेद क्या।।
सर्वस्वामिधर्मं परं तव परीक्षा कृते मयैतदभिहितं ततः सर्वेषां पाशच्छेदं करिष्यामि भवानप्येतैर्बहुपरिवारो।
भविष्यति उक्तं च यतः करुणासंविभागाभ्यां यस्य भृत्येषु सर्वदा संभाव्यः स महीपालस्त्रैलोक्यस्यापि रक्षणे २
एवमुक्त्वा सर्वेषां पाशच्छेदं कृत्वा हिरण्यकश्चित्रग्रीवमाह सखे गच्छाधुना स्वाश्रयं भूयोपि व्यसने प्राप्ते समागंतव्य।
मित्युक्त्वा स्वदुर्गं प्रविष्टः चित्रग्रीवोपि सपरिवारः स्वाश्रयं जगाम साधु चेदमुच्यते मित्रवान् साधयेत्कार्याणि दुःसा।
ध्यमपि वेद्यतः तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः २ लघुपतनकोपि सर्वं चित्रग्रीवस्य बंधनमोक्षं वि
लोक्य सविस्मयोऽचिंतयत् बुद्धिरहोस्य शक्तिश्च दुर्गसामग्री च तस्मान्ममापि युक्तं हिरण्यकेन सह प्रीतिकरणं। ४
यद्यप्यहं चंचलप्रकृतिरविश्वासपरश्च न च केनापि वंचयितुं शक्यः तथापि मित्रं कार्यमिति उक्तं च संपूर्णेनापि
कर्तव्यमित्रमस्तु सदा यार्थिना उदधिः परिपूर्णोपि स्याति मित्रं समिहते २ एवं मत्वा पादपादवतीर्य बिलद्वारमाश्रित्य।
सर्वोपलब्धनामा मां हिरण्यमाहूतवान् सद्धिरण्यक तावदेहि ततः श्रुत्वा हिरण्यको व्यचिंतयत् किमन्योप्यस्ति शेष।

बंधनः कपोतस्तिष्ठति यो मां व्याहरतीति आह च भोः को भवान् वायस आह अहं लघुपतनको नाम वायसः तदाक
र्ण्य हिरण्यको विशेषादंतर्लीनः आह भोः सद्यः स्थानाद्गम्यतामस्मात् स आह भोः चित्रग्रीवबंधमोक्षणं त्वत्सका
शाद्दृष्ट्वा महती प्रीतिः संजाता तत्ममापि कदाचिद्बंधने जाते विमोक्षणं भविष्यति तत्क्रियतां मया सह मैत्री हि
रण्यक आह भो भोः काक अहं भोज्यस्ततः का त्वया सह मैत्री उक्तं च यो मित्रं कुरुते मूढ आत्मनोऽसदृशं कुधीः
हीनं वाप्यधिकं वापि हास्यतां याति सोऽचिरात् २ ययोरेव समं वित्तं ययोरेव समं कुलं तयोर्मैत्री विवाहश्च न तु पुष्टवि
×दुर्ग× पुष्टयो २ तदल्पतामिति वायस आह भो हिरण्यक तव द्वारे उपविष्टो यदि मैत्रीं न करोषि ततः प्राणयात्रां न करिष्या
मि हिरण्य आह भोः कथं त्वया सह वैरिणा मैत्रीं करोमि उक्तं च शत्रुणा न हि संदध्यात् सुश्लिष्टेनापि संधिना।
सुतप्तमपि पानीयं शमयत्येव पावकं २ वायस आह भोः भवता सह समदर्शनमपि न हि कृतं वैरं तत्किमनु
चितं वदसि हिरण्य आह भो वैरं द्विविधं भवति सहजं कृत्रिमं च तत्सहजवैरित्वमस्माकं यतः कृत्रिमं नाशमा
याति वैरं शाकृत्रिमैर्गुणैः प्राणदानं विना नैव सहजं याति संक्षयं २ वायस आह भो द्विविधस्य वैरस्य लक्ष
णं श्रोतुमिच्छामि स आह भोः कारणेन निःपादितं कृत्रिमं तदर्होपकरणात् गच्छति स्वाभाविकं कथमपि न गच्छति
तद्यथा नकुलसर्पाणां श्रोत्रियमर्कटानां महिषोश्वानं जलानलयोः देवदैत्यानां सारमेयमार्जाराणां सपत्न्योः सिंह
गजानां लुब्धकहरिणानां काकोलूकानां शष्पभुङ्नखायुधानां पंडितमूर्खाणां पतिव्रताकुलटानां द्विजदिगं
बराणां सज्जनदुर्जनानां नित्यं च वैरं भवति न च केनापि कस्यचित् कोपि हतस्तथापि प्राणांताय वर्तते वायस।
आह अकारणमेतत् श्रूयतां मे वचनं कारणात् मित्रतां याति कारणाद्याति शत्रुतां अविश्वस्तेपि मित्रेपि तस्मा।
न्मित्रं न विश्वसेत् २ विश्वस्ताद्भयमुत्पन्नं मूलादपि निकृंतति न वध्यते ह्यविश्वस्तो दुर्बलो बलवत्तरैः २ विश्वा।

स्ताश्च सुबध्यंते बलवंतोपि दुर्बलैः मुक्तस्त्वं विस्मृतो मया त्वयोन्यो वैरं न मत्ता २ तस्मान्मया सह समागमं कुरु ।
मित्रधर्मार्थाय हिरण्यक आह त्वया सह कः समागमः श्रूयतां नीतिसर्वस्वं परस्परं दुष्टश्च यो मित्रं पुनः संधा
तुमिच्छति स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा २ तथा च गुणवानहं न मे कश्चिद्वैरयातनां करिष्यति न तदा
वयोः सख्यं उक्तं च सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिनेर्मीमांसाकृतमुन्ममाथ सहसा हस्ती
मुनिं जैमिनिं छंदोज्ञाननिधिं जघान मकरो वेलातटे पिंगलं अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः २
वायस आह अस्त्येतत् परं श्रूयतां ततः उपकाराद्धि लोकानां निमित्तान्मृगपक्षिणां भयाल्लोभाच्च मूर्खाणां मैत्री
स्याद्दर्शनात् सतां २ किंच मृद्घट इव सुखभेद्यो दुःसंधानश्च दुर्जनो भवति सुजनस्तु कनकघट इव दुर्भेद्यः
सुकरसंधिश्च ३ अपि च इक्षोरग्रात्क्रमशः पर्वणि २ यथा रसविशेषः तद्वत् सुजनमैत्री विपरीतानां च विपरी
ता ४ तत्सर्वथा साधुरेवाहं अपरं त्वां शपथैर्निर्भयं करोमि हिरण्यक आह न मेस्ति त्वदीयशपथैः प्रत्ययः ।
उक्तं च यतः शपथैः संहितस्यापि न विश्वासं रिपोर्व्रजेत् श्रूयते शपथं कृत्वा वृत्रः शक्रेण सूदितः २ तथा च
न विश्वासं विना शत्रुर्देवानामपि सिध्यति विश्वासात्त्रिदशेंद्रेण दितेर्गर्भो विदारितः २ बृहस्पतेरपि प्राज्ञस्तस्मा
न्नैवात्र विश्वसेत् य इच्छेदात्मनो वृद्धिमायुर्वित्तं सुखानि च सुसूक्ष्मेणापि छिद्रेण प्रविशत्यंतरा रिपुः २ नाशयेच्च
शनैः पश्चात्प्लवं सलिलपूरवत् मित्रोस्ति भार्गवस्य वा २ भार्गवस्य च विश्वासो नीतिसं । ५
क्षेत्रिधा स्थिताः महतामप्यर्थसारेण यो विश्वसिति रिपुर्व्रजेत् ३ भार्यासुतविरक्तास्तु तदंतं तस्य जीवितं तच्छ्रुत्वा लघु
पतनकोपि निरुत्तरीकृतश्चिंतयामास अहो प्रागल्भ्यमस्य नीतिविषयः अत एव तस्योपरि मैत्रीपक्षपातः आह
च सख्यं साप्तपदीनं ह्याहुर्दिव्यजनाः बलात्त्वं मित्रतां प्राप्तो वचनेन मम तच्छृणु २ इदानीं मैत्रीं प्रतिपद्यस्व अन्य

थाहमत्रैव स्थाने प्राणत्यागं करिष्यामि इति श्रुत्वा हिरण्योऽचिंतयत् नायं दुष्टबुद्धिर्वचनादेव ज्ञायते नाविदग्धः प्रि
यं ब्रूयात् नाकामी मंडनप्रियः निस्पृहो नाधिकारी स्यात् स्फुटवक्ता न वंचकः २ तदवश्यमनेन सह मैत्री मया
कर्तव्या एवं मनसा संधार्य वायसमब्रवीत् भद्र त्वया यत्नो दत्तो भवता अपरं मया त्वद्बुद्धिपरिक्षणाय एतदभिहि
तं अधुना त्वदंकगतं मे शिरः इत्येवमुक्त्वा निर्गंतुमारब्धः इषदर्धनिर्गतश्च पुनरेवावस्थितः ततो लघुपतन
काभिहितं किमद्यापि ममोपरि किंचिद्विश्वासकारणं यतो दुर्गान्न निर्गच्छसि सोपि वदति नाहमुपलक्षितस्त्वत्तो ।
बिभेमि किंतु त्वदीयान्यपि मित्रपार्श्वात्कदाचिन्मम विश्वस्तस्य विनाशः स्यादिति उक्तं च यतः मितो मितः पुनः
शत्रुर्मंदं मंदं चिकीर्षति मृत्योः प्रलेहपात्त्वात्ता दस्युः स्वांगनामिव २ अथ स आह गुणवन्मित्रसंगेन यन्मित्रमु नीचेन
पजायते शालिस्तंबाच्छिन्नवनं श्यामाकादि वनत्यजेत् २ तच्छ्रुत्वा सत्वरं निर्गत्य सादरं परस्परं समागतौ सुखं स्थि
त्वा लघुपतनकोपि हिरण्यमाह प्रतिशत्रुं नवानर्थ्य स्वजनवने आहारमन्वेषयामि एवमुक्त्वा तस्य सकाशादपक्रां
तः किंचिद्गहनवनं प्रविश्य शार्दूलव्यापादितमेकं वनमहिषं दृष्ट्वा तत्र प्रकाममाहारं कृत्वा सपुष्पकिंशुकतुल्या
मांसपेशीं आदाय हिरण्यमेवांतिकमायातः तं चाहूतवान् एह्येहि भद्र हिरण्यक त्वत्तामिदं मयोपनीतं मांसमि
ति तस्यापि च कृते तेनाप्यहृतेन भूत्वा श्यामाकतंडुलानां महान्पुंजः कृतः आह च भद्र मया स्वसामर्थ्येनानीतान्
भक्षयैतांस्तंडुलानिति ततस्तौ परस्परं सुतृप्तावपि प्रीतिप्रकटनाय भक्षितवंतौ मैत्री विजेयेतां उक्तं च ददाति
प्रतिगृह्णाति गुह्यमाख्याति पृच्छति भुंक्ते भोजयते नित्यं षड्विधं प्रीतिलक्षणं २ नोपकारं विना प्रीति कथंचित्क
स्यचिद्भवेत् उपयाचितदानेन यतो देवोपि तुष्यति २ तावत्प्रीतिर्भवेल्लोके तावद्दानं प्रदीयते वत्सः क्षीरक्षयं दृष्ट्वा ।
परित्यजति मातरं २ पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकं यत्प्रभावाद्विद्वेषी मित्रतां याति तत्क्षणात् २ तथा च

पुत्रादपि प्रियतरं भवतीह दानं मन्ये पशोरपि विवेकविवर्जितस्य दत्ते खलेपि निखिलं खलु येन दुग्धं नित्यं द।
दाति महिषी ससुतापि पश्य ३ किं बहुना प्रीतिं निरंतरं कृत्वा दुर्भेद्यां नखमांसवत् मूषको वायसश्चैव गता
स्त वेकांतमित्रतां ४ एवं मूषकोपकाररंजितमनास्तथा विश्वस्तो यथा तस्य पक्षमध्ये प्रविष्टः सदा तिष्ठति १ अ
थान्यस्मिन्नहनि वायसोश्रुपूर्णनयनः समागत्य सगद्गदमुवाच भद्र हिरण्यक मम विरक्तिः संजाता तस्य देशस्य।
परित्यागं कृतं तद्यास्याम्यन्यत्राहं हिरण्यक आह भद्र किं कारणं विरक्तः सोब्रवीत् भद्र श्रूयतामस्मिन्देशेम
हती अनावृष्टिः संजाता सर्वेपि नगरजनाः बुभुक्षयापीडिताः बलिमात्रमपि न प्रयच्छंति अपरं गृहे २ विहंग।
हि सबंधनार्थं पाशाः प्रगुणीकृताः अस्य दौरात्मिकः संवृत्तः अहमप्यायुःशेषतया पाशेन पतितः तेनाहं विदेशाय च
लितो बाष्पमोक्षणं करोमि यतः कोतिभारः समर्थानामिति २ तथा च विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ३ ततोहं देशांतरं यास्यामि हिरण्य आह तर्हि क्व यास्यसीति कथय स।
आह अस्ति दक्षिणापथे वनगहनमध्ये महान्ह्रदस्तत्रास्ति त्वत्तोप्यधिकः परमसुहृत्मंथरको नाम सुकृतकूर्मः
स मे लघुमत्स्यमांसशकलानि दास्यतीति तेन सह सुभाषितगोष्ठीमनुभूय सुखेन कालं नेष्यामीति यतो नाहमेतादृ
शं पक्षिक्षयं द्रष्टुं शक्नोमि उक्तंच धन्यास्तात न पश्यंति देशभंगं कुलक्षयं परहस्तगतां नार्यं मित्रं चापदि संस्थितं २
हिरण्यक आह यद्येवं तर्हि अहमप्यागमिष्यामि तत्रैव यतो ममापि महद्दुःखमस्ति स आह तत्किं दुःखं हिरण्य ६
क आह सोवक्तव्यमस्ति तत्रैव गतस्तत्सर्वं निवेदयिष्यामि वायस आह अहं तावदाकाशगतिर्भवान् भूचा
रस्तत्कथं मया सह तत्र गमिष्यामि स आह यदि मत्प्राणैः रक्षितैः प्रयोजनं तदात्मपृष्ठमारोप्य शनैः २ मुदा हर
स्वेति तच्छ्रुत्वा सानंदो वायस आह यद्येवं तद्धन्योहं न मम समोस्त्यन्यो धन्यतरः तदेवं क्रीयतां अहं संपाता।

दीन्यष्टावुड्डयनानि वेद्मि ततस्त्वं सुखेन नेष्यामि हिरण्य आह सोहमुड्डयननामानि श्रोतुमिच्छामि वायस आह
संपातं च महापातं निपातं च क्रमेव च तिर्यग्गतिस्तथोर्ध्वं च अष्टमं लघुसंज्ञकं १ तदेवं श्रुत्वा हिरण्यकोपि त
त्पृष्ठोपरि समारूढः सोपि संपातोड्डयनेन प्रस्थितः ततः शनैः शनैस्तेन सह ह्रदं प्राप्तः अत्रांतरे मूषकाधि
ष्ठितं वायसमवलोक्य देशकालविद्कोयमिति विचिंत्य मंथरकः सत्वरं जले प्रविष्टः लघुपतनकोपि तीर
स्थतरुकोटरे हिरण्यं मुक्त्वा शाखाग्रमारुह्य तारस्वरेण प्रोवाच भो मंथरक आगच्छागच्छेति सखे मित्र अहं वा
यसश्चिराशोत्कंठहृदयः समागतः तदागत्यालिंगय मां। उक्तंच किं चंदनैः सकर्पूरैस्तुषारैः किं च शीतलैः स
र्वे ते मित्रगात्रस्य कलां नार्हंति षोडशीं १ तच्छ्रुत्वा निपुणतरं परिज्ञाय पुलकिततनुरानंदाश्रुनयनः सत्वरं सलि
लान्निष्क्रम्य न मया परिज्ञातोसि इति ममापराधः क्षम्यतां उक्तंच यस्य न ज्ञायते वीर्यं न कुलं न च चेष्टितं न तेन
संविशेत्कार्यमित्युवाच बृहस्पतिः १ इति ब्रुवन् मंथरको हृष्टोत्तीर्णः लघुपतनकमालिंगितवान् एवं तावुभाव
पि विहितालिंगनौ पुलकितस्वशरीरौ वृक्षाधस्तादुपविष्टौ स्वात्मचिरंतनवृत्तांतं परस्परं प्रोचुः हिरण्योपि मंथ
रकं प्रणम्य तत्रोपविष्टः अथ तं समालोक्य मंथरको लघुपतनकमाह हिरण्यनामा मूषकोयं मम सुहृत्।
द्वितीयमिव जीवितं किं बहुना पर्जन्यस्य यथा धारा यथा च दिवि तारकाः सिकता रेणवो यद्वत् संख्यया परिवर्जि
ताः २ गुणाः संख्यापरित्यक्ताः सुहृदोस्य महात्मनः परं निर्वेदमापाद्य संप्राप्तोयं तवांतिके २ मंथरक आह किं
मस्य वैराग्यकारणं निवेदय हिरण्यः कथयति अस्ति दाक्षिणात्ये जनपदे प्रमदारोप्यं नाम नगरं तस्य नातिदू
रे महेश्वरायतनं तत्रत्यश्च परिव्राट् शूद्रकर्णो नाम प्रतिवसति स्म स च भिक्षावेलायां तस्मान्नगरात्सरक्त
गुडदाडिमगर्भानां स्निग्धद्रव्यपेशलानां भक्ष्यविशेषाणां भिक्षाभाजनं संपूर्णं कृत्वा मठमागत्य यथाविधिप्र।

णयात्रां कृत्वा तदुद्धरितशेषसमं भिक्षान्नं गृहीत्वा प्रत्यूषे कपरिचारकार्थं प्रत्यहं नागदंते प्रस्थापयति
न श्च तस्यापि ति प्रत्यूषे दत्तं कर्मकारिणां दत्त्वा तत्रैव देवायतने संमार्जनोपलेपनमंडनादिकं समर्थयति अन्य
स्मिन्नहनि मम अनुचरेण निवेदितं स्वामिन् चूडाकर्ण मंचेप्सितमन्नं नागदंतावलंबितं सदैव तिष्ठति तत्किम
स्मत्रहृष्टान्नेन अद्यात्तत्र गत्वा यथेच्छं भुंजामहे अहं सपरिजनस्तदन्नं भुक्त्वा प्रत्यहं जीवामि एवं च कालेऽति
वर्त्तते सुप्रयत्नेन संस्थापितेन तस्मिन्नयमान रक्षमाणे सपि भिक्षात् निर्विण्णो महत्प्रतिमयात् स्थानमुच्चैस्तरां प्रति
संक्रमयति तथापि तदहमनायासेनैव प्राप्नोमि भक्षयामि अथ कदाचित्तेन तदन्नार्थं महज्जर्जरवंशः समानी
तः तेन भगवान् सुप्तोपि तद्भिक्षापात्रं हंति अहमपि त्रासात् संक्षिते पलायनं प्रहारभयात् दप्रसर्पामि एवं तेन सह
रात्रिविग्रहेण परस्परं कालो व्रजतीति अथान्यस्मिन्नहनि तस्य गेहे तीर्थयात्राप्रसंगेन तन्मित्रं बृहत्स्फिङ्नामा तापस
: प्राघूर्णिकः समायातः चूडाकर्णोपि तस्य स्वागतादिपचारं कृत्वा श्रममपनीतवान् ततश्च रात्रावेकत्र संस्तरे द्वौ
प्रसुप्तौ धर्मकथां कर्तुमारब्धौ अथ स चूडाकर्णोपि मूषकत्रासार्थं जर्जरवंशेन भिक्षापात्रे परिताड
यन् बृहत्स्फिजे धर्मकथां कथयतः शून्यं प्रतिवचनं प्रयच्छति तन्मतौ न किंचिदाहरति अथासौ कुपितः
परं कोपमुपागतस्तमुवाच भोश्चूडाकर्ण परिज्ञातस्त्वं सम्यक् समया गतश्चैतदस्तेन मयास्मदस्मात्क्रोधं न त्वयि
तथात्रापि त्वदीयमठं त्यक्त्वा त्वत्र यास्यामि उक्तं च एह्यागच्छ समाविशासनमिदं कस्माच्चिराद्दृश्यसे कावार्त्ता ३
किमु दुर्बलोसि कुशलं प्रीतोस्मि ते दर्शनात् एवं ये समुपागतान् प्रणयितः प्रत्यालपंत्यादरात् तेषां युक्तमशं
कितेन मनसा हर्म्याणि गंतुं सदा १ अन्यच्च यथागते प्राघूर्णिके दिशो वीक्षते यश्चाप्यधः ये यांति सदने तस्य ते शृं
गरहितावृषा २ नाभ्युत्थानक्रिया यत्र नालापमधुरा गिरः गुणदोषकथा नैव तस्य हर्म्ये न गम्यते ३ त्वं गर्वित

स्त्वप्लका सुकृत स्नेहं नैव तद्वेत्सि मयायत्त्वश्रमव्याजेन नरकोपार्जना कृता उक्तं च यतः नरकाय मतिस्ते चेत् पौरोहि
त्यं समाचर वर्षं यावत् किमन्येन मासपत्यं दिनत्रयं ३ तन्मूढ हे शोचितमेवमर्थे त्वं गर्वित इति अथ तच्छ्रुत्वा भयत्रस्त
म मनाः चूडाकर्णः प्राह भो भगवन्मैवं वद न त्वत्तो ममान्यः सुहृत् कोप्यस्ति तच्छ्रूयतां गोष्ठीशैथिल्यकारणं एष दुरात्म ७
मूषकः प्रोन्नतस्थानस्थितमपि भिक्षापात्रमुत्प्लुत्य भक्षयति शेषं भक्षयति तदभावे कर्मकराः त्रिवेछेदान्न मार्जना
दि कर्म कुर्वंति तच्च मूषकत्रासार्थमनेन वंशेन मुहुर्मुहुर्भिक्षापात्रं ताडयामि तेन अन्यत् कारणमिति बृहत्स्फि
म तिराह अथ ज्ञायते कस्मिंश्चित्प्रदेशे बिलं तस्य मूषकस्य चूडाकर्णेणाह भो भगवन्न वेद्मि सोब्रवीत् नूनं निधानस्योप
रि तस्य बिलं निधानोष्मणा निश्चितं पूर्णत्तुत्तिरेषः उक्तं च उष्मादि वि ... वृत्तिर्नयति देहिनां किं पुनस्त
स्य संभोगोस्त्यागधर्म समन्वितः १ तथा च नाकस्माच्छांडिली माता विक्रीणाति तिलैस्तिलान् लुंचितानितरैर्यत्र
कार्यमत्र भविष्यति २ चूडाकर्ण आह कथमेतत् सोब्रवीत् कदाचिदहं कस्मिंश्चिदधिष्ठाने व्रतग्रहणनिमि
त्तं कमपि ब्राह्मणं वासार्थं प्रार्थितवान् ततो ब्राह्मणेन वासो दत्तः तत्राहं देवतार्चनादि परस्तिष्ठामि अन्यस्मिन्न
हनि प्रत्यूषे प्रबुद्धः ब्राह्मणी ब्राह्मणयोः संवादं दत्तावधानः शृणोमि ब्राह्मणः प्राह ब्राह्मणि प्रभाते दक्षिणायन
संक्रांतिरनंतफलदा भविष्यति तदाहं ग्रामांतरं प्रतिग्रहणार्थं यास्यामि त्वया ब्राह्मणे कस्य सूर्योद्देशेन भोज
नं दातव्यं यथाशक्त्या अथ तच्छ्रुत्वा ब्राह्मणी कठोरवचनैस्तं भर्त्सयंती प्राह कुतस्ते दरिद्रस्य भोजनप्राप्तिः
से तत्किं न लज्जसे एवं ब्रुवन् अपि न मया तव हस्तात् ग्रे प्राप्य लब्धं किंचित् सुखं नास्वादितं विशिष्टान्नं काकथा भूषणादि
षु तच्छ्रुत्वा भयत्रस्तो द्विजो मंदं प्राह ब्राह्मणि नैतद्युज्यते वक्तुं उक्तं च ग्रासादर्धमपि ग्रासमर्थिभ्यः किं न दीय
ते इच्छानुरूपो विभवः कदा कस्य भविष्यति २ तथा च ईश्वरा भूरिदानेन यल्लभंते फलं किल दरिद्रस्तच्च काकि

एषा प्राप्नुयादितिनः श्रुतं ४ अपिच दाताजघुरपि सेव्यो भवतिन कृपणो महानपि समृद्धा कूपांतः स्वाडुजलं
त तन्वीतैलोकस्य न प्रमुदः ३ अकर्त्वा गमहिम्ना मिथ्या किं राजराजेन गोमारं न निधानानि महयंति महेश्वरं ४
यथा च सदादानपरिक्षीणः शस्यं ते च करिश्वरः अदाता पीनगात्रश्च निंद्यते स च गर्दभः ५ प्रच्छन्नजलमा
जलदो वल्लभतामेति सकलजलोकस्य नित्यं प्रसारितकरो मित्रोपि न वीक्षितुं शक्यः ६ एवं ज्ञात्वा दरिद्रैरपि
स्वल्पात्स्वल्पतरमपि समये पात्रे देयं उक्तं च यतः सत्पात्रे महती श्रद्धा काले देयं यथोचितं यद्दीयते विवेक
वैस्तदानंताय कल्पते २ तथा च अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत् अतितृष्णाभिभूतस्य यतो काष्टा
मयी शिखा २ ब्राह्मणी आह कथमेतत् ब्राह्मणः कथयति अस्ति कस्मिंश्चित्प्रदेशे कश्चित्पुलिंदः पापर्द्धिक
र्तुं प्रस्थितः अथ तेन गच्छता महानंजगिरिशिखराकारः क्रोडः समासादितः तं वायो दृष्ट्वा कर्णांतं बाणमाकृष्य
हतं श्लोकमपठत् नमे धनुर्नापि च बाणयोजनं दृष्ट्वापि शंकां समुपैति शूकरः यथाह पश्यामहमद्य निश्चयं य
मेन नूनं प्रहितो ममांतिकं २ तथा सो तीक्ष्णसायकेन समाहतः शूकरेणापि कोपाविष्टेन बालेंदुकंठद्यु
तिना दंष्ट्राग्रेण पाटितोदरः पुलिंदो गतासुर्भुवि पपात अथ लुब्धकं व्यापाद्य शूकरोपि बाणप्रहारवेद
नया मृतः एतस्मिन्नंतरे कश्चिदासन्नमृत्युः शृगालः इतस्ततः परिभ्रमन् तमुद्देशमाजगाम यावत्पश्यति व
राहपुलिंदौ द्वावपि पंचत्वमुपागतौ ततः प्रहृष्टो व्यचिंतयत् अहो अनुकूलो मे विधिः येनैतदचिंतितमु ८
पस्थितं भोजनं अथ साधु इदमुच्यते अकृतेप्युद्यमे पुंसामन्यजन्मकृतं फलं शुभाशुभं समभ्येति विधिना
संप्रयोजितं १ तथा च यस्मिन्काले च देशे च वयसा याह्यशेन च कृतं शुभाशुभं कर्म तत्तदेवानुभुज्यते २ त
दहं तथा भक्षयामि पादान्यामादाय शनैः शनैरिति उक्तं च शनैः २ पंथो कंथा स्वयंवित्तमुपार्जितं रम्या।

यत्नमिव प्राशैदेहस्यान कदाचन २ इति विचिंत्य चापघटितकोटिं मुखमध्ये क्षिप्त्वा स्नायुं भक्षयितुमारब्धः।
ततस्तु त्रुटितपाशेनातालुप्रदेशं विदार्य चापकोटिर्मस्तकमध्येन शिखावन्निष्क्रांतः सोपि तद्वेदनया पंचत्वग
तः अतोहं ब्रवीमि अतितृष्णा न कर्तव्या कथा॥ पुनराह ब्राह्मणी नशृणु तावत् आयुः कर्म च वित्तं च विद्या
निधनमेव च पंचैतानि विसृज्यंते गर्भस्थस्यैव देहिनः १ अथैवमासु बोधिता ब्राह्मणी प्राह यद्येवं तदस्ति मे गृ
हे तिलमुष्टिरेका तांस्तिलान् चूर्णयित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामि तस्यास्तद्वचनमाकर्ण्य ब्राह्मणो ग्रा
मं गतः तयापि तांस्तिलानुष्णोदकेन समर्थ्य विलुंचयित्वा सूर्यातपे दत्ताः एतस्मिन्नंतरे तस्या गृहकर्मव्यग्रायाः।
स्तेषां तिलानां मध्ये कश्चित्सारमेयो मूत्रोत्सर्गं चकार तं दृष्ट्वा साव्यचिंतयत् अहो पश्य नैपुण्यं पराङ्मुखीभूतस्य
विधेः यदेतानपि तिलान् अभोज्यान् कृतवान् तदिदमहमेतान् समादाय कस्यचिद्गृहं विशां। तीइदिमाह अ
हो गृहात्कश्चिदलुंचितैस्तिलैर्लुंचितांस्तिलान् अथ तद्गृहिणी प्रहृष्टा यावदलुंचितान् गृह्णाति तावत्पुत्रेण
साभिहिता मातः अग्राह्या अमी तिलाः पुनरवदत् मातः अग्राह्या अमी तिलाः सा अब्रवीत् अतिनिपुणा पुत्र दार
कं शालाचनैषा लुंचितैरलुंचितान् गृह्णाति तच्छ्रुत्वा पापा ते परित्यक्ताः अतोहं ब्रवीमि नाकस्माच्छांडिली मातेति कथा
३॥ तन्निश्चितं निधानोत्थाजनिता कुई न शक्तिरस्ति एवं चूडाकर्णमुद्दिश्योप्याह अथ ज्ञायते तस्य मार्ग
गमनं चूडाकर्ण आह भगवन् ज्ञायते यतो तमेकाकी समभ्येति असंख्यापरिवृतः पश्यंते सर्वतो भ्रमंति आ
ह तर्हि प्रबोधसंप्राते मया सह त्वया येन द्वावपि जनचरणाभिलिताया भूमौ तत्पादानुसारिणो गच्छावः मय ।
पितस्य दुरात्मनः तत्र वक्त्रपातः सहर्षं वचः समाकर्ण्य विचिंतितं अहो विनष्टोस्मि यतः सामिप्रायं मस्य ॥
श्रूयते नूनं यथा निधानं स्थानं तथा दुर्गमपि ज्ञास्यति एतदभिप्रायादेव ज्ञायते उक्तं च सकृदपि दृष्ट्वा पुरुषं

विद्वान्जानातिसारतां तस्य हस्तन्ततुजयापिनिपुणपजनमपरिमाणंजानंति १ तथाच वांछैवसूचयांतेहि
तरंमविष्यति पुंसोन्यजन्मसुकृतंयदिवेतस्य विज्ञायतेशिशुरजातकलोषविन्नः इत्युक्तपदैरपयरन्...
कजापी २ ततोहंमयस्त्रस्तमनादुर्गमार्गंपरित्यज्य अन्यमार्गेणसपरिवारोगंतुप्रवृत्तः ततोग्रेहदत्कायो...।
जारस्थितः सवर्मूखकहंदमवलोक्य तन्मध्येमहसोत्पपात अथातमूखकाः मांपुक्तमार्गगामिनंगर्द...।
हतशेषाःसतमेव रुधिरप्लावितवसुंधरांप्रविष्टाः अथवा साध्विदमुच्यते छित्वापाशमपास्यकूटरचनांभंक्त्वा।
बलाद्वागुरां पर्यंताग्निशिखाकलापजटिलान्निर्गत्यदूरंवनात् व्याधानांशरगोचरादपिजवेनोत्पत्यधावन्।
न्मृगः कूपांतेपतितः करोति विधुरे किं वा विधौ पौरुषं १ अथाहं मे कोन्यतरद्वात्रगतः शेषामूढता।
तत्रैव बिलदुर्गंप्रविष्टाः एतस्मिन्नवसरे सकुष्टपरिव्राजकोरुधिरबिंदुरचितांभूमिमवलोक्य तेनैव मार्गेण
दुर्गगतः ततश्च हस्तिकाष्टयष्ट्याखनितुमारब्धः अथातेनखननानिधानंप्राप्तं यस्योपरिसदैवाहं कृतवास
इति यस्योष्मणा मूखकस्तेगृहेजागरणं करोति एवमुक्त्वातमादाय मठाभिमुखंप्रतस्थे अहमपि यावत्तत्स्थ।
नमागच्छामि तावद्रमणीयमुद्वेगकरणं तत्स्थानंवीक्षितुमपि न शक्नोमि अहमचिंतयंच अहो किं करो।
मि क्वगच्छामि कथंमेस्यात्मनःप्रशांति एवं चिंतयतो महता कष्टेन दिवसोजगाम। अथास्तमयेकियत्सोद्वे
गोनिरुत्साहस्तस्मिन्नपिमठेसपरिवारःप्रविष्टः अथास्मत्परिग्रहशब्दमाकर्ण्य बृहत्स्फिक्पुनरपिभि।
पात्रंजर्जरितवंशेनताडयितुमारब्धः अथासौन्यागतोब्रवीत् सखे किमद्यापि न निःशंकोनिद्रांगच्छसि आ णे
ह। भगवन् समायातोनूनं सपरिजनोमूखकः तद्भयादेतत्करोमि ततोविहस्याभ्यागतः प्रोवाच सखेमाभैषीः
वित्तेनसहगतः कूर्दनोत्साहः सर्वेषांजंतूनामेषा स्थितिः उक्तं च यदुत्साहसदामर्त्यः पराभवतियत्परं यद्वु

ङ्क्तेवदेशाक्यंतत्सर्वंवित्तजं बलं १ अथाहं तच्छ्रुत्वाकोपाविष्टोभिक्षापात्रमुद्दिश्यविशेषात्कूर्दितः अप्राप्त
एवभूमौपतितः तच्छ्रुत्वा समेशत्रुःस्फिगुवाच सखेपश्यपश्य कूर्दनं उक्तं च अर्थेन बलवान्सर्वे अर्थयुक्त
श्चपंडितः पश्यैनंमूखकं व्यर्थं स्वजातिसमतांगतं २ अथवा साध्विदमुच्यते दंष्ट्राविरहितःसर्पो मदहीनो यथा
गजः तद्वच्चविहीनोत्रपुरुषो नाम धारकः २ अहं तच्छ्रुत्वा मनसि चिंतितवान् अहो सत्यमाह मम शत्रुर्यतोनम
मांगुलमात्रमपितरूर्दनशक्तिरस्ति तद्धिग्अर्थहीनेनजीवितमिति उक्तं च अर्थेनापिविहीनस्य पुरुषस्याल्प
मेधसः उच्छिद्यन्ते क्रियाः सर्वाः ग्रीष्मेकुसरितोयथा १ यथा काकयवाः प्रोक्ताः यथारण्यभवास्तिलाः नाममात्राहि
संख्येव धनहीनास्तथानराः २ संतोपि हि नराजंते दरिद्रस्येतरेगुणाः आदित्य इव भूतानां श्रीगुणानां प्रकाशिनी
३ न तथा बाध्यते लोके प्रकृत्यानिर्धनोजनः यथा द्रव्याणिसंप्राप्य तैर्विहीनः सुखोषितः ४ शुष्कस्य कीटखात
स्य अग्निदग्धस्य सर्वतः तरोरपिवरंजन्म परं तस्य न वार्थिनः ५ शंकानीयाहि सर्वत्र निःप्रतापाद्दरिता उपकर्तु
न मपिप्राप्ते निःस्वं संत्यज्य गच्छति ६ उन्नम्योन्नम्य तत्रैव दरिद्राणां मनोरथाः पतंति हृदये व्यर्थाः विधवास्त्रीस्त
नाविवः ७ व्यक्तोपि दिने नित्यं दौर्गत्यतमसावृतः अग्रतोपि स्थितो यत्नात् केनापि हि न दृश्यते ८ इत्येवमहंवि
लप्य भग्नोत्साहः सन् स्वनिधानं गंगोपधानीकृतं परपक्षस्वदुर्गंव्यर्थश्रमःप्रातेर्गतः ततश्च मद्भृत्यानां केनो
पायेनजीवितंस्यात् किंचौर्येणापिपरस्वादानात्कष्टतरं यत्कारणं वरंमौनं उक्तं च यस्मकाशान्नलाभःस्यात्त...
वजाः सुविपत्तयः सस्वामीइवतस्याज्यो विशेषाद्भूत्यजीविभिः १ एवं तेषां वचो मार्गेस्पृशन् दुर्गंप्रविष्टो यावन्ना
कश्चिन्मत्सुखेमामभ्येति ततश्च मया चिंतितं अहो धिगिमं दरिद्रभावं अथवा साध्विदमुच्यते मृतो दरिद्रपुरुषो।
मृतंमैथुनमप्रजं मृतमश्रोत्रियंश्राद्धं मृतोयज्ञस्त्वदक्षिणः २ यद्यमाहशानां किंधाननयसत्तेहशाः फलविप...

तत्सर्वथा विभवहीनस्य ममाधुना वनवास एव श्रेयः। येन मानाधिकं वासं समानेन संश्रयेत। मानहीनः सुरैः सार्धं
विमानमपि वर्जयेत॥ २ मानमुद्वहता पुंसा वरं मा प्रत्यहं पदे नापमानमलं छिन्नं विस्तारिण्यपि संपदः॥ २ एवमपि
न याच्ञेमां कृत्वा मम नाश्रेतुं शो वकाः संहताः तेभ्य एव मम चैका किन्तु यो समर्थस्य विलंबनं कुर्वंति उक्तं च रोगी चिर
प्रवासी परान्नभोजी परावसथशायी यज्जीवति तन्मरणं यन्मरणं सोस्य विश्रामः॥ १ तत्सर्वथा तदेव तद्दस्यत्यप्र
तं धनमात्मीकरोति मया हितयोर्दुरात्मनोर्मच्छीर्षकसन्निधाने धनपेटिका दृष्टास्ति लकुटप्रहारकृतस्य तपस्विनो
इति रात्रौ गत्वा गं जेपश्रायने कृतां वित्तपेटिकां शनैः शनैर्विदार्य तस्य निद्रावशंगतस्य दुर्गे वित्तं मानयामि येन वि
त्तप्रभावेन भूमावपि मे आधिपत्यं भवति उक्तं च व्यथयंति परं चेतो मनोरथशतैर्जनाः नानुष्ठानैर्धनैर्हीनाः कुल
जा विधवा इव॥ १ दौर्गत्यं देहिनां दुःखमपमानकरं परं येन स्वैरपि मन्यंते जीवंतो मृतका इव॥ २ दैन्यस्य पात्रतामे
ति पराभूतेः परं पदे विपदामाश्रयः शश्वद्दौर्गत्यकलुषीकृतः॥ २ लज्जंते बांधवास्तेन संबंधं गोपयंति ते मित्राण्यमि
त्रतां यांति यस्य न स्युः कपर्दिकाः॥ ३ मूर्तिर्लाघवमेवैकं नदपापादिकं गृहं पर्यायो मरणस्यायं निर्धनत्वं शरीरिणां॥ ४
अजाधूलिरिव त्रस्तैर्मार्जनीरेणुवज्जनैः दीपखट्वोत्थच्छायेव त्यज्यंते निर्धना जनाः॥ ५ शौचं वित्तविशिष्टपाद्यस्ति किं
चित्कार्यं क्वचिन्मृदा निर्धनेन मनुष्येण नास्ति किंचित्प्रयोजनं॥ ६ अधनो दातुकामोपि संप्राप्तो धनिनां गृहं मन्यते।
धिक्प्रदारिद्र्यं याचकः सोथ देहिनां ७ तद्वित्तापहारं विदधतो मम मृत्युस्तदपि शुभतरं वित्तापहरणं ह्यत्याहो॥
तिक्षितिकातरः पितरोपि न गृह्णंति तद्दत्तं सलिलांजलिं॥ १ तथा च गवार्थे ब्राह्मणार्थे च स्वचित्तस्वीकृते तथा प्रा १०
णान् त्यजंति ये युद्धे तेषां लोकाः सनातनाः॥ २ इत्येवं निश्चित्य तत्र गत्वा निद्रावशमुपगतो मया पेटिकायां छिद्रं वि
हितं यावत्तावत्प्रबुद्धौ तौ दुष्टतापसौ तयोरेकेन जर्जरवंशलगुडप्रहारेण शिरसि ताडितः कथंचिदायुःशेषतया न मृत

इति अथवा प्राप्तव्यमर्थं लभते मनुष्यो देवोपि तं लंघयितुं न शक्तः तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न
हि तत्परेषां॥ १ काकः आह कथमेतत्। हिरण्यकः कथयति अस्ति कस्मिंश्चिन्नगरे सागरदत्तो नाम वणिक् तत्
सुनुना रूपकशतेन विक्रयमाणः पुस्तको गृहीतः तस्मिंश्च लिखितमस्ति प्राप्तव्यमर्थं लभते मनुष्य इति तद्
दृष्ट्वा सागरदत्तेन सुतः पृष्टः कियता मूल्येनैषः पुस्तको गृहीत इति सोब्रवीत् तात रूपकशतेन तच्छ्रुत्वा
सागरदत्तो ब्रवीत् धिग्मूर्ख त्वं लिखितैकश्लोकं पुस्तकं रूपकशतेन यद्गृह्णासि एतया बुद्ध्या कथं द्रव्योपार्जनं
करिष्यसि अद्यप्रभृति त्वया मम गृहे न प्रवेष्टव्यं एवं निर्भर्त्स्य गृहान्निर्वासितः सचैतेन निर्वेदेन विप्रकृष्टदे
शांतरं गत्वा किमपि नगरमाश्रित्यावस्थितः अथ कतिपयदिवसैस्तन्नगरनिवासिना केनचिदसौ पृष्टः कुतो
भवानागतः किंनामधेयोसीति सोब्रवीत् प्राप्तव्यमर्थमिति अथान्येनापि पृष्टस्तथैव सोब्रवीत् एवं यः कश्चि
त्पृच्छति तस्योत्तरं प्रयच्छति एवं च तस्य प्राप्तव्यमर्थ इति प्रसिद्धं नाम संजातं अथ राजकन्या चंद्रमती ना
म अभिनवयौवनरूपसंपन्ना सखीद्वितीया एकस्मिन्महोत्सवदिवसे नगरं निरीक्षमाणा तिष्ठति
तत्र कश्चिद्राजपुत्रोऽतिवरूपसंपन्नो मनोरमश्च तस्याः कथमपि दैववशाद्दृष्टिगोचरे गतः तद्दर्शनसमका
लोद्भवकुसुमबाणहतया तया निजसखी द्वितीयाभिहिता हलेयथा किमनेन सह समागमो भवति तथा
द्य त्वया यतितव्यं एवं श्रुत्वा सखी शीघ्रं तत्सकाशं गत्वाब्रवीत् यदहं चंद्रमत्या त्वदंतिकं प्रेषिता इति भणि
तं च त्वां प्रति यथा मम तव दर्शनान्मनोभवेन पश्चिमावस्था कृता तद्यदि शीघ्रं मदंतिके न समेष्यसि तदा मम
मरणमेव शरणमिति श्रुत्वाथ तेनाभिहितं यदवश्यं मया तत्रागंतव्यं तत्कथं मया केनोपायेन प्रवेष्टव्यं अथ
सख्याभिहितो रात्रौ सौधस्य श्रृंगावलंबितया दृढचर्मरज्ज्वा त्वयारोढव्यं सोब्रवीत् यद्येवं निश्चयो भवतिर्भवतु।

स्वदत्तमेव करिष्यामीति निश्चित्य सखीं चंद्रमतीसकाशं गता अथागतायां रजन्यां स राजपुत्रः स्वचेतसा व्यचिंतयत्
गुरोः सुतां मित्रभार्यां स्वामिसेवकगेहिनीं यो गच्छति पुमान् लोके तमाहुर्ब्रह्मघातकं १ अपरं च अयशः प्राप्यते
येन चाधो गतिर्भवेत् स्वार्थश्चि भ्रश्यते येन तत्कर्म न समाचरेत् २ इति सम्यक् विचार्य तत्सकाशं न जगाम अथ प्रा-
प्तव्यमर्थः पवन धवलगृहपार्श्वे अवलंबितवरत्रां दृष्ट्वा कौतुकाविष्टहृदयस्तामालंब्याधिरूढस्तया राजपुत्र्या
स एवायमित्याश्वस्तचित्तया बहुमानकर्षितः ततः स्नानपानखानाछादनादिना संमान्य तेन सह शयनतलमाश्रितया
तदंगसंजातहर्षरोमांचितगात्रयोक्तं युष्मद्दर्शनमात्रानुरक्तया मयात्मा तुभ्यं प्रदत्तो न ममान्यो भर्त्ता मनसापि भविष्य-
तीति ज्ञात्वा किं मया सह न ब्रवीषि सोऽब्रवीत् प्राप्तव्यमर्थं लभते मनुष्य इति तदाश्रुत्वा संकुचितहृदया त्वरितं
तं वरत्रया वाऽतारितः स च गत्वा ... देवायतने प्रसुप्तः अथ कदाचित् स्वैरेण दत्तसंकेतः कोट्टपालकः प्राप्तः
तावदसौ सर्वसुप्तस्ततो दृष्टः तेन रक्षणार्थं समीहितः तस्य कोऽसि वान् सोऽब्रवीत् प्राप्तव्यमर्थमिति श्रुत्वा दंडपाशिके-
नाभिहितं शून्यं देवगृहमिदं तत्र मदीयं शयनं त्वमन्यत्र गत्वा स्वपिहि तत्तथा प्रतिपद्य स च मतिविपर्यासादन्यत्रे
शयने सुप्तः अथ तस्य रक्षकस्य ... कन्या विनयवती नाम रूपयौवनसंपन्ना कस्यापि पुरुषस्यानुरक्ता संके-
तं दत्वा तत्र शयने सुप्ता आसीत् अथ सा तमागतं दृष्ट्वा स एवायमस्मद्वल्लभ इति रात्रावेव पुनरंधकारवशात्
तयोत्थाय स्नानभोजनाच्छादनादिक्रियाः कारयित्वा गांधर्वविवाहेनात्मानं विवाह्य ईत्वा तेन सह शयने स्थितया कि-
ते कस्मि तन्नयना समीक्ष्य तमुं जल्पय यदीदृशे नात्मानं विवाहितं तेनां चैकं किं जल्पितं भविष्यतीति एवं विमृश्य सविषाद
यातया निर्भर्त्सितोऽसौ रथ्यावीथिमार्गेण गच्छति तदन्यविषयावासी वरकीर्त्तिनामा वरो महता वाद्यशब्देनागच्छति।
प्राप्तव्यमर्थोऽपि तैः सह संगमागतः अथ यावल्लग्नसमये राजमार्गसमीपे श्रेष्ठिगृहद्वारि रचिते वेदिकामंड-

पसमीपे कृतकौतुकमंगलवेषो वणिक्सुतस्तिष्ठति तावन्मत्तो हस्ती आरोहं हत्वा प्रनष्टजनकोलाहलेन लोकमाकुलयन्
निशीथे तिक्रांते तं प्रदेशं प्राप्तः तं दृष्ट्वा सर्वेऽनुचरा वरेण सह दशदिशो जग्मुः अथास्मिन्नवसरे भयतरलित
लोचनामेकाकिनीं कन्यामवलोक्य माभैषीरहं ते परित्रातेति सुचिरं स्थिरीकृत्य दक्षिणपाणिना महासाहसि-
त कतया प्राप्तव्यमर्थः परुषवाक्यैः हस्तिनं निर्भर्त्सितवान् कथमपि दैववशादपेते हस्तिनि यावत् सस्थसुहृद्बांधवो
वरकीर्त्तिरतिक्रांते लग्नसमये आगच्छति तावद्वधूं स्वहस्तेन गृहीत्वा तिष्ठति किमिदं वृत्तं अहमन्यस्मै प्रदत्तेति सो-
ऽब्रवीत् सोऽहमपि हस्तिभयपलायितो न वक्ति सह सोऽन जाने किमिदं वृत्तं इत्यभिधाय दुहितरं प्रष्टुमारब्धः।
वत्से त्वया न सुंदरं कृतं तत्कथ्यतां कोऽयं वृत्तांतः साब्रवीत् अहमनेन प्राणसंशयादरक्षिता तदेनं मुक्त्वा न ममान्य
पाणिं गृह्णीष्यति अनेन वार्त्ताव्यतिकरेण रात्रिर्गता अथ प्रातः संजातः महाजनसमेलकात्तं वार्त्ताव्यतिकरं श्रुत्वा रा-
जदुहितापि तमुद्देशमागता कर्णपरंपरया ज्ञात्वा दंडपाशिकदुहितापि तत्रैवाजगाम अथ तं महाजनसमुद्रं
दृष्ट्वा राजापि स्वयं तत्रैवागतः प्राप्तव्यमर्थं प्रत्याह विश्रब्धं कथय कीदृशोऽयं वृत्तांत इति सोऽब्रवीत् प्राप्तव्यमर्थमि-
ति अथ राजकन्या स्मृत्वाब्रवीत् देवोऽपि तं लंघयितुं न शक्तः ततो मं पाशिकदुहिताब्रवीत् तस्मान्न शोचामि
न विस्मयो मे तच्चवनमाकर्ण्य वणिक्सुतदुहिताब्रवीत् यदस्मदीयं न हि तत्परेषां २ अथ राजा तेषां सर्वेषामभय-
प्रदानं दत्वा पृथक्पृथक् वृत्तांतान् श्रुत्वाऽवगततत्त्वस्तस्मै प्राप्तव्यमर्थाय स्वदुहितरं ग्रामसहस्रेण सममलंकृ-
तां सर्वालंकारपरिवारयुतां दत्वा त्वमेव पुत्रोऽसि नगरविदितं यौवराज्येऽभिषिक्तवान् दंडपाशिकेनापि स्वदुहिता
स्वशक्त्या वस्त्रदानादिना संमान्य प्राप्तव्यमर्थाय प्रदत्ता अथ प्राप्तव्यमर्थेनापि स्वीयपितृमातरौ समस्तकुटुं-
बावृतौ समानीतौ अथ सोऽपि स्वगोत्रेण सह भोगाननुभुंजमानः सुखेनावस्थितः अतोऽहं ब्रवीमि प्राप्तव्यमर्थमि-

MEMORIAL
MEMORIAL

तिकथा ४ । पुनरपि हिरण्येनचिंतितं सोहमेवं चिंत्य धनव्यामोहात् प्रतिनिवृत्तः सुष्टुखल्विदमुच्यते
र्नहस्तं श्रीजं सुकुलीनता न कुलजन्म संतोषश्च समृद्धिः पांडित्यम कार्यविनिवृत्तिः २ तथा च सर्वाः संपद
स्तस्य संतुष्टं यस्य मानसं उपानद्गूढपादस्य ननुचर्मावृतेव भूः १ नयोजनशतं दूरं वाह्यमानस्य तृष्णया संतुष्टस्य
करप्राप्तेप्यर्थे भवतिनादरः २ तस्माद्देविनमस्तुभ्यं धैर्यविक्रवकारिणि विष्णुस्त्रैलोक्यनाथोपि यत्वयावा
मनः ३ नतेकिंचिद्कर्तव्यमपमानं कृतंविनी आसादयसि हस्ते दाक्षिण्यस्य हितान्यपि ४ असत्यान्यधिसा
ष्माणि प्रियाणिगदितान्यपि स्थितं परिगृहद्वारि तस्मान्निवृत्तिमानुदि ५ अपिच पीतंतृगाधितोयं क्षाश्वन वरं चि
तेप्रस्तेरवापिसुप्तं वृत्तः कांतावियोगो निजजनरजादीनमुक्तं पारुषं पश्चाद्यातं प्रयोधस्तरणमपि सतंधारि
तं कर्परं वैरस्या कर्तव्यमभवतियदिहतेक्षिप्रमादितापं तात ततः १ हेतुप्रमाणयुक्तं वाक्यं न श्रूयते दरिद्रस्य ३
गुणपक्षपमनर्थवाच्यं श्लाघ्यं समृद्धस्य २ धनवान्कुलीनोपिलोके पूज्यतमो नरः शशिनस्तुल्यवंशोपि निर्ध
: परिभूयते ३ गतवयसामपि पुंसां येषामर्था भवंति ते तरुणाः अर्थेन तु हीनाये वृद्धास्ते यौवनेपि स्युः ४ त्यजं
ति मित्राणि धनैर्हीनान्पुत्राश्चभृत्याश्च सहोदराश्च सर्थवंतं पुनरेव यांति ह्यर्थस्त्रिलोके पुरुषस्य बंधुः
एवमवधार्यातिर्हंयहमवनागतो यावत्तावदत्रांतरे एष लघुपतनकोमया तिर्कमागतः पश्चवान् हरगमनाय प्रोत्सा
ननैकमत्र सरकामागतस्तदेतन्नवतो निर्वेदकारणमाख्यातं साधुचेदमुच्यते सम्मेरो रसमातंगं सदेवासुरमानुषं २२
अमेध्यार्थकृताहारं भवती हजगत्त्रयं १ कस्थां वसुंधरां जित्वा विरस्यां प्राप्यवादिशां वेलां यां त्वाकु कामस्य ज
स्यावेतकलाइति २ नस्यासःकृते बुधः को न कुर्यात्कर्मविगर्हितं यस्मान्नु बंधस्तापिष्टां प्रपद्यं तेन वर्जति ३ तच्छ्रुत्वा
मंथरक आह भद्रभवति सुहृदयमसंदिग्धयः कृत्वामोपिराङ्गम्तंत्वा महत्स्थानेस्थितेस्पष्ट मारोपनयेति

नमार्गेनन्सचितः उक्तं च विकारयतिनोचित्तं यस्यचित्ते कदाचन मीत्रस्य सुकुलीनस्य कारयेन्मित्रमुत्तमं १ विद
द्भिः सुहृदामित्र क्लिन्देरेते रम्गं सायं परिक्षितकारणं प्रोक्तं हेमाग्निरिवपंडितैः २ आपत्कालेतु संप्राप्ते यन्मित्रंमि
त्रमेव तत् वृद्धिकालेतु संप्राप्ते दुर्जनोपि सुहृद्भवेत् ३ तन्मयाप्यविषये विश्वासः समुत्पन्नो यतो । नीतिविरु
द्धेयामन्मैत्री मांसाशिभिर्वायसैः सदस्मति भ्रष्टचरणानां अथ साधुश्चेदमुच्यते नमित्रं कस्यचित्कोपि नितांतं व
वैरसंतत्दृश्यते मित्रवद्धस्तः कार्याद्वैरी परिक्षित १ तस्वागतनावाताः स्वगृहे वद्रात्यतां अत्र सरोनिकटे उ
च्छिन्नाशा विदेशा वा समश्चते संजातः तत्र विषये संतापोनकार्यः उक्तं च अभ्रछायास्वलेप्रीतिः सिद्धमंत्रेत्ता
यौवितः किंचित्कालोपभोग्यानि यौवनानि धनानि च १ अतएव विवेकिनो मुक्तात्मानो धनस्पृहां न कुर्वंति उ
क्तं च सुसंचितैर्जीववत्सुरक्षितैर्निजेपि देहेन वियोजितैः क्वचित् पुंसोऽप्यमानवृत्ततोपिनिष्ठुरे रिपोः स्व
रं पंच पदीन दीयते १ अन्यच्च यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्त
वान् २ निर्दोषमपि विगर्ह्य दोषं योजयते नृपः निर्धनः परितोषोपि सर्वत्र निरुपद्रवः ३ अर्थानामर्जने दुःखं
अर्जितानां च रक्षणे नाशे दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः १ अर्थार्थी यानि कष्टानि मूढोयं सहते जनः
शतांशेनापि मोक्षार्थी तानि चेन्मोक्षमाप्नुयात् २ विदेशेपि वैराग्यं न कार्यं उक्तं च को धीरस्य मनस्विनः स्वविष
यः को वा विदेशः स्मृतो यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितं यद्दंष्ट्रानखलांगुलप्रहरणैः सिंहो वनं गा
हते तस्मिन्नेव हतद्विपेंद्ररुधिरैस्तृष्णां छिनत्यात्मना १ अपरं चार्थहीनः परदेशगतोपि प्रज्ञावान्भवति क
थंचिदपि न सीदति उक्तं च कोतिभारः समर्थानामिति तत्प्रज्ञानिधिर्नवान्प्राप्तस्तत्पुरुषकृत्यः अथवा

उत्संपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तं शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं वांछति वासहेतोः १ अकारणमशठमचपलं योगिनमविषादिनं बुधं शूरं यदि नाश्रयति नरं श्रीः रेव हि वंचिता भवति २ अपि च व्यवसायिनमलसं दैवपरं साहसाच्च परिहीनं प्रमदेव हि वृद्धपतिं नेच्छत्युपगूहितुं लक्ष्मीः ३ अपरं शास्त्रोप्यथे र्मस्थाने पश्यति तदेव तावंत्येव दिनानि त्वदीयं तदाशीत् मुक्तं मया त्मीयं भोक्तुं न लभ्यते स्वयमागतमपि धिना पह्नीयते तथा च अर्थस्योपार्जनं कृत्वा नैवाभोगः समश्नुते अरण्यं महदासाद्य मूढः सोमिलको यथा १ हिरण्यक आह कथमेतत् सोब्रवीत् अस्ति कस्मिंश्चिदधिष्ठाने सोमिलको नाम कौलिकः प्रतिवसति स्म सगुण थिविजनोचितानि सदैव वस्त्राण्युत्पादयति परं भोजनाच्छादनादनाभ्यधिकमात्रं न संपद्यते ये चान्ये कौलिकाः स्थूल संपादनज्ञास्तान् महर्द्धिसंपन्नान् आलोक्य स्वभार्यामाह प्रिये पश्यैतान् स्थूलपटवस्त्रकारान् धनकनकसम द्धान् तदसंधारणकं मम तत्स्थानम् अतोन्यत्र स्थाने गच्छामि साब्रवीत् भो प्रियतम मिथ्या प्रजल्पितमेतत् यदन्यत्र गतानां धनं भवति स्वस्थाने न भवति उक्तं च उत्पतंति यथाकाशे निपतंति महीतले पक्षीणां तदपि प्राप्यान्नादत्तमु तिष्ठते १ तथा च न ह्यभवति यन्न तावद्भवति च नाश्च विना नापि यत्नेन करतलगतमपि नश्यते यस्य च न भवित व्यं नास्ति २ यथा धेनुसहस्रेषु वत्सो विंदति मातरं बहूनामपि मध्यस्थं तद्वत्कर्म पुरातनं ३ शयने सह शयाते ३
गच्छंतमनुगच्छति नृपाणां सेवकोयद्वत् तत्कर्म महात्मना ४ यथा छायातपौ नित्यं सुसंबद्धौ परस्परं एवं कर्म च कर्ता च संश्लिष्टमितरेतरं ५ तस्मादत्रैव व्यवसायपरो भव कौलिक आह प्रिये न सम्यगभिहितं त्वया व्यवसायं विना कर्म न फलति उक्तं च यथैकेन हस्तेन तालिका संप्रपद्यते तथोद्यमपरित्यक्तं न फलं कर्मणः स्मृतं १ पश्य क

र्मवशात्प्राप्तं भोज्यकालेपि भोजनं हस्तोद्यमं विना वक्त्रे प्रविशेन्न कथंचन २ तथा उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवं हि दैवमिति तथा च उद्यमेन हि सिध्यंति कार्याणि न मनोरथैः न हि सिंहस्य सुप्तस्य विशंति वदने मृगाः १ अपरं च स्वशक्त्या कुर्वतः कर्म न चेत्सिद्धिं प्रयच्छति नोपलभ्यः पुमांस्तत्र दैवांतरितपौरुषः २ तन्मयावश्यं देशांतरं गंतव्यं इति विचिंत्य वर्द्धनपुरं गतः तत्र वर्षत्रयं स्थित्वा सुवर्णशतत्रयोपार्जनं कृत्वा भूयोपि स्वगृहं प्रस्थितः अथार्द्धपथे छतस्तस्य कदाचिदटव्यां भगवानादित्योस्तमुपागतः तच्च व्यालभयात् वटवृक्षस्थूलशाखामारुह्य प्रसुप्तो यावत्पश्यति तावन्निशीथे द्वौ पुरुषौ रौद्राकारौ परस्परं जल्पंतौ तेन दृष्टौ तत्रैक आह भो कर्तस्त्वं वेत्सि सोमिलिकस्य भोजनाच्छादनादतेधिका समृद्धिर्नास्ति तत्किं त्वयास्य स्वर्णशतत्रयं प्रदत्तमिति स आह भो कर्म मयावश्यं देयं व्यवसायिनां व्यवसायं कर्तव्यं तत्परिणतिस्त्वदायत्तेति अत्रांतरे एकः पुमानाकाशस्थ इदमाह भो सोमिलिक दृष्टोहं भवते तत्प्रार्थयतामभीष्टं वरमिति सोमिलक आह तदेवं धनवान् भवेयमपि स्पृहणीयो भवति अतो देहि यदेवमे प्सुतं धनं पुरुष आह यद्येवं तद्गच्छ त्वं भूयोपि वर्द्धनपुरं तत्र द्वौ वणिक्पुत्रौ प्रतिवसतः स्म तत्रैको धनगुप्तः अन्यो दत्तभुक्तधनः तयोः श्रेष्ठितं बुध्वा एकस्य स्वरूपं प्रार्थनीयं यदि ते धनेन प्रयोजनं अभीष्टस्तेन तत्त्वामपि धनगुप्तं करोमि अथवा दत्तभुक्तधनेन ते प्रयोजनं तत्तद्भुक्तधनं करोमि इत्युक्त्वादर्शनं गतः सोमिलिकोपि विस्मयमानो भूयोपि तदेव वर्द्धमानपुरं गतः अथ संध्यासमये परिश्रांतः कथंचित्तस्मिन् धनगुप्तगृहं पृच्छन् कृच्छ्रात् प्रा यस्तत्प्रविष्टः अथासौ भार्यापुत्रसहितेन धनगुप्तेन भर्त्स्यमानो तदेव गृहं प्राप्योपविष्टः ततश्च भोजनावेला तस्यापि वर्जितं भोजनमपि प्रदत्तं ततः सुप्तस्तत्रैव सुप्तो निशीथे पश्यति तौ द्वावपि पुरुषौ मंत्रयतः परस्परं तत्रैको ब्रवीत् भो कर्तः किं त्वयास्य धनगुप्तस्याधिको व्ययो निर्मितो यत् सोमिलिकस्यानेन भोजनं दत्तं त

॰युक्तं कृतं स आह भोः कर्मन् मम मात्र दोषः मया पुनर्यत्नस्य लाभ ज्ञात्वा अग्निज फलं कर्तव्यं तत्र परिणतिस्त्वदा
यत्तेति अथासौ यावदुत्तिष्ठति तावद्धनगुप्तो विसूचिकादोषेण खिद्यमानो रोगाभिभूतस्तिष्ठति ततश्च द्वि
तीये ह्नि तद्दोषेण जातोपवासः संजातः सोमिलिकोपि संजाततद्धानिः ब्रह्मादत्तगुप्तगृहं गतः तेनाप्युत्था
नादिभिः सत्कृतो भोजनाच्छादनविहितसन्मानस्तस्यैव गृहे सत्व्यशयने मासस्य सुष्वाप ततश्च निशीथे यावद्
तृप्यत्यति तावत्तावेव पुरुषौ मिथो मंत्रयतः तत्रैको ब्रवीत् भोः कर्तः अनेनाद्य दत्तगुप्तधनेन सोमिल
सोपचारः कृतस्तावत्पूर्ववत् व्ययः कृतस्तत्कथय कथमस्योद्धारविधिर्भविष्यति अनेन सर्वथैव तद्याव
र्कगृहादानीतं स आह भोः कर्मन् मम कृत्यमेतत्परिणतिस्त्वदायत्तेति अथ प्रभाते कश्चित्पुरुषो राजप्रसादजं वि
त्तमादाय समायातो दत्तगुप्ताय समर्पयामास तद्दृष्ट्वा सोमिलिकश्चिंतयामास अहो संचयरहितोपि वरमेष
दत्तगुप्तो धनेनाप्यो कदर्यो धनगुप्तः उक्तं च अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतं रतिपुत्रफला दारा दत्तभु
क्तफलं धनं १ तत्कुरु विधाता मां दत्तगुप्तधनं करोतु न कार्यमे धनगुप्ततया उक्तं च येन शुक्ली कृतास्तस्या
काश्च हरिती कृताः मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति १ इति विचिंत्य यावदसौ उत्तिष्ठते स्वर्णग्रंथि
म्वेषयति तावद्रिक्तस्ततश्चिंतयामास अहो मया एतावता कष्टेनोपार्जितमपि हेलया क्वापि गतं तदर्थं अमी
भे निष्किंचनस्य कथं पत्नी मित्राणां च मुखं दर्शयिष्यामि इति निश्चित्य भूयोपि तत्रैव नगरे स्व वर्षमात्रेण त्रि
सुवर्णशतपंचकमुपार्जयित्वा भूयोपि स्वदेशं प्रत्यन्यमार्गेण प्रस्थितः यावदर्धपथे भूयो न दृष्टः व्योममध्ये गतसूर्
भगवानादित्योस्तमुपजगाम तावत्स मे वन्यग्रोधमासादितवान् भोः कष्टं किमेवमारब्धं देवहतकेन पुनः स्व
ग्रोधस्याधाराश्रयः आसः अथ सुवर्णनाशभयात्कथं चिद्गतोपि विश्राम्यति केवलं गृहोत्कंठः सत्वरं व्रजत एत

स्मिन्नंतरे द्वौ पुरुषौ ताद्दृशावेव दृष्टपूर्वौ देशे समागच्छतौ परस्परं जल्पंतावशृणोत् तत्रैकः प्रोवाच भोः कर्तः किं त्वयैक
स्य सोमिलिकस्य सुवर्णशतपंचकं प्रदत्तं किं न वेत्सि भवान् यद्भोजनाच्छादनादतेप्यधिकं किंचिदेवास्ति सोऽब्र
वीत् कर्मन् मया वश्यं व्यवस्थितं देयं परं परिणतिस्त्वदायत्तेति अतस्त्वमेवापहरेति किमु मामुपालंभसि तच्छ्रु
त्वा सोमिलिको ग्रंथिमन्वेषयति तावन्नास्ति ततस्तु परं विषादमापन्नो व्यचिंतयत् अहो मम किं धनरहितस्य
जीवितेन तदत्र वटवृक्षे आत्मानं बंधयित्वा मृत्युं संकरोमीति एतन्निश्चित्य दर्भमयीं रज्जुं विधाय ग्रीवायां पा
शं नियोज्य शाखामासाद्य यावत्स्वमात्मानं निबध्य क्षिपति तावदेकः पुमानाकाशस्थ इदमाह भोः सोमि
लिक मैवं कार्षीः साहसः त्वं देवोद्ददवचित्तापहारको न ते भोजनाच्छादनाप्यधिकं वराटिकामपि सहामि
गच्छ स्वगृहं तथा न मे स्याद्यर्थदर्शनं तत्प्रार्थ्यतामभीष्टं वरं सोमिलिकोब्रवीत् यद्येवं तर्हि मे प्रयच्छ त धनं सोमि
लिकमाह देवः भद्र किं करिष्यति धनेन यच्छ भोगरहितेन यतो भोजनाच्छादनाप्यधिको भोगो न उक्तं च
किं तया क्रियते लक्ष्म्या या वधूरिव केवला या न वेश्येव सामान्या पथिकैरिव भुज्यते १ सोमिलक आह भोः य
द्यपि तस्य भोगो न भवति तथापि धनं मे भवतु उक्तं च कृपणोप्यकुलीनोपि सदाऽभ्यागतमानवैः सेव्यते सततं
लोके यस्य स्यात् द्वितसंचयः १ तथा च शिथिलौ सुसुबद्धाश्च पततः पततश्च ते मया निरीक्षितं भद्रे वर्षाणि
८ श्लोपंच च २ पुरुष आह कथमेतत् सो ब्रवीत् अस्ति कस्मिंश्चिदधिष्ठाने लंबवृषणो नाम महाशतः प्रति
वसतिस्म स च मदातिरेकात्परित्यक्तयूथो नदीतटानि शृंगाभ्यां विदारयन् स्वेच्छया मरकतसदृशानि शष्पाणि
भक्षयन्नरण्यगोचरो बभूव अथ तत्रैव वने प्रलोभको नाम शृगालः परिवसति स्म स भार्यया सह कदाचिन्न
५ दीतीरे सुखोपविष्टोस्ति एतस्मिन्नंतरे प्रलंबवृषणो जलपानार्थं तदेव पुलिनमवतीर्णः ततस्तौ प्रलंबवृ

वलोक्य शृगाल्या शृगालोभिहितः स्वामिन्नस्य वृषस्य मांसपिंडौ लंबमानौ च यथास्थितौ तदेतौ क्षणेन...
रेण पतिष्यतः एवं ज्ञात्वा मया नस्य पृष्ठे यातव्यमस्ति शृगालः प्राह प्रियेन ज्ञायते कदाचिदेतयोः पतनं न...
ष्यति न वेति तत्किं मां वृथा श्रमाय नियोजयसि अत्रस्थस्तावज्जलार्थायागतान्मूषकान्भक्षयिष्यामि तद...
: कस्मिदागत्य एतत्स्थानमाश्रयिष्यति तन्नैतत्कर्तुं युज्यते उक्तं च यो ध्रुवाणि परित्यज्य अध्रुवाणि निषे...
ध्रुवाणि तस्य नश्यंति अध्रुवं नष्टमेव च १ साब्रवीत् भो कापुरुषस्त्वं यत्किंचिदाप्तं तेनैव संतोषं करोषि उक्तं
सुपूरा वै कुनदीका सुपूरो मूषकांजलिः सुसंतुष्टः कापुरुषः स्वल्पकेनापि तुष्यते २ तत्सुपुरुषेण दैवोत्साहवता
विशेषार्थिना भाव्यं उक्तं च यत्रोत्साहसमारंभो यत्रालस्यविनिग्रहः नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवं
१ तथा च दैवमिति संचिंत्य त्यजेन्नोद्योगमात्मनः नोद्योगेन विना तैलं तिलेभ्य उपजायते २ अन्यच्च यः स्तोकेना
पि संतोषं कुरुते मंदधीर्जनः तस्य भाग्यविहीनस्य दत्ता श्रीरपि मार्ज्यते ३ यत्त्वं वदसि एतौ पतिष्यतो न वा
तदप्ययुक्तं उक्तं च कृतनिश्चयिनो वंद्यास्तुंगिमानोपियुज्यते चातकः को वराकोयं यस्येंद्रो वारिवाहकः अपर
मस्य मूषकमांसस्य निर्विण्णाहं मांसपिंडौ पतनप्रायौ दृश्येते तत्सर्वथा नान्यत्कर्तुमर्हसि तदाकर्ण्य मूषके
५ स्थानं परित्यज्य तया सह वृषणस्य पृष्ठे गच्छन् अथवा साध्विदमुच्यते तावत्सर्वेषु पुरुषः स्वयं प्रभुः स्त्री
वाक्यांकुशक्षुण्णो यावन्नो ध्रियते बलात् १ अकृत्यं मन्यते कृत्यमगम्यं मन्यते सुगं अभक्ष्यं मन्यते भक्ष्यं स्त्रीणां वा... १५
प्रियो नरः २ एवं स तस्य पृष्ठे सभार्यः परिभ्रमंश्चिरकालमनयत् न च पतनमभूत् तयोः स ततश्च निर्वेदात्पंचदशव
र्षे सभार्यमाह शिथिलाश्च सुबद्धाश्च पतंति न पतंति च निरीक्षिता मया ह्येते दश वर्षाणि पंच च १ यत्पश्चाद्दा
पि ते पां पतनं नास्ति तन्मे व मूषकमार्गं गच्छावः अतोहं ब्रवीमि शिथिलाश्च सुबद्धाश्चेति कथा ५॥ तदितिमत्वा

एवं अयं इति चिंतनीयं किं बहुना प्रजल्पितेन इत्युक्त्वा विधाता तथैव कृतवान् अतोहं ब्रवीमि अर्थस्योपार्जनं कृत्वा इ
ति कथा ६ तदहं हिरण्यक एवं ज्ञात्वा धनविषये त्वयापि संतापो न कर्तव्यः उक्तं च गृहे मध्यविधातेन धनेन धनिनो
यदि भवामः किं वत तेनैव धनेन धनिनो वयं २ तथा च उपार्जितानामर्थानां त्याग एव हि रक्षणं तडागोदरसंस्थानां
परिवाह इवांभसां ३ अन्यच्च दानं भोगो नाशस्तिस्रो गतयो भवंति वित्तस्य यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भ
वति ४ एवं ज्ञात्वा विवेकिना स्थित्यर्थमर्थोपार्जनं कर्तव्यमिति यतोऽहंकारायतनं उक्तं च संतोषामृततृप्तानां य
त्सुखं शांतचेतसां कुतस्तद्धनलुब्धानामितश्चेतश्च धावतां ५ पिबतेनापि संतोषं नायं तोषवतां पुनः निरोधादिते
ला क्षाणि निरुद्धान्यखिलान्यपि ६ आच्छादितेर्वी मध्ये राज्ञि नास्युर्गतस्तयः वांछाविच्छेदजां प्राज्ञः स्वास्थ्यं शांतं म...
यः ७ वांछानिवर्तनं चार्थः पिपासा चाग्निसेवनैः अनिंद्यमपि निंदंति स्तुवंत्यस्तुत्यमुच्चकैः ८ स्वापते ध्यायते म
र्त्यः किं नाम न च कुर्वते धर्मार्थं यस्य वित्तेहा तस्यापि न इहा वरा ९ प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं १०
दानेन तुल्यो विधिरस्ति नान्यो लोभोस्ति नान्यः परतः पृथिव्याः विभूषणं शीलसमं न चान्यत् संतोषतुल्यं धनमस्ति ना
न्यत् ११ दारिद्र्यस्य परा मूर्तिर्यन्मानद्रविणाल्पता जगत्पतिधनः सर्वस्तथापि परमेश्वरः एवं ज्ञात्वा भद्र त्वया संतोषः का
र्य इति मंथरवचनमाकर्ण्य वायस आह भद्र हिरण्यक एवं वदति मंथरकं विना नान्यः अथवा साध्विदमुच्यते
सुलभाः पुरुषा लोके सततं प्रियवादिनः अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः १ अन्यच्च अप्रियाण्यपि हि
पथ्यानि ये वदंति नृणामिह त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः २ अथैवं तेषां प्रजल्पमानानां चित्रांगो...
शं म हिरण्यलुब्धकत्रासितस्तस्मिन्सरसि प्रविष्टः चित्रांगमायांतं कंपयातरनिकटे एव वर्तते सुवीक्षितस्तमव...
म पाश्चात्तं केवलं तावल्लघुपतनकेनोक्तं भो मंथरक चित्रांगोयं तृषार्तोत्र सरसि उपागतः तस्य वाष्टोयं न मा...

षइति तच्छ्रुत्वा मंथरको देशकालविज्ञ आह भो लघुपतनक यथा मृगो दृश्यते तथा लुब्धकोपि न विद्यते
तस्मात्तज्ज्ञायतां अस्य पृष्ठे लुब्धकागमनं उक्तं च भयत्रस्तो नरः श्वासं। प्रभूतं कुरुते यदि दिशो विलोक
य न स्वास्थ्यं व्रजते क्वचित् १ तच्छ्रुत्वा चित्रांगः प्राह भो मंथरक ज्ञातं त्वया मम त्रासकारणं अहं लुब्धकश
राहार्द्दरितः कृच्छ्रेण समायातः मम यूथं पुनस्तैरेव लुब्धकैर्व्यापादितं भविष्यति तच्छरणागतस्य किंचिद्द
र्शयमे दुर्गस्थानं दुष्टलुब्धकानामनयेन तच्छ्रुत्वा मंथरक आह भो चित्रांग श्रूयतां। नीतिसर्वस्वं द्वावुपायाविह प्रो
क्तौ विमुक्तौ शत्रुदर्शने हस्तसंचलनादेको द्वितीयः पादवेगजः १ तद्गम्यतां शीघ्रं वनं यावदद्यापि नागच्छं
ति दुरात्मानो लुब्धकाः एतस्मिन्नंतरे लघुपतनकः सत्वरमभ्येत्य प्रोवाच हंहो मंथरक स्तं मृगमाहमद्य
यतामवगाह्य तांच प्रधानमुदकं शीतलं च तद्वचनमाकर्ण्य चित्रांगश्चिंतयामास। न ममैतेभ्यः प्रकाशात्किं
चित्स्वल्पमपि भयमस्ति कस्मात् कच्छपस्तावदुदकगत एव बलवान् मूषकः वायसः। अपि मृतं एव ब्रुयते
तदेतानुसरामीति मत्वा तैः सहसंगतः मंथरकेण तत्स्मरताभ्युपचारपुरःसरमभिहितश्चित्रांगः अयि भिवायस
वतः कथ्यतामस्माकं कथमिदं वनगहनमागतोसीति अथासौ ब्रवीत निर्वेदोस्म्यनेन कामविहारित्वेन अ
वारैः सारमेयैः लुब्धकैः इतस्ततश्च संनिरुध्यमानो भयात्महताजवेनातिक्रम्य सर्वानागतोत्राहमुदकार्थी तावि
५ च्छामि भवद्भिः सार्द्धं मैत्री कर्त्तुमुचितं वरं नरकवासोपि विवेकिभिः सहितो मम न नीचजनसंसर्गः सुरेंद्रभवनेष्व १६
पि १ अल्पकायोऽनल्पकाय इति किमनेनात्मनिंदापूर्वकेण निहितेन अथवायुक्तं सत्पुरुषाणामीदृशं वचनं
वक्तुं तदद्यप्रभृति भवद्भिर्मया सह सख्यं कर्तव्यमेवं वाश्रूयते कर्तव्यान्येव मित्राणि सबलान्यपि बलानि च हस्ति
यूथं वने बद्धं मूषकैर्यद्विमोचितं २ मंथरकः पृच्छति कथमेतत् चित्रांगः कथयति अस्ति कस्मिंश्चिज्जनपदे ग्रा

मे देवतायतनोपभूमिदेशस्तत्र पूर्वे विवरेषु मूषकाः संजातपुत्रपौत्रप्रपौत्रादिभिर्विवरभूतागाश्चित्रवप्रतयो विशमप्रवेश
परंपराया वासं चक्रिरे एवं च तेषां विहारस्वाद्यपानादि परमसौख्यमनुभवतां कालो निवर्तते अत्रांतरे गजपतिः।
गजपतिसहस्रपरिवृतः पूर्वोपलब्धसरःप्रसिद्धयूथेन सहोदकग्रहणार्थं गंतुमारब्धवान् अथ गच्छता तेन महागजप
तिना मूषकाः वप्रस्थानां मध्येन यत्कालोपपन्नाः प्रपिष्टाः कृता त्रशिरोग्रीवाः कृताशेषभूताश्च प्रसिद्धाः संचक्रिरे भणं
पादिता वयमेभिर्दुष्टगजैर्गच्छद्भिर्यदि पुनः स्वयमेवागमिष्यंति ततो बीजशेषा अपि न भविष्यामः स्पृशन्नपि तो
हंति जिघ्रन्नपि भुजंगमः सहसन्नपि नृपो हंति मानयन्नपि दुर्जन १ तदत्रांतरोपायश्चिंत्यतां अथ विचिंत्योपायं
तिप्रपन्नाः तावत्सरो गजपतिं प्रविनयमब्रुवन् देव इतो नातिदूरे पारंपर्यक्रमायातोऽस्माकमावासः तत्र
पुत्रपौत्रपरंपराया वृद्धिमुपागताः तत्र चक्रिरे हो दकग्रहणार्थमागच्छद्भिः सहस्रशो विनाशिता वयं यदि पुनस्तै
व पथा यास्यथ ततो बीजावशेषा अपि न भविष्यामः तद्यथास्माकमुपरि कृपास्ति ततोन्येन पथा गच्छतेति तत्का
श्च वयमेवास्माभिरेवं विधेरपि कदाचित्किंचित्प्रयोजनं भविष्यति तच्छ्रुत्वा यूथाधिपतिः स्वचित्ते वधार्यं यथो
क्तं इति मूषकास्तथैव नान्यथेति समत्वा तथेति प्रतिपन्नं अथ गजागमनं श्रुत्वा तत्रातपदाधीशेन गजबंधनाय प्र
श्विष्ठायते स्म यूथाधिपतिर्विश्वस्य दिनत्रयानंतरं महत्या राज्यादियंत्रणया ततः समाकृष्य तस्मिन्नेव वने स्थू
लस्कंधरेषु बद्धाः सर्वे गजास्तेषु बंधकृच्छ्रेष्वाविष्टा एवायं चिंतयति केन प्रकारेण कस्य वा अस्य प्रकाशात् मे बंधमोक्षो भवि
ष्यतीति स्मृत्वा तान्मूषकान्विहाय नान्यो अस्माकं मोक्षोपायः ततो गजबंधनभूमिवर्तिः स्थितया पूर्वोपलब्धमूषक
सथ्या निजपरिवारहस्तिन्या मूषकेभ्यो यथादृष्टं निजबंधनव्यसनं यूथपतेराख्यातवान् तच्छ्रुत्वा स्वसुपका
णार्थं सहस्रशो मिलित्वा तद्यूथपतिसकाशं गताः दृष्ट्वा च तं यूथपतिं बद्धं यथास्थानं पाशं छित्त्वा दक्कस्के

मांसलस्कंधबद्धस्त्वं स्वं मर्दयित्वा बंधनान्मोचितवंतः अतोहं ब्रवीमि कर्त्तव्यान्येव मित्राणि कथा...
श्रुत्वा मंथरकेनाभिहितं भद्र न च त्वेवमाकार्षीः स्वदेशमेवेदं भवानन्यदागमनीयं यथेष्टमत्रोष्यतां ततस्तेषां स्वे-
च्छाहाराविहाराणां मध्याह्नसमीपविपुलह्रदसमीपे बकुलतरुच्छायाधस्तात् कृतसमागमानां विवि-
धर्म्मार्थादिशास्त्रविचारेण परस्परं प्रीतिपूर्वकं कालोतिवर्त्तते युक्तंचैतत् काव्यशास्त्रविनोदेन कालो गच्छति धी-
मतां व्यसनेन तु मूर्खाणां निद्रया कलहेन च १ किंच सुभाषितरसास्वाद बद्धरोमांचकंचुकाः विनापि संगमं स्त्री-
णां सुधियः सुखमेधते २ तथाच सुभाषितमयैर्द्रव्यैः संग्रहं न करोति यः स तु प्रस्तावयज्ञेषु कां प्रदास्यति दक्षि-
णां ३ अन्यतः कृतं न गृह्णाति स्वयं दानं करोति यः यस्य संपुटिका नास्ति कुतस्तस्य सुभाषितम् ४ अथैकस्मि-
न्गोष्ठीसमये चित्रांगो न समायातः ततस्ते व्याकुलीभूताः परस्परं जल्पितुमारब्धाः अहो किमद्य सुहृन्न समायातः
किं सिंहादिभिः क्वचिद्व्यापादितः अथ लुब्धकैरनले प्रतिपातितो वा गर्त्तादिविषये नवतृणकांतारमध्यस्थो वा।
अथ मंथरको वायसं प्राह भो लघुपतनक अहं हिरण्यकश्च द्वावपि तस्यान्वेषणं कर्त्तुमशक्तौ मंदगती भवान् ग-
त्वारण्यं शोधय यदि चित्रांगो जीवंतं पश्यसि तच्छ्रुत्वा लघुपतनकेनातिदूरं यावत्सरसो गच्छति तावत्पल्वलतीरे
चित्रांगः कूटपाशनिपतितस्तिष्ठति तं दृष्ट्वा शोकव्याकुलमनास्तमेवोवाच भद्र किमिदं दुःखं प्राप्तोसि चित्रांगोपि
वायसमालोक्य विशेषाद्दुःखितमना बभूव अथवा युक्तमेतत् अपि मंदत्वमापन्नो नष्टो वापीष्टदर्शनात् प्राये- २३
ण प्राणिनां भूयोपि सुखवेगाधिको भवेत् १ ततश्च वाष्पावसाने लघुपतनकं प्राह भो मित्र संजातोयं मृत्युस्तद्युक्तं संजातं
यद्भवता सह मे दर्शनमभूत् उक्तंच प्राणत्यागे समुत्पन्ने यस्य स्यान्मित्रदर्शनं तद्द्वाभ्यां सुखं पश्चात् जीवतोपि
मृतस्य वा १ तत्क्षंतव्यं भवता यत्किंचिन्मया प्रणयकुपितेन सुभाषितादिगोष्ठीष्वभिहितं तथा हिरण्यकमंथरकौ

मद्वाक्याद्वाच्यौ अज्ञानाज्ज्ञानतो वापि दुरुक्तं यदुदाहृतं मया तत्क्षम्यतां तच्छ्रुत्वा लघुपतनकस्तमाह भद्र न भेतव्यमस्म-
द्विधैर्विद्यमानैर्मित्रैः तदहं हिरण्यकं गृहीत्वा त्वत्पाशच्छेदनाय द्रुततरमागंतुमिच्छामि अपरंच सत्पुरुषा न वंचिते
व्यसनेन समुपयांतीति उक्तंच संपदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वं तं भुवनत्रयतिलकं जनयति
जननी सुतं विरलं १ एवमुक्त्वा खिन्नहृदयो मंथरकहिरण्यकौ प्रति गत्वा चित्रांगबंधनवार्त्तां निवेद्य चैकाग्रमूष-
कमादाय भूयोपि मृगं प्रति सत्वरमाजगाम सोपि मूषकमवलोक्य जीवनाशस्य किंचित्संश्लिष्टः सविषादमाह
लोकैश्चेदमुच्यते आपन्नाशाय विबुधैः कर्त्तव्याः सुहृदो जनैः न तरत्यापदं कश्चिद्योयं मित्रविवर्जितः १ हिरण्य-
क आह त्वं नीतिशास्त्रज्ञो दक्षमतिस्तत्कथमत्र कूटपतितः कथं स आह भो न कालोयं विवादस्य तन्न यावत्स पापात्मा लु-
ब्धकः समभ्येति तावद्द्रुततरं कर्त्तयेदं मम पादकूटपाशं अथ तच्छ्रुत्वा विहस्य हिरण्यकः प्राह भद्र किं मय्यपि समा-
याते लुब्धकाद्बिभेषि तच्छास्त्रं प्रति मे महती विरक्तिः संजाता यद्भवद्विधा अपि नीतिशास्त्रविद एतां दशां प्राप्नु-
वंति तेन त्वां पृच्छामि स आह कर्म्मबुद्धिरपि हन्यते उक्तंच कृतांतपाशबद्धानां दैवोपहतचेतसाम् बुद्धयः कु-
ब्जगामिन्यो भवंति महतामपि २ तथाच विधात्रा रचिता या सा ललाटे अक्षरमालिका न तां मार्जयितुं शक्तः स्वबुद्ध्या
पंडितः ३ यद्यवश्यं त्वया श्रोतव्यं तदाकर्णय यथाहं पूर्वमनुभूतं व्यसनोपि दैववशात्पुनर्बद्ध सोब्रवीत् कथमेत-
त्सर्वं व्यसनं भवता तत्सर्वं विस्तरतः श्रोतुमिच्छामि चित्रांगोब्रवीत् पूर्वमहं षण्मासजातस्त्रिशृंगा वासं सर्वे ग्राममध्ये
विचरामि लीलया अहं रंगत्वा यूथं प्रतिपालयामि अस्माकं च वेगगति ऊर्ध्वजयाय ततो न्यहं मंजयान्वेषिते वो
कदाचिद्विचरन्मृगगणान्न पश्यामि तावत्पुनरामुद्विग्नहृदयः क्व ते गताः इति दिशो विलोकयन्नग्रतः स्थितान् प-
तद्दिग्वर्गत्याजालमतिक्रम्य सर्वे पुरतः स्थित्वा मामवप्रतीक्षमाणास्तिष्ठंति अथो वर्गते रतनीजनतयाहं ...

पाशेन बद्धो यावत्स्वयूथांतिकमुपसर्पितुमना जालमाकर्षामि तद्व्याधेन प्राप्तो सर्वतो नद्धः ततः शि[illegible]
तितः गतं च तन्मृगयूथं अथ व्याधेनागत्य शिशुरहं मृत्युनानं संयोजितः विशेषतश्च गृहं नीत्वा राजपुत्रस्य [illegible]
मार्थं दत्तः स राजपुत्रो मां दृष्ट्वा परितुष्टो व्याधस्य पारितोषिकं ददौ सं चाङ्गोद्वर्तनस्नानभोजनगंधविलेपनाल-
ङ्कारैरन्यैरपि समुचितमतो रमाहारैरतर्पयत् सोहमंतःपुरिकजनस्य कुमाराणां च कौतुकपराणां हस्ताद्ध-
स्तं गच्छन् ग्रीवानयनकरचरणकर्णकर्षणैर्दिनानि परिक्लेशितः अथ कदाचिद्राजपुत्रस्य शयनीयाधस्थेन स[illegible]
ट्कालसमये स विधुरं मेघस्तनितं श्रुत्वोत्कंठितहृदयेन मया स्वयूथमनुस्मृत्येदमुक्तं यथा वातविधूतस्य मृग-
यूथस्य पश्चतः पृष्ठतोनुगमिष्यामि कदेति तन्मे न विष्यति १ अथासौ राजपुत्रः केनेदमभिहितमिति संत्रस्तहृदयः
समंतादवलोकयन्मामपश्यत् दृष्ट्वा च मानुषेणेदमभिहितं किं तु मृगेणैतदोत्पादिकं मन्यमानः सर्वथा विनिष्टोस्मि १
इति त्रस्तहृदयो गृहं गृहीत इव कथमपि प्रस्खलितवान् सा राजपुत्रो गृहाद्बहिर्निष्क्रांतो भूताधिष्ठितमात्मानं ज्ञात्वा
मांत्रिकतांत्रिकचिकित्सां करोति अहमपि तत्रासमिच्छकारिणा जनेन लकुटप्रहारैराहन्यमानः किमनेन पशुना
व्यापादितेनापि दैवारिकेन साधुना रक्षितः तेन च समधिकारोपलक्षेन विज्ञप्तो राजपुत्रो यथा मृगजातेन प्रावृट्का[illegible]
ये सुकेन यूथमनुस्मरताभिहितं यथा वातविधूतस्येति ननु वतः किमसंबद्धज्वरकारणं तच्छ्रुत्वा राजपुत्रो अपगत
ज्वरविकारः सर्वश्रुतिमापन्नः स्वपुरुषानिदमाह यथा मृगोऽभ्यूतजले परिषिन्नीत्वात्तस्मिन्नेव वने त्यक्त्वा प्रतिमु- २८
च्यतां तैश्च तथैवानुष्ठितं एवमनुभूतदुःखोपि हं पुनर्नियतिवशाद्बान्धितः एवं तयोर्विवदतोः सुकुर्व्यसनसंत्रस्तहृद-
ययोः मंथरकः शनैःशनैः स्तांदिशमाजगामः तं चागतं ज्ञात्वा सुतरामुद्विग्नहृदयाः संजाताः तं दृष्ट्वा लघुपतनक आ-
ह अहो समनमशोभनमापतितं हिरण्यकः आह किं तु पुष्कोपि समायाति स आह आस्तां तावत्पुष्कवार्ता ए-

ष मंथरकः समागच्छति तदनीतिरनुष्ठिता तेन वयमपि व्यापादनीयतां याम्यामोऽस्मात्कारणात्पश्यतो यदि पापात्मा लु-
ब्धकः समागमिष्यतीति तदहं तावत्समुत्पतिष्यामि पुनस्त्वं बिलं प्रविश्यात्मानं रक्षयिष्यसि चित्रांगो वेगेन दिगंतरं यास्य-
ति पुनरयं च जलचरः स्थले कथं गमिष्यतीति व्याकुलोस्मि एतस्मिन्नंतरे प्राप्ते मंथरके हिरण्यक आह न
ष्ठुनयुक्तं भवतानुष्ठितं यदत्र समायातो तद्भूयोपि तु तं गम्यतां यावदसौ लुब्धको न समायाति मंथरक आह
भद्र किं करोमि तत्रस्थोपि मित्रव्यसनाद्दपि मनसो दग्धः परिणामः अपि च वरं प्राणपरित्यागो न वियोगो न
वाद्दृशैः प्राणाजन्मांतरे भूयो भवंति न वाद्दृशाः १ एवं तस्य प्रवदतः पूरितशरो लुब्धकोप्याजगाम तं दृष्ट्वा मूष-
केनाशु स्नायुमयः पाशोस्य खंडितः एतस्मिन्नंतरे चित्रांगः सत्वरं प्रधावितुमारब्धः लघुपतनको वृक्षमारूढ-
ः हिरण्यः समीपवर्त्तिनं बिलं प्रविष्टः अथासौ लुब्धको मृगगमनाद्विषण्णमना व्यर्थश्रमः मंथरकं दृष्टवान् किं-
चितवान् यद्यपि कुरंगो मे धात्रापहृतः तथाप्ययं आहारोपादितः तदस्यामिषेण कुटुंबस्याहारनिर्वृत्तिर्भवि-
ष्यति उक्तं च व्रतंततोतरिक्तं चैगच्छेन्नोपि महीतले धावतः पृथवी सर्वानादत्समुपतिष्ठति १ एवं संचिंतयित्वा
दर्भैः परिच्छाद्य तं धनुषी समालंब्य स्कंधे कृत्वा गृहं प्रस्थितः एतस्मिन्नंतरे नीयमानं तमवलोक्य हिरण्यको दुःखाकु-
लः पर्यवदत् कष्टं भोः कष्टं एतस्य दुःखस्य न यावदंतं गच्छाम्यहं पारमिवार्णवस्य तावद्द्वितीयं समुपस्थितं मे छि-
द्रेष्वनर्था बहुलीभवंति १ यदि तावत्कृतांतेन धननाशो मम मोपरिव्ययनं स्वरवारेर्वर्षति धावता आदौ तावद्वि-
त्तनाशः ततः परिवारभ्रंशः अतो देशत्यागः ततो मित्रवियोग इति अथवा स्वरूपमेतत् सर्वेषामपि जंतूनां जी-
वितधर्मस्य यतः कायः संनिहितापायः संपदः क्षणभंगुराः समागमाः सापगमाः सर्वेषामेव देहिनां १ त-

क्षते प्रहारा निपतंति नित्यं धनक्षये वर्द्धति जाठराग्निः आपत्सु रोगाणि समुद्भवंति छिद्रेष्वनर्था बहुलीभवंति
२ अहो साधु केनापि शोभनं येन परित्राणं प्रीतिविश्रंभभाजनं केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयं २ एतस्मि
न्नंतरे आक्रंदनपरौ चित्रांगलघुपतनकौ समागतौ अथ हिरण्यक आह अहो वृथा प्रलपितेन तद्यावदेष
मंथरको दृष्टिगोचरान्न नीयते तावदस्य मोक्षोपायश्चिंत्यतां उक्तंच व्यसनं प्राप्य यो मोहात्केवलं परि
वेदयेत् तद्व्यसनं वर्द्धयत्येव तस्यांतं नाधिगच्छति २ केवलं व्यसनस्योक्तं भेषजं पंडितैर्जनैः तस्योच्छेदसमारंभो वि
षादपरिवर्जनं १ अन्यच्च अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च संगमार्थं आपत्प्रपन्नस्य च मोक्षणार्थं
यन्मंत्र्यतेसौ परमो हि मंत्रः १ तच्छ्रुत्वा वायस आह यद्येवं क्रियतां मद्वचः एष चित्रांगोऽस्य मार्गे गत्वा किंचि
ज्जलं प्राप्य तस्य तीरे निश्चेतनो भूत्वा पततु अहमस्य शिरसि स्थित्वा मंदं मंदं चंचुप्रहारैः शिर उल्लेखयामि
येनास्य लुब्धको मृतममुं मत्वा मच्चंचुप्रहारप्रत्ययेन मंथरकं भूमौ क्षिप्त्वा मृगार्थं परिधाविष्यति एतस्मिन्नं
तरे त्वया दर्भमया निपाशा निःखंडनीयानि येनासौ मंथरको द्रुततरं पल्वलं प्रविशति चित्रांग आह भद्रोयं
त्वया दृष्टो मंत्रो नूनमुक्तोयं मंथरकस्तिष्ठति उक्तंच सिद्धिं वा यदि वासिद्धिं मनोत्साहो निवेदयेत् प्रथमस्फु
रणं प्राज्ञो वेत्ति न चेतरः १ तदेवं क्रियतां तथानुष्ठिते तथैव मृगः पल्वलतीरस्थं चित्रांगं वायसेनाधिष्ठि
तं ददर्श दृष्ट्वा हर्षितमना व्यचिंतयत् पाशवेदनया वराकोयं मृगः स्वल्पावशेषजीवितो नूनं पाशांतो मया
नीतः स्वेन पाशेन यथापि मृतः तथाप्ययमेकच्छपः सुयंत्रितः अतः तदेनमपि तावत्पश्यामीत्यवधार्य कच्छपं भू
तले परिक्षिप्य मृगमुपाद्रवत् एतस्मिन्नंतरे हिरण्येन वज्रोपमदंष्ट्राप्रहारेण तद्दर्भवेष्टनं तत्क्षणात् खंडशः कृतं

MEMORIAL

मंथरकोपि तृणमध्यान्निःक्रम्य समीपवर्त्तिनं पल्वलं प्रविष्टः चित्रांगोप्यप्राप्त एव तस्योत्थाय वायसेन सह पलायितः
एतस्मिन्नंतरे विलक्षो विषादपरो लुब्धको निवृत्तो यावत्पश्यति मार्गश्रांतेन विश्रामस्तत्किं चित्रांगोपकृतः तत्पुनरमीषां म
ध्ये मित्रं मंथरकं समं यतः असुरैश्च विना जातो गुह्यस्य कथनं तथा आपद्विमोक्षणं चैव मित्रतायाः फलत्रयं
१ यावत्किंचित् ब्रूयते तावत्कच्छपो गतः ततश्च तत्रोपविश्य श्लोकमपठत् प्राप्तो बंधनमप्ययं वनमृगस्तावत्
त्वया मे हृतः संप्राप्तः कमठः प्रवाहिनियतं नष्टस्तवादेशतः क्षुत्क्षामोत्र वने भ्रमामि शिशुकैस्त्यक्तः समं भा
र्यया यच्चान्यन्न कृतं कृतांत कुरु मे तत्रापि सज्जोस्म्यहं १ अथ तस्मिन्नदृष्टतरं गते सर्वेपि काककूर्ममृगमूषकाः
परमानंदभाजः परस्परमालिंग्य पुनर्जातमिवात्मानं मन्यमानास्तदेव सरः प्राप्य महासुखेन सुभाषितकथा
गोष्ठीविनोदेन कालं नयंति स्म एवं ज्ञात्वा विवेकिना मित्रसंग्रहः कार्यः न हि मित्रेण सद्व्याजेन वर्त्तितव्यं
उक्तंच यो मित्राणि करोत्यत्र न कौटिल्येन वर्त्तते सः पराभूतिमाप्नोति कांचन तेन कदाचन २ इति कथा।
इति श्री विष्णुशर्मकृते नीतिशास्त्रे पंचोपाख्याने नाम्नि ग्रंथे मित्रलाभो नाम प्रथमं तंत्रं संपूर्णं॥ ॥छ॥ अथे
दमारभ्यते सुहृद्भेदो नाम द्वितीय तंत्रं॥ ॥अथ राजपुत्रा ऊचुः आर्य मित्रलाभस्तावदस्माभिः श्रुतः सुहृ
द्भेदं शृणुमः विष्णुशर्मोवाच सुहृद्भेदं शृणुत यस्यायमाद्यः श्लोकः वर्द्धमानो महास्नेहो मृगेंद्रवृषयोर्वने
पिशुनेनातिलुब्धेन जंबुकेन निपातितः १ राजपुत्रा ऊचुः कथमेतत् विष्णुशर्मा कथयति अस्ति दक्षिणापथे
सुवर्णपुरी नाम नगरी तत्र वर्द्धमाननामा श्रेष्ठी प्रतिवसति स्म यस्य गृहे वित्तस्यापारो नास्ति एकदासौ रात्रौ
सुप्तः सन् विचारमकरोत् यन्मम द्रव्यमपारमस्ति तथापि कश्चिदुपायः कर्त्तव्यः येन क्षयं न गच्छति परं पुरुषे

MEMORIAL

र्थमिहानुपार्जनीयः उपार्जितश्चमहद्यत्नेन रक्षणीयः सत्यवसरे सुपात्रे दातव्यः परमेश्वरप्रीत्यर्थं उक्तंच उ
पार्जितानामर्थानां त्याग एव हि रक्षणं तडागोदरसंस्थानां परिवाह इवांभसां १ अन्यच्च रत्नाकरः किं कु
रुते हि रत्नै र्विंध्याचलः किं करिभिः करोति श्रीखंडखंडैर्मलयाचलः किं परोपकाराय सतां विभूतयः २
स्वयमपि यथासुखं भोक्तव्यं धनं नो चेन्नाशं गच्छेत् उक्तंच दातव्यं भोक्तव्यं सति विभवे संग्रहो न कर्तव्यः
पश्येह मधुकरीणां संचितमर्थं हरंत्यन्ये ३ अन्यच्च दानं भोगो नाशस्तिस्रो गतयो भवंति वित्तस्य यो न ददाति न भुं
क्ते तस्य तृतीया गतिर्भवति ४ कथा अर्थैरर्था निबध्यंते गजैरिव महागजाः न शक्यमर्थहीनेन वाणिज्यं क
र्तुमीहया ५ निर्द्रव्यपुरुषं सदैव विकलं सर्वं सदा दारं मित्रं चापि विनापराधकुपितं दृष्ट्वा न संभाषते तस्मान्नं स
त्कृतेन कोपि कुरुते कश्चिन्न संभाषणं प्रायो निर्धनतां वदंति मुनयो कष्टं महापातकं ६ अतो दातव्यं भोक्त
व्यं नो चेद्दोषः यथा दैववशादुत्पन्ने सति विभवे नास्ति भोगश्च न च परलोकस्य मीहा न च ति धनपालको मूर्खः ७
अतो देयं भोग्यं वर्द्धनीयंच सततं उक्तंच धनान्यर्जयस्व १ धनेनाकुलीनाः कुलीना भवंति धनेनैव पापं नरा निस्त
रंति धनाढ्यो वरिष्ठो नरो लोकमध्ये ८ तच्च व्यापारे वसते लक्ष्मीः किंचित्किंचिच्च कर्षणे अस्ति नास्ति च सेवायां २०
भिक्षायां नैव नैव च ९ अतो व्यापारः कर्तव्यः स च सप्तविधः व्याजं १ धान्यसंग्रहः २ धातुविक्रयः ३ वस्त्रविक्रयः
४ रसविक्रयः ५ गांधिकं ६ देशांतरागमनं ७ चेति तत्र प्रधानामुत्तमं सर्वपण्यानां गांधिकं पण्यमुच्यते या
त्रैकेन क्रयक्रीतं शतेकेन प्रदीयते १० इति विविधं विचार्य वर्द्धमाननामा श्रेष्ठी व्यापारोत्सुकोभवत् अथ
स मृगमदादीनि सुगंधद्रव्याणि गृहीत्वा सर्वोत्कृष्टानि भंडादीनि च शाकटे आरोप्य स्वयं रथमारुह्य सर्व

शुभमहाजनेषु प्रस्थापयत्सु वाद्यमानेषु तूर्येषु नवसु बद्धघोषेषु सत्स्वेषु वर्द्धमानो मथुरां प्रति प्रस्थितः यावन्मार्गे
गच्छति तावत्कर्करमनेकवृक्षाकुलितानेकव्याघ्रसिंहसमन्वितं वनमपश्यत् तत्र गच्छन् सन् महान्गर्तेन तन्
नपादस्य वाहनपतितः एकः संजीवकः द्वितीयो नंदकः तन्मध्ये संजीवकः पपात तन्निपतितं दृष्ट्वा भृत्यास्तंच
र्द्धमानं निवेदयामासुः भोः स्वामिन् संजीवको गर्तेन भग्नपादः पतितोस्ति तच्छ्रुत्वा श्रेष्ठी वद्धरः खिन्नीभूतः स नरांश्चक्रे
त्वान्ना कार्यकथितं यूयमत्र संजीवकत्राणार्थं तिष्ठत यदा जीवेन स्वस्थो भवति तदा एनं गृहीत्वा समागमिष्यथ यद
यं पंचत्वं प्राप्नोति तदेनं भूमौ संस्कारं कृत्वागंतव्यं इत्थं निवेदयित्वा वर्द्धमाननामा श्रेष्ठी गमनोपक्रमे दिवसौ
द्वावतिक्रांतौ तैर्नरैस्तैर्व्याघ्रसिंहयोर्भयात्तस्मात्वनान्मार्गो गृहीतः वर्द्धमाननामानं निवेदयामासुः स्वामिन् संजी
वकः पंचत्वं गतः वयमधुना संस्कारं कृत्वा भवतां पार्श्वे आयाताः तैरनृतभाषणं कृतं तच्छ्रुत्वा वर्द्धमानोतिदुःखं
प्राप कथयति यद्विषममार्गे संजीवकसदृशो धुरंधरो नान्यः कोप्यस्ति परं किं करोमि विधात्रा मृत्युर्भद्रत्वेकृष्टः
जितं परमीश्वरेच्छया सर्वं भवति उक्तं अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति जीवत्यनाथो
पि वने विसर्जितः कृतप्रयत्नोपि गृहे न जीवति १ एवं चिंतयित्वा तन्नाम्ना ब्राह्मणान् दानं दत्वातिमहोत्सवं कृत्वा।
प्रतिवर्जितः श्रेष्ठी रविघ्नेन ग्रामं प्राप ततोनंतरं संजीविको नामवृषभः आयुर्बलेन पंचसप्तदिवसैः स्वस्थयित्वा यमु
नातीरं गतः तत्र हरितृणान्यदन् सन् पुष्टो जातः महादेवस्य वृषभ इव बभूव गाढं शब्दमकरोत् तद्वनाधिपो पिंग
को नाम सिंहो जलपानाय यमुनातीरं गतः तत्र वारिपानं कृत्वा यावत्तिष्ठति तावत्संजीवकशब्दं श्रुत्वा वतं श्रुत
महद्भयं प्राप यन्ममात्र वने कोयं द्वितीयो बलवान् ततोतीवभयात् त्रस्तः सन् प्रधानपरिवारेण सह वटवृक्ष
माश्रितवान् तस्य द्वौ श्रृगालौ करटदमनकनामानौ स्तः तौ राज्ञा पूर्वं कोपाविष्टेन राज्यस्य कार्यान्निःकासितौ।

तथा राज्ञः सेवातत्परौ बभूवः तत्र राजानं व्यग्रचित्तं दृष्ट्वा मंत्रिपुत्रौ विचारतत्परौ बभूवतुः तत्र दमनकः कथयति
रे करटक आवयोः स्वामि महाराज पिंगलको नाम जलपानाय यमुनातीरे गतः सन्भयोद्विग्नस्ते तत्किं ततो करट
को वदति रे दमनक एतद्गोष्टी आवाभ्यां न कार्या अनया शोको भवति तदुक्तं अव्यापारेषु व्यापारं यो नरः कर्तु
मिच्छति स एव निधनं याति कीलोत्पाटीव वानरः १ दमनकः पृच्छति कथमेतत् अस्ति उत्तरस्यां दिशि प्रमदाक
ष्यं नाम धेयं नगरं तत्र शिवराजो नामा श्रेष्ठी अतिधनाढ्यो वसति स्म सोकस्मिंश्चिद्दिने देवगृहमकारयत् तत्रा
सूत्रकाः काष्ठानां संस्कारमहितान् कुर्वंति तावतानंतरमेकस्मिन् दिवसे मध्याह्ने भोजनाय नगरं प्रतिगताः तावत्समये
तत्र वने वानराणां यूथाधिपः स्वयूथेन सह क्रीडार्थमागतोस्ति तत्र कियंतो वृक्षोपरि क्रीडां कुर्वंति कियंतो प्रासादोपरि
कियंतो तन्मध्ये एकेन तत्रार्धकृतविकाशमेकं काष्ठं सकीलं यूथाधिपो दृष्टवान् तत्काष्ठं दृष्ट्वा तन्मध्ये चारोहणं कृ
त्वा स्थितः सन्नचिंतयति अयं कीलः केनात्र कारणेन वर्तते तन्निष्काशयामि एवं चिंतयित्वा कीलोत्पाटनं यावद
करोत्तावत्तस्य वृषणौ निर्बीजौ जातौ ततो तीव्रदुःखेन मृत्युंगतो अतोहं ब्रवीमि अव्यापारेषु व्यापारमिति कथा २ दम
नकः कथयति आवयोः केवलमाहारार्थं राजसेवा न तु लाभार्थं अतो राज्ञः किं सेवाकौशलं दर्शयामि तदुक्तं सु
हृदामुपकारकारणात् द्विषतांचाप्यपकारकारणात् नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलं १ अतो य २१
माश्रित्यानुजीविनोपि निग्रहानुग्रहशक्ताः स एव धन्यः सेव्यः तदुक्तं यस्मिन्जीवति जीवंति बहवः सोत्र जीवतु
वयंसि किं न कुर्वंति चंच्वा स्वोदरपूरणं २ तथा येनात्मनेन गुणवेन च बंधुवर्गे दीने दयां न कुरुते न च भृत्यवर्गे किं
तस्य जीवितफलं हि मनुष्यलोके काकोपि जीवति चिरं च बलिं च भुंक्ते ३ तस्मान्नीचस्योदरपूरणमेव पुरुषार्थः म
हतस्तु महानेवोत्साहः तद्यथोक्तमस्ति स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं श्वा लब्ध्वा परितोषमेति

न च तत्तस्य क्षुधाशांतये सिंहो जंबुकमेकमागतमपि त्यक्त्वा निहंति द्विपं सर्वः कृच्छ्रगतोपि वांछति जनः सत्वानुरूपं फलं ४
अन्यच्च लांगूलचालनमधश्चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च श्वा पिंडदस्य कुरुते गजपुंगवस्तु धीरं वि
लोकयति चाटुशतैश्च भुंक्ते ५ इत्येवं श्रुत्वा करटक आह भोभ्रातः सत्यमेतत् महतां महती चेष्टा कनिष्टस्य क
नियपि अमरैरमृतं पीतं गरलं कालिंतिशीरः ६ अन्यच्च सुपूरा वै कुनदीका सुपूरो मूषकांजलिः सुसंतुष्टः का
२ पुरुषः स्वल्पकेनापि तुष्यति ७ भ्रातः स्वोदरपूरणे पुनः प्रश्नः तदुक्तं अहितहितविचारशून्यबुद्धेः परश्रुतमान
पमानयोः समस्य उदरभरणमात्रमेवलिप्साः पुरुषपशोरिह कोस्ति वा विशेषः ८ एतच्छ्रुत्वा दमनक गुरु
शाकटधुरंधरस्तृणाशी समविषमेषु च लांगलापकर्षः जगदुपकरणं पवित्रयोनिर्नरपशुना किमुतोपमीयते मृगेंद्र
:ये करटक शृणु जातस्य नदीतीरे तस्य तृणस्यापि जन्म सफलं यत्सलिलमज्जनाकुलजनहस्तावलंबनं भवति १०
तथा परवर्तिनि संसारे मृतः को वा न जायते जायांस्तु गण्यते सोत्र यश्च रत्न्यस्त्वया धिकं ११ भ्रातः परोपकारश्रेष्ठः
तदुक्तं स्तिमितोन्नतसंचारा जनसंतापहारिणः जायंते विरला लोके जलदा इव सज्जना १२ भ्रातः पुरुषार्थही
नस्य किं जन्मना किं तेन जातु जातेन मातुर्यौवनहारिणा आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा १३ करटक०
सत्यं तथाप्यावयोः को वा मानयति असमर्थे विकल्पयेयं ततः प्राह दमनकः भोभ्रातः शृणु यावत्स्वशक्तिं शक्तो
पि न दर्शयति कर्हिचित् तावत्सं लंघ्यः सर्वेषां ज्वलनो दारुगो यथा १४ करटक० आवयोः प्रभुतिप्रधान
त्वेन संभावयति च यतः प्रधानेनाप्यदृष्टवान् वक्तव्यं तदुक्तं अपृष्टोऽथः प्रधानोपि ब्रूते राज्ञः पुरः कुधीः न केवल
मसम्मानं लभते च विडंबनं १५ दमनक० सत्यं तथापि अहमपात्रे वचनप्रयोगं न कुर्यां किंतु याद्दक्षे एवः तदु
क्तं राजा नीतौ वचनस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलं स्थैर्यं लभते चात्यंतं रागः शुक्लपटे यथा १६ करटक आ०

सत्यं तथाप्यावयोः प्रधानपदाभावात् किं अर्थपरिचर्यया यो राज्ञः सचिवस्तेनैतद्विधेयं दमन० भ्रातः कथमेवं
ब्रवीषि अप्रधानोपि राजहिताकांक्षी प्रधानस्यादेव। तदुक्तं अप्रधानः प्रधानः स्याद्यदि सेवेत पार्थिवं प्रधानोप्र-
धानः स्याद्यदि सेवाविवर्जितः १७ यथा च कोपप्रसादवस्तुनि ये विचिन्वंति सेवकाः आरोहंति शनैस्तेच धुन्वंतमपि
पार्थिवं १८ अतो भ्रातर्यो हितमुपदिशति समीपे वसति तं समस्तवशेमानयति राजा। तदुक्तं आसन्नमेव नृ-
पतिर्भजते मनुष्यं विद्याविहीनमकुलीनमसंमितं वा प्रायेण भूमिपतयः प्रमदा लताश्च यत्पार्श्वतो भवति तत्परिवे-
ष्टयंति १९ अतो महतां नृपसंश्रय एव विभूतिः यथा विद्यावतां महेच्छानां शिल्पविक्रमशालिनां सेवावृत्तिविदां
चैव नाश्रयः पार्थिवं विना २० तथा च ये जात्यादिमहोत्साहाः नरेंद्रान्नोपयांति हि तेषामामरणं भिक्षा प्रायश्चित्तं
विनिर्मितं २१ करटकः भ्रातः सत्यं ब्रवीषि तथापि राजसेवा सुकष्टा तदुक्तं व्याघ्रालिंगनमग्निबाजतरणं मूर्धा-
शिलातैजनं कुशादेमुखचुंबनं मदजलं मेहिपास्फालनं संदीप्ते च हुताशने निपतनं हालाहलास्वादनं ज्योतिःशास्त्र-
मनेकभेदतरणं तद्बन्धपोषापनं २२ तथा च राजसेवा मनुष्याणां असिधारावलेहनं पंचाननपरिष्वंगो व्यालवदनचुंब-
नं २३ दमनः इदं पद्यहायं कातरविषयं ओजस्विनां तु सुवशा राजानः तथा चोक्तं येच प्राकृतिकैरात्मानो दुराराध्याः
महीभुजः प्रमादालयमजाद्यानि स्थापिता निजानने २४ यथा सर्पान्व्याघ्रान्मार्जारान्सिंहान् दृष्ट्वा ह्युपायैर्वशी-
कृतान् दृष्टस्ते सुवशो राजा धीमतामप्रमादिनां २५ भ्रातस्ततो विनापि वनेयप्रश्नः कृतः तथा चोक्तं राज्ञानमेव संस्कृत्य २२
विद्यान्याति प्रमुन्नतिं विनामलयमन्यत्र चंदनं न विवर्धते २६ तथा च धवलान्यातपत्राणि वाजिनश्च मनोरमाः सदम-
त्ताश्च मातंगा स्वर्गे न संप्रसर्करे २७ करटकः मत्र्यं परं तु त्वं च न राज्ञा पृष्टः सन्वासायी तर्हि कथं राजकार्यं वर्णितं दम-
नः उदीरितोर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहंति नोदिताः अनुक्तमप्यूहति पंडितो जनः परेंगितज्ञानफला

हि बुद्धयः २८ तथा च आकारैरिंगितैरिति॥ करटकः सत्यमेतत् भो भ्रातः कथं हारी राजाश्रयः कर्तव्यः दमनः प्रिया-
हिताश्च ये राज्ञो ग्राह्यवाक्या विशेषतः आश्रयेत्पार्थिवं विद्वान् तद्द्वारेणैव नान्यथा ३० एवं च सम्यग्विचार्य गुणिन ए-
व राज्ञ आश्रयो वरः तदुक्तं यो न वेत्ति गुणान्यस्य न तं सेवेत पंडितः नहि तस्मात्फलं किंचित् सुकृष्टादूषरादिव ३१ क-
रटकः सेवकेन कीदृशेन भाव्यं दमनः सुधैर्ययुक्तेन भाव्यं तदुक्तं अपि स्थाणुवदासीनः शुष्यन्परिगतः क्षुधा न त्वे-
व नात्मसंदर्शीयात्मुक्ते राजसीश्रियं ३२ करटकः तर्हि कथं तस्य व्यवहारः संभवति दमनः राज्ञापि अनुचरस्से-
वकेन भाव्यं नोचेत्पतत्यनुजीविनः तदुक्तं यमाश्रित्य न विश्रामं क्षुधार्त्ता यांति सेवकाः सोर्कवन्नृपतिस्त्याज्यः।
सदापुष्पफलोपि सन् ३३ एवं च कृपणस्यापि स्वामिनः द्वेषो न विधेयः यथा सेवकः स्वामिनं द्वेष्टि कृपणं परुषा-
क्षरम् आत्मानं किं न स द्वेष्टि सेव्यासेव्यं न वेत्ति यः ३४ करटकः सत्यमेतत् परं राजद्वारेण कथं वर्तितव्यं को वा
राज्ञो वल्लभो भवेत् श्रोतुमिच्छामि भ्रातः दमनकः कथयति शृणु एकेन चेतसा यथोक्तं राजनीतौ राजमातरि दे-
व्यां च कुमारे मंत्रिमुख्ये पुरोहिते प्रतिहारे सदा वर्त्तेत राजवत् ३५ तथा जीवेति ब्रूवते प्रोक्तः कृत्याकृत्यविच-
क्षणः करोति निर्विकल्पं यः स भवेद्राजवल्लभः ३६ प्रभुप्रसादजं वित्तं सुपात्रे यो नियोजयेत् वस्त्राद्यंगे सदा धत्ते
स भवेद्राजवल्लभः ३७ अंतःपुरचरैः सार्द्धं यो न मैत्रीं समाचरेत् न कलत्रैर्नरेंद्रस्य स भवेद्राजवल्लभः ३८ संमतोहं
विभोर्नित्यमिति मत्वा व्यतिक्रमेत् कृच्छ्रेष्वपि न मर्यादां स भवेद्राजवल्लभः ३९ द्विषद्वेषपरो नित्यमिष्टानामिष्ट-
कर्मकृत् यो नरो नरनाथस्य स भवेद्राजवल्लभः ४० न कुर्यान्नरनाथस्य यो रिपुः सहसंगतिं न निंदां न विवादं च स भ-
वेद्राजवल्लभः ४१ यो रणं शरणं युद्धं मन्यते भयवर्जितः प्रवासं स्वपुरावासं स भवेद्राजवल्लभः ४२ युद्धकाले-
ऽग्रगो यः स्यात्सदा पृष्ठानुगः पुरे प्रभुद्वाराश्रितो हर्म्ये स भवेद्राजवल्लभः ४३ यो द्यूतं यमदूताभं हालां हालाहलो-

पश्येत्स्त्रियं तथा शास्त्रं सर्वं वेद गजवल्लभः ४४ नृपसंज्ञां तु जानीयात् यस्य याः प्रकृतिर्भवेत् धर्मे वाप्यथवा
वर्जितव्यः स्वच्छता ४५ न वार्यं न्यसते माने नावमानेन तप्यते स्वाकारं रक्षयेद्यस्तु स वेद गजवल्लभः ४६ क
आर्य तथ्यमुक्तं परं त्वया राज्ञोऽग्रे किं किमुत्तरं वक्तुमुपक्रान्तं दमनकः उत्तरादुत्तरं वाक्यं वदतां संप्रजायते सु
वृष्टिगुणसंपन्नाद्बीजाद्बीजमिवापरं ४७ करटकः त्वया कथं राज्ञोऽन्तः स्वं निराकर्तुं शक्यते दमनकः अपायसंदर्श
नं विपत्तिमुपायसंदर्शनं च सिद्धिं मेधाविनो नयगुणप्रसिद्धियुक्तां स्फुरंतीमिव वर्णयंति ४८ करटकः आ
त्वं राजचित्ते कथं वसिष्यसि दमनकः एकेषां वाचि शुकवदन्येषां हृदि मूकवत् हृदि वाचि तथान्येषां वल्गु वल्गन्ति
सुक्रियः ४९ करटकः भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः सुदुष्टा मंत्रसाध्याश्च राजानः पन्नगा इव ५०
सत्यं ये राज्ञा अनादिष्टे कुर्वन्ति तेषां तदुक्तं स्वल्पमप्येकं वीति येऽप्यनिष्टं महीपतेः ते वन्द्या विवदन्तीति मातंगाः
पापचेतसः ५१ यस्य यस्य हि यो भावस्तेन तेन समाचरेत् अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ५२ करटकः
वराकाभ्यामावाभ्यां राज्ञः किमुपकारो भविता दमनकः दंतस्य निष्कोषणकेन वापि कर्णस्य कंडूयनकेन वापि तृ
णेन कार्यं भवति स्वराणां किमंग वाक्यं वदता जनेन ५३ करटकः आर्य राज्ञा त्वां मदति कार्ये योजयिष्यति तदा
र्थं साधयिष्यसि दमनकः विवेकिनो राजानो विशारदानां नाज्ञापयंति तदुक्तं स्थानेष्वेव नियोज्यन्ते भृत्याश्चाभरणानि
च नहि चूडामणिः पादे नूपुरं न हि मस्तके ५४ करटकः महत्कार्ये नियुक्तोऽपि भृत्यः कथं राज्ञा संदिग्धं करिष्यतीति २३
विश्वस्तव्यः दमनकः विविच्य राज्ञा प्रयुक्तः कथं न साधयति तदुक्तं कुलीनाः शौर्यसंयुक्ता नत्ताः सक्ताः क्रमागताः स
हज्जा तु समावेशस्य निर्विशेकेन चेतसा ५५ करटकः को राज्ञां भृत्यार्हाः यं विश्वसति दमनकः अनाहूतो न विशति द्वा
रे तिष्ठति सर्वदा पृष्टः सत्यं वचो ब्रूते स भृत्यो हि महीभुजां ५६ करटकः तथापि शृंगालयो निजातानां विस्मृदशा नोक्त

थं राजा मानस्फुरः सर्व एवमादिश्यति दमनकः कोऽशोयं स्वमितं सुवर्णमुपलाद्दूर्वापि गोलोमतः पंकात्तामरसं शशांकमुद
धेरिन्दीवरं गोमयात् काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो गोरोचना प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्म
ना ५७ मूषिका गृहजाताऽपि करटकः षट्कर्णो भिद्यते मंत्रश्चतुःकर्णः स्थिरो भवेत् द्विकर्णस्य तु मंत्रस्य ब्रह्माप्य
न्तं न गच्छति ५८ इति त्वं कथं रहस्य मारप्यास्यति दमनकः सुहृदि निरंतरचित्ते गुणवति भृत्ये प्रियासु नारीषु स्वामिनि
सौहृदयुक्ते निवेद्य दुःखं सुखी भवति ५९ उक्तोऽपि मंत्रोऽनुजीविना सुरक्षणीयः यथोक्तं षट्कर्णो भिद्यते मंत्रस्तथा
मंत्रोऽप्यरक्षितः पैशुन्याद्भिद्यते मंत्रो भूढवज्जात्रकातरः ६० अनुजीविनां हठेन नाथ्यं संपदियस्य महर्ष इतिः ६१ शक्ति पि
वैकल्यमाम्नस्य निःसारस्य लघीयसः जन्मिनो धैर्यहीनस्य तृणस्येव समा गतिः ६२ तदपि तत्संग्राह्यं भवति अश्वः श
स्त्रं च शास्त्रं च वीणा वाणी नरश्च नारी च पुरुषविशेषं प्राप्ता भवंत्ययोग्याश्च योग्याश्च ६३ करटकः विपद्दये किं
कार्यमार्य दमनकः सर्वथा धैर्यमालंबनीयं नोचेन्नश्यति तदुक्तं अनन्त्य प्रथमादम्या साद्य यो हठात्तं न गच्छति सो
चिरेणैति क्लिन्नरश्मि तमः सूर्योदये यथा ६४ नयेया यदि वा हर्षं संप्राप्तेन विमर्शयेत् सत्यं गजसते वेगा क्रमं ताप
मवाप्नुयात् ६५ करटकः आर्य तथ्यमेतत्परं च यूयं राज्ञावमानिता अतः सर्वोपजीवनाद्दोहपरा न विक्षंति ततः सा
वकाशेन चिंत्यं कार्यं तदुक्तं येऽमवंति महीपस्य संमानिता वमानिताः अत्यंतं तद्विनाशाय सर्वत्रक्रूर राजजना
६६ दमनकः चिरंजीव दत्तोऽस्त्रि परंतु आवयोर्जनाता वैरं नास्ति केवलं मननधिकार एव राज्ञो यन्तर्हितमस्मि नोचेत्क
म स्य सार्व नयति तदुक्तं स्वाम्यादिष्टस्तु यो भृत्यः समं विषममेव वा मन्यते न सम धार्यो भृत्यराजास्ति मिच्छता ६७ इति
तस्याणां नीतिविद्यानां सारं यथामति वच्मि तदपि बालोऽपि स्मुखा दतो राजादिष्टनियोगाचरणे समर्थोऽस्मि त्व
कोऽपि संशयो न कार्य एव करटकः यद्येवं तर्हि साधय ये हितं त्रिवास्तु ते पंथानः सचिरं राजसन्मानं लभस्वेति आर्य

भुजस्य कथा ततो दमनकः करटकमापृच्छ्य पिंगलकनामानं पंचाननं स्वस्वामिनं प्रति प्रस्थितः तत्र गत्वा प्रणामं
न पंगणे सविचारस्य वहन्तो यावदास्ते तावत् सिंहासनमलंकुर्वाणेन राज्ञा पिंगलकेन पूर्वप्रधानसूनु
दमनको दृष्टः राज्ञा चिंतितं मत्प्रधानपुत्रोऽयं चिरमुदरंभरिरिव मां सेवन्ननुगच्छति मयालापमात्रेणापि न संमान
ते परं त्वयं कुलीनः पुरातनः परंपराप्राप्ताधिकारो मुनामदवमानेन लघुरिवास्ते वस्तुतस्तु गरीयान् समस्त
तिरस्कृदयवेदित्वात् सामर्थ्यात् निपुणबुद्धित्वाच्चेति चिंत्य प्रतिहारं ब्रूते रे रे द्वास्थ मदमात्यपुत्रं दमनकमेनमा
रय स च ओमित्युक्त्वा दमनकं प्राह आर्य त्वामाकारयति स्वामी ततः सप्रविनयं गत्वा राज्ञश्चरणौ ववंदे राजा।
पि सानंदं पृच्छति वराक दीर्घदिनैर्दृष्टोऽसि त्वं अस्मत्पुरातनप्रधानपुत्रस्त्वया सदा राजा संभावनीयः दमनकः स
विनयं सविवेकं प्राह स्वामिन् यूयं राजनीतिवेत्तारः यत्तनाष्टच्छ कस्यचिद्ब्रूयात् पृष्टः सत्यं वचो वदेत् सत्यम
प्यहितं नैव हितं सत्यं सदा वदेत् १ इति स्वाम्यनुज्ञया वच्मि यत्र सदसतोरंतरं न स्यात् तत्र विवेकिना क्षणमपि
न स्थेयं तदुक्तं उपकर्त्रपकर्त्रोश्च सन्याय्यन्याय्ययोस्तथा गुणवन्मूर्खयोश्चैव साध्वसाध्वोपरस्वयोः सदसतोरं
क्षणं तत्र न संवसेत् तरं नास्ति न तत्र दिवसं वसेत् १ अतः स्वामिन् राज्ञा विवेकिना भाव्यं स एव क्ष्मामंडलमंडनं तदुक्तं प्रभुर्विवेकी।
सधनश्च दाता विद्वान्विरागी प्रमदा सुशीला सेनापतिः शस्त्रनिपातदक्षो भूमंडलस्याभरणानि पंच १ यत्र च स्वा। २४
मिनो विवेको नास्ति न तत्र सज्जनावकाशो न भवति तदुक्तं अविवेकमतिर्नृपतिर्मंत्री गुणवत्सु वक्रितग्रीवः यत्र ख
लाश्च प्रबला तत्र कथं सज्जनावसरः अन्यच्च आज्ञा यत्र बलेनं सामान्यानां च विशेषतः दयाहीनो नृपस्तत्र किंक
रः किं करिष्यसि २ अन्यच्च बहवो मंत्रिणो यत्र सेवासमो नृपः अत्यागी क्रोधनश्चैव किंकरस्तत्र किंकरः ३ अन्यच्च
हिरण्यकाचयोर्यत्र न न जानाति परीक्षकाः सेवकः स्वहितं प्रेप्सुः क्षणं तत्र न संवसेत् ४ तथा च कपोतश्चकयोर्यत्र का

कोकिलयोस्तथा न हंसबकयोर्भेदो धिक्स्थानं तत्परित्यजेत् ५ अतः स्वामिन् यत्र राजा विवेकी त्यागी सेवाज्ञः परीक्षकः
तत्र सज्जनाः सेवकाः गुणिनः सुहृदः साधवश्च स्वस्थाः संततं मधुनु मक्षिका इव परिभ्रमंति तस्माच्छ्रीमतां मंजुल वाक् संभ
वन स्वल्पवित्तत्यागेनाप्यायितोऽहं राजहितं ब्रवीमि तत्र स्वामिना क निकृष्टबुद्धिर्न विधेया यदयं जंबुको हीनवर्णोऽहं
तं किमुपकर्त्तुं ऽसि कस्मात् हीनवर्णोऽपि दीनोऽपि लघुरप्युपकारकः मातंगः पतितो गर्ते मूषकेन बहिः कृतः १ पिं
गलः पृच्छति कथमेतत् दमनकः कथयति अस्ति शृंगालनामद्वीपस्तत्र गजरवनिर्नाम ह्रदरत्नमस्ति तत्र सकलो
दिरूकुलपतिः सत्यपतिर्नाम्ना मूषकेंद्रः प्रतिवसति स कदाचिद्वर्षागमे स्वबिलान्निर्गत्य गिरीतटे स्थित्वा यावज्ज
लधारावर्षणमालोकयति तावदधित्यकाद्दृष्टेन पयसा मोघेनाक्रम्य गिरिनिर्झरसरति दूरतीरं नीतः सन्नीरैः प्रे
णनीयमानो यावद्योजनद्वयं तं प्राप्तस्तावद्वन्यकरियूथपतिः ससंभ्रमं दंवर्षन् यूथभ्रष्टः कामासक्तः हृष्टो जल
धीरभंगीकुर्वन् मध्यप्रवाहं विलोडयन् दृष्टः शनैस्तत्कुंभमारुरोह ततः कौतुकात्तेन मातंगजेन शुंडाग्रे धृतः स
आह हीनो दीनः क्षीणः शीतार्तो विगतचेतनस्त्वां शरणागतोऽस्मि नमस्ते महाप्राणी वदान्ये न पिष्ट्वा विधेहि तथा हि
जनेता चोपनेता च यश्च विद्यां प्रयच्छति अन्नदाता भयत्राता पंचैते पितरः स्मृताः १ गज आह कस्त्वं स आह अ
हं कोटिमूषकपतिः सत्यपतिर्नामान्वर्थमित्रमूषकोऽहं गजश्चिंतयति वराकः साधुरिव नास्ते नो मुखको यदि
त्वां जीवयामि तर्हि किं करिष्यसि मां मूषकः कदाचिदुपकारं करिष्यामि मा स्तुते विपत् तथापि यथापि सुदुः
वं प्रति राजोक्तिः मत्यश्च जीर्णः तथा सन्मित्रविहितं सम्यगुपकारं हि साधवः प्रतिकर्त्तुं न चेदिति जीर्णतिष्ठः स्वका
राः तस्मान्मामुद्धर कातरात् इति मूषकवचनं श्रुत्वा प्राप्तचैतन्यो गजस्तमादाय सरितो निःसृत्य जलबाधिताः
गिरिगुहायां दैवात् प्रज्वलंत्यं दहनस्य निकटे शनैर्मुक्त्वा यावदास्ते तावत्तापविनाशितशीतः स्वस्थचित्तो मूषकः

प्राह शृणु महाराज भवतां महत्पुण्यमुपार्जितं मम जीवदानेन तथा चोक्तं इज्यया तपसा वापि नियमैश्च य
श्च वा सदा शौचेन यत्पुण्यं तदेकं जीवदानतः १ तथा सत्येन ब्रह्मचर्येण यत्फलं पुरुषोऽश्नुते ब्रह्मवादेन तस्मा
शरणागतरक्षणात् २ तस्माच्छिवास्तु ते पंथानः साधय स्वकार्याणि आवयोर्मैत्री संघटिता अतः प्राप्तकाले
स्मरणीयोऽहं सद्य प्राप्य यथा नियोगं साधयिष्ये एवं हितमुक्त्वा स्वामिवंद्य तूष्णीमास गजोऽपि तदुपकारवचः श्रु
त्वा विदग्धतदौदार्यगुणेन विदग्धत्वेन च विस्मयं यातः स्वेच्छं जगाम ततोऽतिक्रांताः कियंतो वासराः प्राप्तायां न्या
रण्ये गजग्राहिभिः करिमार्गे कृतो महान्गर्त्तः वंशादिभिराच्छादितश्च तदुपरि बालतृणानि लक्ष्यंते तदा स एवम
तं गजः स्वयूथमादाय कतिचित्करेणुभिः करिपोतैश्च सह रणे कवलान्पदन्गर्त्तनिकटमागात् तस्मिन्नलक्षितगर्ते
यूथाग्रसरत्वात् शनैर्मुक्तचरणः स्वयं स मग्नवंशैः सह पपात तत्पतनशब्दमाकर्ण्य त्रस्तं यूथं पलाय्य दूरदेशं जगाम ।
गर्त्तस्थो गजपतिर्दुःखार्त्तश्चिंतयति अद्य किं करोमि कं शरणं यामि को मां मोचयतीश्वरं विनेति विविधं विचार्य
धैर्यमंगीकृत्य यावदास्ते तावत्स्मृतं मित्रं तेनाममित्रं मूषकोऽस्ति तेन च प्राप्तकाले स्मरणं विधेयमपि वाग्दानमपि ।
कृतं भवति ततः स्मर्त्तव्यः इति मनसि कृत्वा सोऽसत्यपते मां मोचयेदिति २ इति शब्दं कृतवान् स च शब्दः केनचिन्मूषक ।
नुचरेण श्रुतः स च शीघ्रं गत्वा सत्यमतिं प्राह स्वामिन्कश्चिन्मातंगो गर्तेपतितस्त्वदभिधानमालपति एवं श्रुत्वा तद्व
णं स्मृतमित्रः सहसोत्थायाष्टकोटिमूषकबलमादाय द्रुतमेव प्राप्तस्तं गजं किरिन्न मस्ते चिंता न कार्या अद्यैव बहिः क २५
रोमि इत्युक्त्वा स्वबलमादिदेश त्वरितं ते योधाः भूमिविदारणे अपरां वापीमिव विधाय तं गर्त्तः इत्याकर्ण्य मूषक ।
बलेन तथैव विहिते गजोऽपि सोपानमार्गेण बहिरायातः ननाम मूषकं मित्र प्रीतोऽहमुपकारेण मूषकः अहं हेमि ।
त्र किमिदमुच्यते त्वया धिक् प्रपंचेन वित्तेन बलेनापि सुविद्यया यैरापत्सु चिंतं मित्रेष्वसमुद्धृतं न प्रकाश्यते १ अतः श्रीमत ।

मिथ्यास्तुतिर्न विधेयेति नागो ग्रीवाद्युपरस्परमैत्र्या स्वस्थाने प्राप्तः गजमूषकौ अहमतो ब्रवीमि हीनवर्णोऽपीति
कथा ॥ पिंगलकः कथं सत्यमेतत् परंतु अहं त्वां सर्वतोऽधिकं मन्ये दमनकः अहं वेद्मि न वदे तर्हि तं नोचेत्कथं ।
मागतः तथा प्रियः सेवको न क्रियत्कृतस्तमानपुरः परं नियोगं कुर्यात् तर्हि अनुजीविनो मरणमंगीकृत्य कार्यं निष्पा
दयंति तथा चोक्तं राजानुजीविनस्त्यागं मानमात्रे प्रयच्छति तेऽपि मानमात्रेण प्राणैरप्युपकुर्वते १ पिंगलकः स न
त्यमेतत् भो दमनक त्वं मम मंत्रिणां मात्योऽसि अस्माभिस्त्वा कथितमस्ति यदेवं कातरं ब्रूषे दमनकः स्वामिन्नगुणस्ते
र्महद्भिः कथमुच्यते इति अवलंब्य प्रयातेन प्रस्तुतं वच्मि पृष्टो त्वया कुमहितं सर्वदा न कार्यं तस्मात्किंचित्स्पृ
ष्टुकामोऽहं यद्याज्ञा राजा कथ्यतां कृतं दमनकः प्रीतो त्वां व्यग्रं पश्यामि तत्कस्माद्धेतोः कथनीयार्हश्चेत्कथ्यतां
कं च गुह्यं प्रकाशयेत् स्वस्य हितैषी वरतः सुधीः नोचेन्निर्दहति स्वांतं तस्माद्गुह्यं प्रकाशयेत् तथा च लोकेषु किंचि ।
त्स्वजनेषु किंचित् मित्रेषु किंचिन्नभोग्यमस्ति दारेषु सर्वं परिगोपनीयं गोप्यं वयस्येषु न किंचिदस्ति १ इति
श्रुत्वा राज्ञा चिंतितं विनीतोऽयं ह दृश्यते यद्यस्याग्रे कथ्यते तर्हि बुद्धिः प्राप्यते इति विमृश्य राजा प्राह रे दमनक शृ
णु व्यग्रत्वहेतुं यदहं वनांतचरन्परित्रीर पयःपानार्थं गतः तत्र मयाश्रुतसर्वकल्पाणिजंतोः शब्दः श्रुतः सका
वयोरतिभयंकरः कदाप्यानीयो वा स्याना श्रुतो न विष्यति तमुद्दिश्य मया विमृष्टः कृतः यस्यैतादृशो स्वनघोष ।
त्तस्य पराक्रमो महान्न भविष्यति दमनकः प्राह स्वामिन् शब्दश्रवणमात्रात्कथं भीतिरुत्पद्यते यथा जलगर्जि २
तेन लोकाः न त्रसंते तथा चाग्निशस्त्रगर्जने न शूराः न त्रसंति तस्माच्छ्रवणमात्रेण भयं प्राप्नुयां चेत्तर्हि कथं राज्य
कर्मः यदि भिन्नेऽमहितर्हि परो राजा वा बुद्धिमानन्यकोऽपि सुखेन आवयोः पदं प्राप्नुयात् तथा चोक्तं चिंतापीडि
तदेहस्य राज्यं न स्थिरतां व्रजेत् तस्माद्भाव्यं सुखेनैव राज्ञा हि सुरवडारवयोः २ तस्मात्सदाश्रितान्संज्ञात

लशीलान्स्वहितान् सत्यवक्त्रेरेवं पृच्छासु निर्धार्य चिंता निराकरणीया तर्हि सुखिनः स्युः अन्यच्च स्वामिन् शब्देन
चिंत्यं न कार्यं यथा पूर्वं कश्चित् शृंगालः शब्देन वंचितस्तथेति दासं वंचित यथा शुष्कैर्वंशै रवशब्दं मानुष्यं दि
जंबुकः अनुप्रविश्य विज्ञातं यथा चर्मचर्मदारुच २ पिंगलः पृच्छति कथमेतत् दमनकः कथयति कश्चिद्देशो
शावर्तनाम नगरमस्ति तत्र सोमदत्तो नाम राजा राज्यं करोति तस्य राज्ञः विष्णुगुप्तो नाम गजोऽस्ति स च महाबलिष्ठः शत्रू
ग्रेण दंष्ट्राग्रदंष्ट्रबलं विनाशयति तस्य राज्ञः कश्चिद्राज्ञा सह वैरं जातं अतः सोऽपि राजा प्रौढसैन्यं गृहीत्वा तिक्रांते
कियत्तैर्दिवसैः सोमदत्तनगरीं प्रत्यागतः ततो नगरसमीपे गत्वा राज्ञा सोमदत्तेन युद्धसमारंभे तदा राज्ञा सोमदत्ते
न चिंतितं किं कर्तव्यमधुना विष्णुगुप्तेन विना जयप्राप्तिर्न भविष्यति एवं विचिंत्य विष्णुगुप्तनामानं गजं गृहीत्वा यु
द्धाय गतः तत्र रणे परस्परं युद्धमाने योद्धैः प्रतिपक्षसैन्यं नाशयिष्यामः एवं युद्धे प्रबलं जाते मति विष्णुगुप्तेन ताडित
:ये योधास्ते दशदिक्षु पलायिताः तत्र पलायिते राज्ञि प्रजायितं सैन्यं तत्रैकः पटहः पतितः स च दक्षिणपार्श्ववर्ति
ना काष्ठेन ताडितः सन् शब्दं करोति ततोऽनंतरं एकदारण्ये गोमायुः क्षुधया पीडितः भ्रमंस्तत्रागत्य पटहश
ब्दं श्रुत्वा तदा च चिंतितं गोमायुना अत्रारण्ये कस्यायं शब्दः एवं विचिंत्य मनसि जातं अयं कश्चित्पशुः मृतप्रायः
शब्दं करोति परं घटिकाद्वये संजाते मरिष्यति तदाहमेतस्यामिषं भक्षयिष्यामि एवं विचिंत्य तत्रैवं मौनभावं कृत्वा स्थि
तः एवं बहूनि दिनानि निर्गतानि तथापि शृंगालेन परं शब्दो न त्रुटयति इत्थं कियंतैर्दिवसैर्दक्षिणपार्श्वस्थकाष्ठ । २५
घातेन पटहः स्फाटितः तदा शब्दरहितो जातः एवंविधे पटहे मति शृंगालश्चिंतयति यदधुनायं मृतः एतदामिषं ।
भक्षयामि एतन्न शब्दं कदा तं न चलति एवं विचार्य पार्श्वं गतः यावद्गत्वा पश्यति तावत्पटहो दृष्टः स्फाटितः पश्चा
त्कथयति स्म शब्दं कृत्वा वंचितोऽहं शब्दान्न किंचित् एतत्कथानकं कथयित्वा दमनकः कथयति तथापि स्वामिन्

त्वमपि शब्दं श्रुत्वाऽस्थैर्यं मा भैषीः धैर्यं विधेयं भवता तत्श्रुत्वा पिंगलः कः रे दमनक अस्मत्सकलपरिवारो यशयिष्यमि
च्छति अतो धैर्यं कथं तिष्ठति यदा शक्तिर्न भवति चेत्तर्हि त्वमेव गच्छ अन्यकार्यं कृत्वा गच्छ इत्थं राजवचनमाकर्ण्य दमनो ।।
पादवंदनं कृत्वा प्रस्थितः तद्गते राजा विचारमकरोत् मया दमनकस्याग्रे मनस्था वार्ता कथितास्ति मयैतस्याप्या
श्री रप्राक्षतादिः स्फेमितोऽस्ति अतो दमनकः मदीयां मनस्थां वार्तां विदित्वा गच्छति तदा किं कर्तव्यं मया तेन सह सर्व
था राज्ञा कस्यापि विश्वासो न विधेयः एवं मनसि विचार्य यदा एवं तदा मया एतस्थानं त्यक्त्वान्यस्थाने गत्वा स्थेयं एवं ।
विचिंत्यान्यस्थाने गतः गत्वा स्थितः मनसि कुर्वते विचारं राजा ततो दमनकोऽपि संजीवकपार्श्वं गतः दूरे स्तंपसुं दृष्ट्वा चिं
तयति अयं वृषभः शब्दकर्तो वृषपते वृषभो न भविष्यति वा न परमग्रे गत्वा विलोकयामि एवं विचिंत्याग्रे गत्वा निश्चितं अ
यं वृषभ एव दृष्ट्वा हर्षितः मनसि विचारितं यदा अस्मात्कार्यात्स्यन्नो न भविष्यति अन्यदहं प्रधानत्वं गमिष्यामि एवं कृत्वा
दमनकः पिंगलकसमीपे गतः तमागतं दृष्ट्वा राजापि स्वस्थानादुत्थितः मान्यमपि दत्तं सोऽपि पादयोः पतित्वा स्थितः रा
राजा पृच्छति कथय दमनक कस्य शब्दः कोऽस्ति पश्चाद्दमनकः कथयति स्वामिन् स महानुभावोऽस्ति श्रीमहादेवस्य
क्रियवृषभः अस्मिन्वने चरणार्थमुक्तोऽस्ति तस्याग्रे गत्वा मया पृच्छितं तेन ममाग्रे कथितं ततोऽहं पृष्टस्तेन कस्त्वं तच्छ्रुत्वा
मयोक्तं रे भ्रातः श्रीआदिजननीवाहनसिंहः अस्य वनस्य राजास्ति तस्याहं मंत्री दमनको नाम ततोऽनंतरं तेनाहं
क्रुधनामानितः पश्चात्मया कथितं यत्त्वं मिलनाय राज्ञा आगच्छ पश्चात्तेन कथितं तव स्वामिनोऽग्रे कथनीयं त्वरा
मिलिष्यामः तेन सह हेस्थं निश्चयं कृत्वा गतोऽस्मि पश्चाद्दमनकस्यैवं वचनं श्रुत्वा राजा मदगर्वो जातः अन्यत्कथितं यत्त्व
कृशलानमात्यान्विना राजा सुखी न स्यात् त्वया मत्कार्यं बहु कृतं अतः परं तव रोचते चेत्तर्हि श्रीमहादेववृषभं
मिलनाय गच्छावः तच्छ्रुत्वा दमनकः कथयति त्वं राजा स्वयमेव मिलनाय गच्छसि तर्हि किं ममात्यत्वाच्चर्यं अ
त्रगत्वा मच्छावयेण तं वृषभं तव मिलनायागमिष्यामि तद्वचनं श्रुत्वा राज्ञा चिंतितं धन्योऽसि त्वं मम प्रधानमुक्तं वृ.

त्थं नतित्वा राजा स्वगेहं प्राप ततो दमनकः द्वितीयदिवसे वृषभेन गतः तत्रागत्य कथितं रे वृषभ त्वामाकार-
मत्स्वामी पिंगलको नाम सिंहः तस्याज्ञां विना चैव ते निर्णयः मन्त्रणानि न रक्षयति त्वं तं राजानं न जानासि तच्छ्रु-
त्वा वृषभोऽडःरिक्ततो जातः विचारयति यत्सिंहः कुपितः किं कर्तव्यमधुना एवं चिंतितं अस्माज्जीवामि चेत्त-
एतस्याग्रे कथनीयं राजवर्गेऽप्यनीचादपि स्वकार्यं साधनीयं ततो वृषभो दमनकं कथयति रे मित्र सिंहः कुपि-
ः त्वमपि तस्य प्रधानोऽसि असौ यद्यां करिष्यति तर्हि जीवाम्यहं अधुना त्वमेव शरणं इत्थं वृषभस्य दीनव-
नानि श्रुत्वा दमनकः कथयति रे भ्रात मन्निषेधः परं त्वं ममाज्ञां करोषि तर्हि सिंहेन सह त्वां मेलयामि अन्यत्वद्भ-
मानं करिष्यामि राज्ञोऽग्रे पश्चाद्वृषभः पादयोः पतितः ततो दमनक आह त्वं राजकृपायां जातायां यत्त्वां मया यद्गदितं
करिष्यसि तर्हि तव शुभं भविष्यति अन्यदस्माभिः सहसा नेदं रक्षसि तर्हि राजलक्ष्म्यादि बहुसुखं भोक्ष्यसि अ-
न्यद्विरोधं करिष्यसि तदा विनाशं गच्छसि यथा दंतिलः पूर्वं विनाशं गतः न श्रद्दयति यो गर्वात् यथोचितं नृपाश्रितः
स प्राप्नोति पदं भ्रंशं भूत दंतिलो यथा २ वृषभः पृच्छति कथयति दमनकः मालवदेशे वर्द्धमानं नाम नगरमस्ति तत्र
रतिभूषणो नाम राजा राज्यं करोति तस्य गृहे दंतिलो नाम मध्यान्याधिपतिर्वर्त्तते तेन दंतिलेन सर्वे जनाः सुसन्मानिताः।
कोऽपि नावमानिताः सर्वे तस्य सुखं कथयंति एवमतिक्रांतैः कियंतैर्दिवसैः एकदा दंतिलः स्वां पुत्रीं विवाहयति अत
राजापि सपरिवार श्रधाने सह बहुभिर्व्यापारिभिः सत्कारितो भोजनाय प्रवेशनायः स्वस्वस्थाने गत्वा स्थिताः तत्र राज्ञो। २४
दं हर्म्यस्य मार्जनकरो गोरंभो नाम राज्ञः गुरोः समीपे गत्वा स्थितः तदा दंतिलेन कंठे धृत्वा बहिर्निष्कासितः सोऽपमानितः स्व-
प्रापः ततो राजा भोजनं कृत्वा स्वगृहे गतः ततो गोरंभेण चिंतितं अहं दुष्टेन दंतिलेन अवमानितः परमेतस्य व्यापारं स्फेट
यामि तर्हि अंतर्गतो वह्निः शाम्यति एवमतिक्रांतैः कियंतैर्दिवसैः एकदा राजा प्रभाते पट्टराज्ञा सह सुप्तोऽस्ति तत्सम
ये गोरंभोऽपि अंगणमार्जनादिकं कृत्वा तत्रैव राजनिकटे कपटनिद्रां विधाय सुप्तो यत्र राजानं जागरूकं ज्ञात्वा।

प्रसंगे स्मकथयति यद्दंतिलोऽयं राज्ञः पट्टराज्ञ्या सह संभोगं करोत्यहर्निशं परं मूर्खः राजा न जानाति तच्छ्रुत्वा राजा गोरंभं।
माकार्य पृच्छति रे गोरंभ त्वया किं कथितं तदा गोरंभः कथयति स्वामिन् रात्रौ द्यूतक्रीडार्थं गतः तस्मान्निद्रयापीडि-
तेन मया किं कथितं तन्न ज्ञायते तच्छ्रुत्वा राजा तूष्णीं स्थितः परं दंतिलमवमानीय गृहान्निष्कासितः दंतिलश्चिंतय-
ति मया पार्थोऽपि नावमानितोऽस्ति तर्हि राज्ञोऽग्रे गत्वा केनातः कृतः मया किं कर्तव्यमधुना महत्कष्टं समुपागतं इत्थं वि-
चार्य यावदास्ते तावत्पूर्ववृत्तांतं स्मृतं यन्मया गोरंभोऽवमानितः तस्मादयमनर्थो जातोऽन्न भविष्यति वा न एवं विचार्य
दंतिलेन गोरंभः स्वगृहे आकारितः बहुमानं दत्तं भोजनं च अन्यत्कथितं मम गृहे कथं नागच्छति त्वं राज्ञो गुरोः
समीपात्त्वापितः अतो मानं दत्तं अन्यथा कमपि न मानयाम्यहं तच्च त्वया ज्ञायते इत्थं संतोषयित्वा पंचांगप्रसा॥
दो दत्तः पश्चाद्गोरंभेण वस्त्राणि परिधाय निहृष्टो जातः यन्मया सकलं राज्यं प्राप्तं अन्यत्कथितं च दंतिल त्वया मानं दत्तं त-
स्य फलं सद्य एव राज्ञः रूपं दर्शयामि तच्छ्रुत्वा दंतिलेन कथितं त्वं चैवं घटते तत्त्वं मम मित्रमसि ततः श्रुत्वा गोरंभोऽपि।
स्वगृहे गतः ततोऽनंतरं द्वितीयदिवसे गोरंभः अंगणमार्जनं कुर्वन् मार्जनं कुर्वन् मनसि चिंतयति अद्य दंतिलकार्यं साध-
नीयमिति मनसि निधाय स्मरणादिकं संमार्ज्य राजकार्यं प्रारभ्य तदनंतरं कपटनिद्रां विधाय रात्रौ सुप्तः सुप्तः स-
राजानं जागरूकं ज्ञात्वा स्वप्नमिषेण मित्रं प्रत्युवाच भो भो मित्र मे संस्तुतं त्वया अद्याहं राज्ञः पुरीषोत्सर्गमाचरता चिर्भ-
टीं न हिता एतद्योग्यं कृतं इत्युक्त्वा अन्येऽपि क्रियंतो निरर्थकाः अनिरर्थकाः प्रलापाः प्रोक्ताः इति दंतिलकार्यं मूलं
शोधयित्वा तूष्णीमास राजा चिंतयति अहो किं वदत्ययं दुष्टः चिर्भटी उ मया स्वप्नेऽपि न हिता नास्ति असंभाव्यं वक्ति परं
यं तथापि पृच्छामि नरं न पुत्रं इत्थं चिंतयित्वा प्राह रे राजगृहीय गोरंभ किमिदं निद्राबृबे स भवाह स्वामिन् निद्रयापीडितेन म-
यद्भाणितं तन्न ज्ञायते क्षम्यतां मदपराधः ततो राजा चिंतयति यतः शुचिबुद्धिहीनो याबद्मायगृहदासायकानां मज्जिह-
देया रे दुष्टात:परं एवंविधं गर्भं स्वप्नेऽपि न वक्तव्यं कदाचेन्नहि जीवादपि विमोचयामि अद्य उग्रहसे व को प्रीतिम-

इत्थं तं सिंहासनमनसि चिंतयति अहो तद्धमवचनमंगीकृत्य दंतिलमहं आयापमानदत्तं तन्न घटितं तं विना
र्वमपि कार्यं न आगमाप्नोति अन्यः कोपि ईदृशो न मिलिष्यति एनमानयामि इति मनसि कृत्वा प्रातश्चोत्थाय नित्य
मित्रिकं कृत्वा सभायामागत्य दंतिलमाहूय पंचांगप्रसादं दत्त्वा सम्मानितः अकृष्ट यथापूर्वं स्वमधिकारं प्राप्त
त्वयानिश्चितोहं दंतिलस्तच्छ्रुत्वा हर्षः मनदेवादेशप्रमाणं अहं मदैकनवदीयः अतोहं ब्रवीमि नरेंद्र जयति
योगर्वादिति कथा॥ एतत्कथानकं कथयित्वा दमनको नाम पिंगलप्रधानः संजीवकनामानं वृषभं कथयति स्म
अतः कारणात् स्वामितिमिच्छतान्तरेण राजवर्गिणा सह विरोधो न विधेयः यत्त्वं मद्वचनं स्वीकरोषि तर्हि आवयो
क्षेमानंदं भविष्यति वृषभेणोक्तं तथाहं करिष्ये एवमन्योन्यं वृषभदमनकौ शपथं कृत्वा पिंगलकं प्रति प्रस्थितौ ततो द
मनकः वृषभं पिंगलकाग्रे आनीयोक्तं स्वामिन् त्वया मिलनीयोयं वृषभराजः एवमुक्ते दमनकेन पिंगलकः सहसा
समुत्थाय मिलितः मिलित्वा वृषभं कथयति रे वृषभः तव निवासः कुत्रास्ति तच्छ्रुत्वा वृषभः कथयति अहं स...
नेतिय यथास्थितः सर्ववृत्तांतः कथितः परमधुना मे मित्रत्वं गतस्त्वं अद्य मयि त्वां बंधुमेव जानामि तच्छ्रुत्वा पिंगलकेनो
क्तं स्वामिन् तत्सेवकोहं भवत्सेवं करोमीत्युक्त्वा सिंहः जलं स्वीकर्तुं यमुनायां गतः ततो वृषभो वनेचरणाय गतः त
तोनंतरं द्वितीयदिवसे पिंगलकवृषभौ मिलितौ परस्परं कुशलप्रश्नं कृत्वा स्वस्वालयं गतौ एवमतिक्रांते कियन्ति
दिवसैः वृषभेन पिंगलकः सकलनीतिसशास्त्राणि अध्यापयित्वा वनचरबुद्धिं स्फोटयित्वा राजनीतिप्रविणः कृतः
एवं कृते पिंगलकोपि वृषभेन पिंगलको मोहं गतः वृषभेन सहानुदिनं गोष्ठीं कुर्वन् प्रधानमात्यानामभिधानमपि न गृह्णा
ति अन्यावपि दूरसितिष्ठति एवं राज्ञि सति सपरिवारो विचारयति राजा विकलो जातः यत् कूटं सपरिवारं मुक्त्वा सदैको
ना वृषभेन सह मैत्रीं करोति पश्चात् श्रृगालो करटकः लघुभ्रातरं कथयति यदावां प्रधानत्वे स्वहस्तेनैव कृते तेन
त्वा दमनकः दमनं कथयति रे भ्रातः सत्यं सत्यं अन्यथायं तृणभक्षी वृषभः किं राजनीतिं जानाति परं मया स्वहस्ते

नैव कृतं यदा ज्ञात्वा सहमेलितोयं यथा एभिः स्वहस्तैः कृतं तदुक्तं जंबुको मेषयुद्धेन वयं चाषाढभूतिना इति कापरका
येण त्रयो दोषाः स्वयं कृताः १ करटकः पृच्छति कथमेतत् दमनक प्राह दक्षिणस्यां दिशि चंद्रकीर्तिनाम्नी नगरी व
र्तते तत्र विष्णुशर्मा नाम सन्यासी अस्ति तस्य पार्श्वे सुवर्णं बहुतरमस्ति तत्सुवर्णमेकीकृत्य कंथायां रक्षति कस्या
पि विश्वासं न करोति एवमतिक्रांते कियंते दिवसे आषाढभूतिर्नाम्ना ब्राह्मणो तिखलो तिचतुरो धूर्तविद्यायां स वे
विष्णुशर्मणः पार्श्वे बहुसुवर्णं ज्ञात्वा धौर्तविद्यया ग्रहीतुमिच्छसि परमवकाशं न गच्छति ततश्चिंतयति मनसि संन्या
सिनः विश्वासार्थं किमपि धूर्तोपायः कार्यः येन मां विश्वासयति एवं विचिंत्य विष्णुशर्मणः अग्रे दंडवन्नमस्कारमकरो
त् पश्चात् विष्णुशर्मणा कथितं रे भ्रातः त्वमहर्निशं मन्मठे केन कारणेनागच्छति आषाढभूतिः प्राह स्वामिन् मम हृदये वै
राग्यमुत्पन्नमस्ति सर्वजनाः स्वार्थत्वात् जानंति किं माता पिता च किं च गृहिणी भ्राता च किं वैरिणो मित्रं किं च कुटुंबं।
किं बहुतरं द्रव्यं च काशीतला दारिद्र्यं किं च शौर्यं सुजनव प्रकरी काच विद्या प्रसंगो को पुत्रः को विपुत्रः सकलज
या गदिदं मायं बधितं हि २ इत्थं मलमूत्र नृतं विष्टामांससहितं शरीरमस्ति यद् तद्धावनं न क्रीयते तदा मुखे दौर्गंध्यता
ङ्गनावीनवति मलमूत्रादिकं देहान्निर्गिति मरति इत्थं कुत्सितं जीवितं अतो किं कार्यं प्राणिग्रहणे अपवित्रना
रिदेहो विष्टानेदारः तत्किं कार्यं अतः स्वामिन् मम वैराग्यमस्ति तेन कारणेन त्वां प्रति विज्ञापदनार्थमागतोहं यूयं
महानुभावाः स्थः मम उद्धारं कर्तुं योग्याः तच्छ्रुत्वा सन्यासी उवाच रे आषाढभूते तव चित्तयौवने स्थीनो गाढिरतं सर्ततो
अज्ञेन विष्यति परं त्वं मन्मठे प्रवेशं न करोषि अस्मदीयं किमपि न चोरयति तदा त्वामुपदेशं दास्यामि परं संन्या
सर्वे दुष्टाः संति अतः कस्यापि विश्वासो न कार्यः एवं श्रुत्वा ब्राह्मणः कथयति स्वामिन् लोका दुष्टाः मुखेन सत्यव
दंति परं कृतं न ज्ञायते एवं श्रुत्वा सन्यासी उवाच त्वं मत्छिष्यो भव परं दुष्टः मा भूयात् पश्चात् सन्यासिनो मत्रो दत्तः
पश्चात् सोपहर्निशं सेवां करोति मध्याह्ने स्वभोजनं कृत्वा याति सेवामविच्छिन्नां करोति एवं सेवकर्मे कंगतं तत

MEMORIAL

पिनधीरयति एकदा स्ववस्त्रे तृणं दृष्ट्वा पश्चादागत्य कथयति स्वामिन् त्वामृते ममापराधः त्रमेण तृणमागतं स्व
तो त्वत्पादौ वंदितौ ममोपरि कृपा कार्या तच्छ्रुत्वा संन्यासिनोक्तं तृणस्य को दोषः परं एवं कृत्वा किमपि गृहीतम
न्यत्र नास्ति ततो ब्राह्मण उवाच स्वामिन् मत्परिग्रहं ज्ञास्यसि यूयं सर्वविनाशी भवतां पार्श्वे किं चौर्यवस्तु अ
न्यथा चौरीं करोमि तर्हि गृहस्थ एव कथं भो ज्ञामि अतो त्वया मद्विश्वासो विधेयः एवं विश्वासबीजमारोपितं एवं
श्रुत्वा स च आषाढभूतिं धीरयति परं संन्यासी कंथां यत्नेन रक्षति एवं वर्षचतुष्टयं जातं परमवकाशं न गच्छति पश्चा
द्विचारयति यदयं मां न धीरयति तर्हि एनं विषं दत्वा मारयामि अन्यथा रात्रौ सुप्ते सति द्रव्याकृष्टामि परं संन्या
सी दीक्षानाथे अस्तं गते भगवान्निःसरति भित्तिविदारणावकाशो नास्ति केन दत्तं न रक्षति एवं जाते सति एकदा न्य
(पुराद्विष्णुशर्मणः आमंत्रणमागतं ततो आषाढभूतिना सह मतो विष्णुशर्मा मार्गे गच्छन् एका नदी आगता तस्यास्त
पकंठे कंथामुत्तार्याषाढभूतिं दत्वा कथितं त्वया सम्यक् यत्नेन रक्षणीया अस्याः कंथायां न विलोकनीयं अहं
दीर्घशंकार्थं गच्छामि पश्चात्स्नानं करिष्यावः एतस्यां मध्ये त्वमवलोकनं करिष्यसि तर्हि त्वं नरसिंहो न भविष्यति।
एवं कृत्वा त्वत्करे कंथां दत्वा संन्यासी गतः पश्चात्संन्यासी दीर्घशंकां कुर्वन्नत्विलोकयति तत्र मेषोपरस्परं युद्धं
कुर्वतः अन्योन्यमास्फालनतश्शिरोभ्यां रुधिरं निःसरति तत्तद्रुधिरं पातुमेको जंबुकस्तयोरंतरे प्रवेशं करोति एवं
द्विवारं चतुर्वारं भक्षणं कृत्वागतः एकवारं यावत्तयोरंतरं मध्ये प्रविशति तावदन्योन्यशिरस्फालनेन तत्क्षा। २९
णं पंचत्वं गतः ततानंतरं विष्णुशर्मापि तत्रतः परिडपकंथे आगतः तत्रागत्य यावत्पश्यति तावत्तत्केवला दृष्ट्वा
कंथा तां दृष्ट्वा रोदनमारब्धं योगिना शिरस्यास्फालनं कृत्वागतचैतन्यः सन्भूमौ पपातः घटिकाचतुष्टयानंतरं सं
ज्ञामाप्य ततस्ततो विलोकयति किमपि न दृश्यते अत्यंतं दुःखितो गतः पश्चाद्विचारितं यद्युदनेन किं न वति अत्रा
पि गंतव्यं एवं विचिंत्य यावन्मार्गे गच्छति तावदेको कैवर्त्तमद्यं त्यांति आनंदमयं देहं कृत्वा नार्यया सह स्थितः त

त्रागत्य योगी वदति रे भ्रातः वयं तेऽतिथयः स्मः कापि भक्तिः कार्या यदा त्रौ अतिथिरागतः तस्य पूजां न करोति तर्हि पुण्य
मादाय गच्छति तदुक्तं अतिथिर्गृहमायातं पूजां नैव करोति यः आजन्मसंचितं पुण्यं सर्वमादाय गच्छति १ तच्छ्रुत्वा कैव
र्त्तः स्वनार्यां कथयति त्वमेनं योगिनं स्वगृहं नीत्वा अन्नस्थलं शयनाय देयं जटिलस्य त्वयेति संनाथ्य स्वगृहं प्रेषिता अन्य
च्च कथितं अहमपि त्वत्सक्षणाय मांसमानयिष्ये एवमुक्त्वा कैवर्त्तस्तत्रैव स्थितः सा च स्वगृहे आगत्य जटिलस्य त्रुटितं मंच
कं दत्वा कथितं स्वामिन्नेतन्मध्ये शयनं कार्यं त्वया अहंतु अस्मद्भगिनीगेहं गच्छामि एवमुक्त्वा स्वयं व्यभिचारकर्मकर्तुं य
दृच्छति तावन्मार्गे मिलितः स्वकीयः स्वामी मद्यपिवर्त्तीत अतो पदे पदे प्रतन्सन् गानं करोति स्वातमानं श्रुत्वा पलायिता
अग्रतो गेहमागत्य स्थिता सोपि गृहे आगतः तं दृष्ट्वा कथयति रे रंडे कुत्र गता भूत बहूदिनाः संजाताः त्वया विचेष्टितं क्रि
यते अद्य त्वां शिक्षां न परमद्य त्वां नमो ज्यामि एवमुक्त्वा पादप्रहारादिकं कृत्वा मार्स्तंभे बंधिता कैवर्त्तः सुप्तः
घटिकाचतुष्टये संजाते निद्रां गतः ततो नंतरमेका कापि नापिकनारी तस्याः कैवर्त्तकः भार्यायाः दूतीवर्त्तते सागता रे भगिनि।
वणिक्पुत्रस्त्वत्पंथानं पश्यति कथमत्र स्थिता कैवर्त्तनारी वदति मदवस्थां पश्य अर्ये किं करोमि इति वदति यन्नवस्थ।
नेमां बद्धा अत्र मे कंत्वया गंतव्यं तत्र ततोनंतरं तां दूती बद्धा तत्र संकेतस्थले गता तत्र गत्वा यामद्वयपर्यंतं स्थिता कौमारे त
दा स्वगृहे कैवर्त्तो जागरूकः संजातः भार्यायाः आह्वानं कृतं कथितं चरे रंडे अद्यारभ्य गमनं न करोमि एवं वदत्वां मोक्ष्या
मि नापिकनार्या चिंतितं अहं प्रत्युत्तरं ददामि तर्हि मत्स्वरं ज्ञास्यति तदा तां भनं करिष्यति अतो मौनीकृत्य स्थिता पश्चात्कै
वर्त्तेन रुष्टेन शस्त्रं प्राप्य पश्चाद्गृहयित्वा घ्राणछेदः कृतः तथापि किमपि नोक्तं ततो निद्रां गते कैवर्त्ते सा आगता तत्रागत्य दृष्टं तया।
उक्तं कथितं आर्ये किं कार्यं देवपतिना वैपदार्थः एवं न विष्यति पश्चात्कैवर्त्तिकीं तत्र बद्ध्वा स्वयं दूत्यपि गता ततोनंत ३०
रं कैवर्त्तोपि जागरूकः संजातः तां कथयति रे दुष्टे वदिष्यसि वा न वा नासिकाछेदनानंतरं कर्णछेदं करोमि सा कथयति रे पापि
ष्ट त्वया त्वया विना पराधं मम घ्राणच्छेदः कृतः अन्यदहं सती स्यां तर्हि घ्राणं नवं भूयात् इति कपटविद्यां कृत्वा सा

मिनं कथयति रे पापिष्ठ त्वया छेदिता नासा परमेश्वरेण संधिता तच्छ्रुत्वा सोपाध्यायस्तावत्पश्यति तावद्रुधिर
प्रगतो विलोकितः अन्यन्नासिका उत्पन्ना दृष्टा पश्चात् तेः खंडापयन्मया न मन्नकृतं रे सा क्षिम मापराधो जातः क्षमस्व
अद्यारभ्य त्वया सह वादं न करिष्यामि एवमुक्त्वा सापि मुक्ता ततो नंतरं नापिकपत्नी स्वगृहं गता अन्यच्चिंतयति
तु रे ग्रे किं कर्तव्यं एवं चिंतातुरया सकलशर्वरी निर्गमिता प्रभाते नापिकः समागतो राजगृहात् तत्रागत्य जायां क
थयति रे प्रिये कोस्थली देहि तया पि एकं शस्त्रं निक्षिप्तं नापिकेन सा पापश्चान्निक्षिप्तः रे रंडे एकाकिशस्त्रेण किं क
रोमि ततो नंतरं सापि कोलाहलं कुर्वती पतति धरायां पतिता रे रंडा एत्र मम घ्राणछेदः केन कारणेन कृतः जन बहवो
मिलिताः तैरागत्य पिमात्कापराधः कथितः परं रंडाचरित्रं कोपि न जानाति तदा राजसेवकास्तत्काले कोलाहलं तेः
श्रुत्वा समागताः तस्यापराधं निश्चित्य तं दृष्ट्वा बध्वा राजसदसि गताः राज्ञा पृच्छितं रे दुष्ट केन कारणेन दुःकर्म कृतं ना
पिकेन किमपि नोक्तं तदा राज्ञा तथा सर्वजनैर्मिलित्वा कथितं अयं पापिष्ठः शूलिकायामारोपणीयः एवं श्रुत्वा राज
पुरुषास्तं बध्वा यावद्गच्छंति तावत्संन्यासिनागत्य राज्ञा विज्ञप्तः स्वयं दृष्टकौतुकं ततो राजा नो कथयति स्वामिन्
त्वया को न्यायः कृतः राज्ञोक्तं अनेनापराधं विना बलाया नासिका छेदिता तच्छ्रुत्वा योगी हास्यमकरोत् अन्य
त्कथितं च जंबुको मेषयुद्धेनेति श्लोकमेकं पठित्वा वार्त्तायाः कारणं कथितं एतस्या रंडायाः दूत्याः घ्राणः केवलं नेन
स्वनार्याज्ञात्वा छेदितं तच्छ्रुत्वा नापिको मुक्तः परं रंडाघ्राणकर्णछेदं कृत्वा मुक्ता एभिर्यथा स्वयं दोषाः कृतः तथा आ ३०
वाभ्यामपि स्वयं कृतः यदेणाशी बलिवर्द बलीवर्दस्तृतीयः कृतः करटक तर्हि किं कार्यं राज्ञो मदृष्ट्यं वसनं पतितं
करटकवचनं श्रुत्वा दमनकः कथयति इदृशेषु व्यसनेषु राजा पतितः यदृष्टेन सह गोष्टिं कुर्वन्सन् न किंचिदपि जा
नाति तर्हि किं कार्यमधुनाहं तदुपायं करोमि यदाज्ञः दृष्टनस्यावंतरो न वति अनयोर्मैत्री त्रोटयामि त्वज्ञास्यसि।
त्र उष्ट्रः केन कारणेन नानिपात्यते तेनोक्तं उपायं कृत्वोष्ट्रं निपात्य तस्मै देयः अन्यदा वयोर्जन्मदाणं न विष्यति ततो
द्वावपि जंबुकौ उष्ट्रसन्निधौ गतौ तेनोक्तं किमर्थमागतौ युवां शृगालावूचतुः आवयोः स्वामि क्षुधितोस्ति तेनोक्तं
न वति कोपि द्विगुणं शरीरं गृहीत्वा एकगुणं दास्यति तस्य धर्मराजा दास्यति अतस्त्वं शरीरं देहि त्वां द्विगुणं
दास्यति सिंहः पश्चात्तेनोक्तं नव उ समीचीनं पश्चात्ते त्रयः सिंहसमीपे गताः नाथोष्ट्रो वदति अहं मे शरीरं ददामि मां द्वि
गुणं देयं तेनोक्तं समीचीनमेवं न गणित्वा सिंहेनोष्ट्रं विनाशितं अन्यस्त्रं दृष्यति तत्समये शृंगालेनोक्तं अयं च मानदाहि
यदि तर्हि एनं निष्कासयामि एवं विचार्य जंबुकेनोक्तं रे नाथ ते शरीरं उच्छिष्टमस्ति स्नानं कृत्वा नक्षणीयं सिंहः स्नाना
र्थे गतः तदा जंबुको न द्यतः ततः सिंहोपि स्नानं कृत्वागतः पश्यति च दतदोष्ट्रशरीरं खंडितं दृष्टं तेनोक्तं एतत्के
न भक्षितं पश्चात् तेन शृंगालेनान्यः शृंगाल मन्मुखं विलोकितं रे रे मत्पुत्र त्वया न क्षितं स च पलाय गतः सिंहोपि याव
द्दृश्यति तावद्व्यापारी एको आगतः तस्य वृषभस्य श्रो घंटा बंधितास्ति तस्याः शब्दः सिंहेन श्रुतः तदा सिंहः सभयो ग
तः

शृंगालं स्तूपे देशधानत्वं विलोक्य कस्यायं शब्दः मचाग्रे गत्वा पश्चादागत्य वदति स्वामिन् धर्मराजो आगद
ति कथयति च येन मम मोक्षं व्यापादितं तमहं विनाशयामि अद्यायं बद्धं न त्यजति अतो द्विगुणं मांसं गृह्णामि
यदा ते शक्तिरस्ति तदा धर्मराज्ञा सह युद्धं कुरु अन्यथा मा गच्छ तदा सिंहेन विचारितं अधर्मराज्ञा सह न
मे बलं एवं विचार्य पलाय्य गतः सिंहः पश्चाद् बहुदिनपर्यंतं जंबुकेन भक्षितं अतो हं ब्रवीमि परस्य पीड
नं कुर्वन् इति॥ ॥ततो दमनके गते सति वृषभो विचारयति यदि द्वितीयस्थले गच्छामि तत्रापि मां विनाश
यति अतो एतस्य शरणे गच्छामि कदाचित् सजीवं मां मुंचति च एवं निश्चित्य सिंहसमीपे गतः सिंहेन वृषभं विलो
क्य प्रहारः कृतः ततो वृषभेन सिंहस्योदरे शृंगप्रहारः कृतः इत्थं प्रकारेण द्वौ युध्यमाने तदा करटकः दम
नकं प्रत्याह भो मूर्ख त्वं विरुद्धेन मंत्रितवान् केवलं स्वकार्यसाधकः आलोचय कदाचिद् वृषभोऽस्मत्स्वामि
नं पिंगलकं व्यापादयिष्यति तदा का गतिरावयोः कस्य बहुमान्याः कस्याग्रे स्वपांडित्यं दर्शयिष्यावः अतस्त्वा
जी धिक् मिथ्यामंत्रिणं तदुक्तं धिकं त्रिणास्य मंत्रत्वं दाक्षिण्यं बुद्धिरवच अस्मिन्नमात्यता निःराजा क्लेशसमाकुल ता
ः२ य आत्मनो हितार्थाय स्वामिकार्यस्य घातकः अमात्यरूपिणं शत्रुं वर्जयेत्तेनीतिकोविदाः ३ अतो अमात्येन रा
जहितेषु ना न वितव्यं तदैव प्रजस्य बहुश्रेयं प्राप्नोति यथा बलभद्रः नग्नः क्षपणको दग्धः पार्थिवो मीमुखी कृतः अ
मात्यैवोन्नतिं नीतो बलभद्रेण मंत्रिणा २ दमनक आह कथमेतत् करटकः कथयति उत्तरस्यां दिशि अयोध्या ४४
नाम नगरमस्ति तत्र सुरथो नाम राजा राज्यं करोति तस्य बलभद्रो नाम मंत्री वर्तते एकदा लोकैरागत्य विज्ञप्तो रा
जा हे महाराज वने चौरा बहवो वर्तंते तैरुपद्रवः क्रियते परं च व्याघ्रा अपि बहवो जाताः सति कस्यापि आज्ञा दे
या तेषां विनाशाय तच्छ्रुत्वा राजा प्रधानं प्रत्याह भो मंत्री त्वं बलं गृहीत्वा दुष्टविनाशनाय गच्छ अमात्योपि तद्वचो
गी कृत्य महतीं सेनां गृहीत्वा प्रचलितः ततो नगरे एकः क्षपणकः समागतः तेन सर्वजनामोहिताः कृत्रिममंत्रयंत्र

तंत्रजटिकामूलिकाभेषजवशीकरणमोहनोच्चाटणजोशीवैद्यकथाप्रस्तावनादिभिः राजा वशीकृतः धूर्तेन द्विल्वा सर्वे लो
काः स्वांकीयाः कृताः राज्ञो गृहे नित्यं समायाति एकदा तृतीयप्रहरे आगत्य स्थितः राज्ञा पृष्टः भो स्वामिन् कथं समये
ऽत्र घनं जातं ततो क्तं राजन्नहमद्य दिने स्वर्गं गतोभूवं तत्र मया त्वत्पौष्टिकृतातः दादेवांगनानि सक्तं यद्राजात्र कथं
नायाति मृत्युलोके केनोपायाः संति वयं स्वर्गसुखं दर्शयिष्यामः तदाकर्ण्य राजाह अन्मां स्वर्गं नय पश्चात् क्षपणकेनोक्तं
एको मंत्रः दृढ ग्रोऽस्ति येन जप्यमानेनास्तं तदितरक्षेत्त्वा स्वर्गगमनं भवति ततो राज्ञा क्षपणकस्य सेवा प्रारब्धा अन्यत् कथितं
स्वामिन् इमां विद्यां शिक्षापय मां राज्यभारोन्मुक्तः प्रधानानिश्चयं मपि न गृह्णाति तदा बलभद्रः समायातः तेन सर्वसमाचा
रो ज्ञातः पश्चात् प्रधानो राजांतिकं गतः तत्समये राजा क्षपणको वार्तां कुर्वतो दृष्टो राज्ञामात्यः पृष्टः रे रे अमात्य एतस्य प्र
श्रेः स्वर्गगमनं मंत्रावर्त्तते यैः स्वर्गः प्राप्यते प्रधानो वदति स्वामिन् त्वचक्षुर्भ्यां दृष्टा वार्ता तथ्या मान्या तदाकर्ण्य राजाह
भो क्षपणक तां विद्यामेनं दर्शय तेनोक्तं दर्शयामि शृणु मंत्री राजा दंमंदिरे प्रवेशं करोमि यूयं बहिः कपाटं संरुध्य
लायां लोहकीलं प्रस्य अहं च अन्यशरीरेण स्वर्गं गत्वा गच्छामि तदाकर्ण्य प्रधानेन तथैव विहितं ततो मुहूर्ते
मात्रापगमे मंत्रिणा प्रोक्तं देव कस्यां वेलायां आगमिष्यसि आह पार्थिवः किमिति त्वरयसे यतो मो कलेवरं म
विकाम्यां तरस्थं कृत्वा अन्येन दिव्यशरीरेण आगच्छति अमात्याह यदि सत्यमिदं तदानीयतामग्निकाष्ठानि च यानि
चयेनेमां मठिकां दाहयामि नृपतिराह किंनिमित्तमिति तेनोच्यते स्म देवास्मिन् कलेवरे दग्धे तेनैव सुरलोका
यात्रिदिव्यनाशरीरेण युष्मत्याश्वर्वर्ती भवति ति श्रूयते चैतत् राजगृहे नगरे देवशर्मणा नाम ब्राह्मणः प्रतिवसति
स्म तस्य ब्राह्मणी निरपत्या प्रतिवेश्मि कानां कानां नदृष्ट्वा ह्रष्टांसंसरोद अथैकस्मिन् दिने ब्राह्मणः सर्वमनुष्यो
मसब्धः ब्रह्मर्षिः समायात स्तेनोक्तं भो नारायणान्वितस्ते पुत्रोत्पविष्यतीति श्रुत्वा परमप्रमोदात् प्रार्थ्यमाणहृदया ब्रा
ह्मणी आतिवर्या तस्य ब्रह्मर्षेर्यावदागमनं ती चिंतयंती क्रमेण संजातगर्भा प्रसवकाले सर्पं सुषुवे तं दृष्ट्वा त्यजत

मयमित्यशेषपरिजनवचनान्मनाहत्य पुत्रगृह्यस्थापयित्वा पुत्रवासत्या क्षिप्य जङ्घाचिंतांडे व्यवस्थाप्य क्षीरेण वर्द्धि
ति । निर्मपट्टे ह्रितशरीरः कतिपयैरेव दिवसैः प्रौढीकृतः एकदा तु ब्राह्मणी बाष्पावसन्ननयना प्रातिवेश्मिकपुत्रवि
वाहोत्सवमवलोक्य भर्तारमब्रवीत् सर्वथैव मम मोपरितवावज्ञा येन मम दारकस्य विवाहोत्सवाय न यतसे तच्छ्रुत्वा ।
ब्राह्मणः प्राह आर्ये यदि परं पातालमनुप्रविश्य वासुकिमभ्यर्थयामि ततस्तत्पुत्रविवाहो न विधास्यति मूढेको ऽस्यापि
स्वां दारिकां यच्छत्येवमुक्तेपि विशेषदीनाननां ब्राह्मणीमवलोक्य तत्परितोषकृते पाथेयं गृहीत्वा प्रियाया लज्जया
बहुदेशांतरं पर्यटन् कतिपयैर्दिवसैः इरदेशावस्थितं नटनगरं नामाधिष्ठानं प्राप्तः तत्र च परिज्ञातस्य गृहवसुस्वरव
संभ्रमणीय संबंधिगृहे स्नानभोजनादिभिरुपचर्यमाणस्तां निशां सुप्तवान् ततः प्रभाते तं ब्राह्मणमनिवाद्य या
वत्सुस्थितस्तावत्तेन ब्राह्मणेनाभिहितं किमर्थमिहागतः अत्रवाया स्वामी सुकृतः प्रवाद स्वपुत्रयोग्यां दारिका ।
मन्वेष्टुमहमागतः इति श्रुत्वा ब्राह्मण उवाच यद्येवं ततो मम भार्यसुन्दरा दारिकास्ति तां च मम पिपासुविलुप्तां गृहाण ।
मियं स्वपुत्राय इत्यभिहिते ब्राह्मणस्तां दारिकां सपरिजनां गृहीत्वा स्वस्थानं प्रत्यागतः अथ तस्याः परलावण्याद्भु ।
तगुणोपेताम साधारणगुणरूपसंपदं मवलोक्य विस्मारितनयना जानपदास्तत्परिजनमूचु कथं त्वं वचिरीहगां
कन्यारत्नं सर्पस्योपपादितमिति श्रुत्वा च सर्वैरेवोद्विग्नहृदयैस्तस्या महत्त्वमैरभिहिता अथैव बीयतामस्मद्गृहो
पविष्टान् वृद्धान् अथ कन्ययोक्तं अलमनया विडंबनया यस्मात् यतः सकृज्जल्पंति राजानः सकृज्जल्पंति साध
वः सकृत्कन्या प्रदीयंते त्रीण्येतानि सकृत्सकृत् १ किंच कृतांतविहितं कर्म यद्भवेत्पूर्वनिर्मितं तच्चाकृते अन्यथा
कर्तुं पुष्पकस्य सुरैर्यथा २ अथ ते सर्वे पृच्छंति स्म कोयं पुष्पको नाम कन्या कथयति अस्ति महेंद्रस्थाने कृशा
स्त्रागमाः प्रतिहतबुद्धिः परमलावण्यगुणपतः शुकः पुष्पको नाम अथ कदाचित्सोम महेंद्रकरतलस्पर्शसु ।
खाप्यायितशरीरो विविधस्तकानि पठन् स्वसेवासमये समागतं यमं दृष्ट्वा पकंत इति शुक आह सर्वप्राणिना

मुपकर्तायं कथमस्मात् पराक्रमत इति श्रुत्वा तैः सर्वैस्तद्भयोपशमाय अभिहितोयमः यथा किलास्मद्वचनादयं न व
तानसुको मार्यः यम आह नाहं जानाम्यत्र कालः स विष्णुरित्येवं गृहित्वा कालसमीपं गत्वा पृष्टवान् इंद्रमेवाब्रुवन्
अथ कालेनोक्तं मृत्युरेवतज्जानाति स एव जानाति अपि त्वेवमनुतिष्ठते समृत्युदर्शना तं च त्वं प्राप्नतः शुकः अ
तोहं ब्रवीमि कृतांतविहितमिति कथा २४॥ तच्छ्रुत्वा सर्वैरेवाकुलीभूतमनो भिहितपरिवारानुमतासर्पेणप
रिणीता अथ सौ नक्षिप्रवंडियापानादिक्रियाभिः सर्पमुचरी तु मारद्धा अन्यदा गत्वावयं सपीपवरकस्था पितवि
पुजान्यां तरागत्य तस्याः शयनमारूढः तयोक्तं कोयं पुरुषो कृतिः परपुरुषदृतिमत्वा न यस्मै पितसर्वांगीहारमु
छ्राय प्रस्थानममिमुखी तेनोक्ता नडोस्थीयतां अहं तव भर्ता अथ तत्प्रत्यायार्थं पेटासंस्थं शरीरमनुप्रविश्य तस्मा
त्पुनर्निर्गत्यागतः सापि ह्रस्वोच्छ्रित मुकुटकुंडलकटककेयूरांगदविभूषितस्य पादयोरपतत् पश्चात्तौ सुरतसुख
मन्वभूतां ततश्च परमहर्षात् पेन्यासहवाशीपरायणः स्वपुत्रैः सर्वजनस्यैदर्शितवान् एतन्निदर्शनेराज्ञो निवेद्य
नग्नश्रमणमवी ज्वालितवान् अतोहं ब्रवीमि नग्नः क्षपणको दग्ध इति कथा ॥२५॥ तन्मूर्खदृढ्क्षमां मंत्रिणां नवंति
नन्व ह्यहिंसाः केवलं मंत्रिमात्रव्यपदेशोपजीविनो नीतिमार्गानभिज्ञाः सर्वथा प्रकटीकृतं त्वया गतमनेन अथवा
तेन मंत्रितं नूनं तव पितास्यैवं लक्षणमासीत् उक्तं च यो यस्य वंशपितृ आचारः पुत्रस्तमनुवर्त्तते नहि केतकवृक्षस्य
भवत्यामलकी फलं १ नच स्वभावगंभीराणां विदुषां बहुनापि कालेनागंभीरं ध्रुतं रेनजायते यदि नस्वयमेव गं
भीर्य मपहाय आत्मानं छिद्रं दर्शयेयुः यत्क्वा नादपिकः पदेपि क्षिखिनामाहारनिर्गमस्थानं यदि जलदध्वनिमुदितास्त
एवमुद्धानृत्येयुः २ तत्सर्वथा किं तवास्योपदेशेन उक्तं च नानाम्यं नमयेद्दारु नाश्मनि स्यात्क्षुरक्रिया सूचीमुख्या
इवाशिष्ये नोपदेशः सुखावहः ३ आहदमनकः कथमेतत् सोब्रवीत् अस्ति कस्मिंश्चिद्वनोद्देशे वानरयूथं ता
च हेमंतकाले तिशीतविक्लवं निशामुखे रक्तयोत मपश्यत् तत्तं दृष्ट्वा ऽग्निरयमिति मत्वा यत्नादाहृत्य गुञ्जा

गैरिवाच्छाद्य प्रसारितभुजकक्षावक्षःप्रदेशान् कंडूयमानं नापमनोरथं सुखं किलानुभवति स्म अथ तत्रैकः शाखामृ
गो विशेषतः शीतार्त्तो तापितमना मुहुर्मुहुः स्तम्भे वोपायमगमत् अथ सूचीमुखी नाम पक्षिणी वृक्षादवतीर्य दैवह
तात्मघाताय तमुवाच भद्र मा किं शयतां नायं वह्निः प्रद्योतोयं अथासौ तद्वचनमनादृत्य पुनर्धमति ततस्तया प्रक
र्षान्निवार्यमाणो नोपशाम्यति किं बहुना तावत्तया कर्णाभ्यर्णमागत्य प्रबलमुद्वेजितो यावदसौ तेन गृहीत्वा शिलाय
मास्फालिता प्रथमगत्वचकैगात्रशीर्षग्रीवा पंचत्वमाप अतोहं ब्रवीमि नानाम्यं नेदारु इति कथा॥ २६॥ ॥ अथ
वा किं करिष्यति पांडित्यमपात्रे प्रतिपादितं सपिधानं घटांतस्थं प्रदीप इव वेश्मनि तन्नूनमपजातस्त्वं उक्तं च।
जातः पुत्रोनुजातश्च अतिजातस्तथैव च अपजातस्तु लोकेस्मिन् मंतव्यः शास्त्रदर्शिभिः १ मातृतुल्यगुणो जातः
अनुजातः पितुः समः अतिजातोधिकस्तस्मादपजातोधमाधमः २ किं चेदमुच्यते प्रज्ञयाति विसारिण्या यो धने
न बलेन च धुरं वहति गोत्रस्य जननी तेन पुत्रिणी ३ आपानमात्रसौदर्यं कुत्र नाम न विद्यते अत्यंतप्रतिपत्त्यासे।
दुर्लभो लंकापति जनः ४ धर्मबुद्धिरबुद्धिश्च द्वावेतौ विदितौ पुरा तनयेनापि पांडित्यात्पिता धूमेन मारितः ५ दम।
नक आह कथमेतत् सोब्रवीत् अस्ति कस्मिंश्चिन्नगरे वणिक्पुत्रौ धर्मबुद्धिदुष्टबुद्धिनामानौ सुहृदावास्तां तावद
र्थोपार्जननिमित्तं विप्रकृष्टे देशांतरगतौ अथ यो धर्मबुद्धिर्नामा तेन स्वभाग्योदयवशात् कस्यापि साधोः सर्वस्था। ४६
पितं कलशागतं दीनारसहस्रं प्राप्तं स दुष्टबुद्धिना सह संप्रधार्य कृतार्थौ चावां स्वदेशं गच्छाव इति निश्चित्य द्वावपि
प्रत्यागतौ स्वाधिष्ठानसमीपे च अथ दुष्टबुद्धिः कुटिलहृदयः स्वार्थसिद्ध्यर्थं तमाह यावदावयोरर्थः सामान्यः तावदस्म
वच्छिन्नस्नेहस्वभावः ततः एकं शतं गृहीत्वा शेषं भूमौ प्रक्षिप्य स्वगृहे प्रविशावः यतोस्य द्रव्यस्य ज्ञाने सद्धिर्भ्यां पुण्य
पापसंख्यानं भवति ततो धर्मबुद्धिना स्वभावार्द्रतयांतर्गतदुष्टाभिप्रायमविज्ञाय तथेति प्रतिपन्नं तौ द्वावपि किंचि
दादाय शेषं भूमौ गुप्तं कृत्वा नगरं तौ प्रविष्टौ अथ दुष्टबुद्धिरसद्व्ययव्यसनचिंतया मच्छिद्रागतया क्षीणप्रत्यासः

पुनरपि धर्मबुद्धिना सहापरं शतं विभक्तवान् अथ तदपि तस्य वर्षाभ्यंतरे तथैव परिक्षीणं एवं दुष्टबुद्धिश्चिंतयामास।
यदि पुनरस्तेन सह शतं विभजामि ततः किं मया कृतं स्यात् शेषैश्चतुर्भिः शतैस्तैरपि किमल्पैः तस्माद्दृष्टशतान्यपहरा
मि इति विचिंत्यैकाकी भूय मामर्थमात्रामपनीय तं भूमिप्रदेशं समीकृतवान् अतिक्रांते च मासमात्रे स्वयं गत्वा धर्म
बुद्धिरभिहितवान् भद्र शेषद्रव्यं सम विभागं कुर्व इति प्रतिपद्य धर्मबुद्धिना सह तमुद्देशं कृत्वा नत्वा कर्म कर्तुमारब्धौ
खन्यमाने भूमिभागे यदा सर्वोर्थो न दृश्यते तदा धृष्टतया दुष्टबुद्धिः प्रथमं तदेवात्मनैव रिक्तं भांडे नात्मशिरस्ताडया।
मास च कृतघ्नहृदयं नूनं धर्मबुद्धे त्वयैवापहृतं तदर्पय तस्यार्धं नो चेदहं राजकुले निवेदयिष्यामि स प्राह भो दु
रात्मन् मा मैवं वद धर्मबुद्धिः खल्वहं नैतच्चौर्यकर्माचरामि उक्तं च मातृवत्परदाराश्च परद्रव्याणि लोष्टवत् आत्मव
त्सर्वभूतानि वीक्षंते धर्मबुद्धयः १ तदा तौ द्वावपि विवदंतौ धर्माधिकारिणं गत्वा प्रद्रव्यहरणं वृत्तांतं कथयतः ततस्तौ
धर्माधिकारिभिस्तयोर्दिव्यमादिष्टं अथ दुष्टबुद्धिराह अहो मम पक्षेयं न्यायः उक्तं च विवादेन्विष्यते पत्रं तदभा।
वे तु साक्षिणः साक्ष्यभावात्ततो दिव्यं प्रवदंति मनीषिणः १ तत्र विषये वनदेवता साक्षिभूतास्ति अतोपि भवता आव
योः साध्वसाधु वा कथयिष्यति अथ तैरभिहितं युक्तमुक्तं भवता उक्तं च अंत्यजोपि यदा साक्षी विवादे संप्रजायते न त
त्र युज्यते दिव्यं किं पुनर्यत्र देवता १ तदस्माकमप्यत्र विषये महत्कौतुकमस्ति प्रत्यूषे युवाभ्यामप्यस्माभिः सह तत्र वनो
द्देशे गंतव्यं ततस्तैः द्वावपि प्रतिभुवं गृहीत्वा गृहं प्रहितौ अथ दुष्टबुद्धिना गृहं गतेन पिता प्रार्थितः तात मत्पाणिगता।
स्ते दीनारा गमिष्यंति किं तु त्वद्वचनमात्रापेक्षिणस्तिष्ठंति अतोहं त्वामद्य रात्रावदृश्यमेव पूर्वखातनिधानप्रदे
शस्थशमीतरुकोटरांतरे गत्वा स्थापयिष्यामि प्रातस्त्वया धर्माधिकारिणः प्रति साक्षिकं विधेयं ततः पित्राभिहितं पुत्र
विनष्टावावां यत्कारणमनुपाय एषः साधु चेदमुच्यते उपायं चिंतयेत्प्राज्ञः अपायमपि चिंतयेत् पश्यतो बकमूर्ख
स्य नकुलैर्भक्षिता बकाः १ दुष्टबुद्धिरब्रवीत् कथमेतत् स पिता कथयति अस्ति कस्मिंश्चिद्वनोद्देशे बकः कुटुंब

मनाथो वटवृक्षः तस्यांतःकोटरे कृष्णसर्पः प्रतिवसति स्म स च बकबालकान् अजातपक्षानपि सदैव भक्षयन् कालं नय
ति अथैको बकः सर्पभक्षितशिशुवैराग्यात् सरस्तीरमासाद्य बाष्पासारमुत्सृजन् अधोमुखस्तिष्ठति एवं तथाभूतं
मवलोक्य एकः कुलीरकः प्रोवाच माम किमद्य तेवस्था बक आह भद्र किं करोमि मंदभाग्योहं मम बालकान् अजा
पक्षाणि वटकोटरनिवासिना सर्पेणाद्य भक्षितानि तद्दुःखदुःखितोहं रोदिमि तत्कथय कश्चिदुपायस्तन्नाशे तदा कर्ण्य
कुलीरकश्चिंतयामास अयं तावदस्माकं जातेः सहजः वैरी तत्तथा इत्थं सत्यानृतमुपदेशं प्रयच्छामि यथान्येपि बकाः सं
क्षयं यांति उक्तं च नवनीतसमां वाणीं कृत्वा चित्तं सुनिर्दयं तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा १ आह च मामैवं य
तर्हि मत्स्यमांसखंडानि नकुलबिलद्वारात् सर्पकोटरं यावत् प्रक्षिप येन तन्मार्गेण गत्वा दुष्टसर्पं विनाशयति तथानुष्ठि
ते नकुलेन मत्स्यमांसखंडानुसारिणा तं दुष्टसर्पं निहत्य तेपि च तद्वृक्षाश्रयाः सर्वे बकाः शनैः शनैर्भक्षिताः अतोहं ब्रवी
मि उपायं चिंतयेत् प्राज्ञ इति कथा ॥२१॥ ॥अथ दुष्टबुद्धिना तत्पित्रवचनमाकर्ण्य तस्मिन् वृक्षविवरे गत्वा अ
ष्टोवपिता स्थापितः अथ प्रातः स्नात्वा पापबुद्धिर्धौतवस्त्रो धर्मबुद्धिपुरःसरो धर्माधिकारिभिः सह तां शमीमेत्य
तारस्वरमुवाच आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जा
नाति नरस्य वृत्तं १ भगवति वनदेवते आवयोर्मध्ये यश्चौरस्तं कथय अथ शमीकोटरस्थदुष्टबुद्धिपिताह भोः ४१
भोः शृणुत धर्मबुद्धिना हृतमेतद्धनं तच्छ्रुत्वा ते सर्वे राजपुरुषा विस्मयोत्फुल्लनयना यावद्धर्मबुद्धेर्निग्रहणाय चि
तंसात्स्वं दृष्ट्वा धर्मबुद्धिं विचारयंति तावद्धर्मबुद्धिना वह्निभोज्यद्रव्ययुक्तमवेष्ट्याक्षं शमीकोटरं वह्निना संदीपि
तं अथ ज्वलति तस्मिन्नर्धदग्धशरीरः स्फुटितदृष्टिः करुणमाक्रंदन् पापबुद्धिपिता शमीकोटरान्निश्चक्राम।
ततस्तैः सर्वैः सो किमादमितपृष्टः स पापबुद्धिविचेष्टितं सर्वमिदं कथयामास अहं मतो ब्रवीमि धर्मबुद्धिः कुबुद्धि
श्चेति॥ कथा॥२२॥ आख्याते पुनः करटकोब्रवीत् धिङ्मूर्ख वातिसयेपांडित्येन त्वया दग्धः स्वयंशः साधु चेद

मुच्यते लवणजलांता नद्यः स्त्रीभेदांतानि बंधुवचनानि पिशुनजनांतं गुह्यं कुपुत्रांतानि च कुलानि अपि च यस्मात्ता
वन्मनुष्यस्य कस्मिन् मुखे जिह्वाद्वयं न भवति कस्तस्य विश्वासमुपैति द्विजिह्वमुद्वेगकरं क्रूरमत्यंतनिष्ठुरं खलस्या
हेस्य वदनमपकाराय केवलं १ तन्ममाप्यनेन चरितेन भयमुत्पन्नं स्यात् मा गाः खलेषु विश्वासं ममैते सर्वसंस्तुताः
चिरकालोपजीव्योपि दशत्येव भुजंगमः २ अपि च चंदनादपि संभूतो दहत्येव हुताशनः विशिष्टकुलजातो
पि यः खलः खल एव सः ३ अथवा स्वभाव एवायं खलानां उक्तं च परदोषकथाविचक्षणः परनिंदाकथने च तत्परः
स्वयमेव हि दैवदंडितः पिशुनो विश्वनाशं प्रभितः १ नूनं तस्य सपुटे जिह्वा वज्रोपमा मनुष्यस्य यस्य परदोषकथने
सद्यो विशीर्यते न शतधा १ माभवत्कस्य पापं परहितनिरतस्यासि हस्य यस्य परदोषकथने जिह्वा मौनव्रतं चरति १
तत्सर्वथा परीक्ष्य संगतं कार्यं उक्तं च विद्वानृजुरपि गम्यो विदुषि शठे नाप्रमादिना भाव्यं ऋजुमूर्खस्त्वनुकंप्यो मूर्ख
शठः सर्वथा त्याज्यः २ तन्न केवलं त्वया स्वयमात्मीयवंशो विनाशाय पतितं किं पुनरधुना स्वामिनोपि तत्स्वामि
नमप्येवं अवस्थां प्रापयसि तस्मान्न वान्यो जनो जीर्णशरणभूत एव उक्तं च तुलां लोहसहस्रस्य यत्र खादंति मूषकाः
श्येनः कुंजरं हरेत्तत्र किं चित्रं यदि बालकं ३ दमनकः प्राह कथमेतत् करटकः कथयति अस्ति कस्मिंश्चिदधि
ष्ठाने नाडुको नाम वणिक्पुत्रः स च वित्तक्षयाद्देशांतरगमनमचिंतयत् यतः यत्र देशेथवा स्थाने भोगा भुक्ताः
स्ववीर्यतः तस्मिन् विभवहीनो यो वसेत्स पुरुषाधमः १ तथा च यत्राहंकारयुक्तेन चिरं विलसितं पुरा दीनं
वदति तत्रैव यः परेषां स निंदितः २ तस्य च गृहे पूर्वपुरुषोपार्जिता लोहमय सहस्रघटिता तुलास्ति तां च श्रेष्ठी
लक्ष्मणस्य न्यासभूतां कृत्वा देशांतरं गतः ततः सुचिरं देशांतरेषु भ्रमित्वा पुरं प्रमागत्य लक्ष्मणश्रेष्ठीनं जगाद भो
लक्ष्मण समर्पय मे निःक्षेपतुलां ततो लक्ष्मण आह भो नाडुक त्वदीयतुला मूषकैर्भक्षिता तच्छ्रुत्वा नाडुकः प्रा
ह लक्ष्मण नास्ति दोषो यदि सा मूषकैर्भक्षिता यतः ईदृगेवायं संसारो न किंचिदत्र शाश्वतमस्ति परमहं स्नाना

र्थं नद्यां गमिष्यामि ततः स्वं धनदेवनामानं स्वपुत्रं स्नानोपकरणमादाय सह मे प्रेषय सोपि लक्ष्मणो निजचौर्य
शंकितः पुत्रं धनदेवमुवाच वत्स पितृव्योयं नाडुकः स्नानार्थं नद्यां यास्यति तद्गम्यतां अनेन सह स्नानोपकर
णमादायेति अहो साध्विदमुच्यते न भक्त्या कस्यचित्कोपि प्रियं प्रकुरुते नरः मुक्त्वा भयं प्रलोभं वा कार्यकारणमे
व च १ तथा च अत्यादरो भवेद्यत्र कार्यकारणवर्जितः तत्र शंका प्रकर्तव्या परिणामे न यावहः २ अथासौ लक्ष्म
णपुत्रो नाडुकेन सह स्नानोपकरणमादाय प्रहृष्टमना नद्यां गतः अथ नाडुको नद्यां स्नात्वा लक्ष्मणपुत्रं धनदेवं
गिरिगुहायां निक्षिप्य तद्द्वारे बृहतीं शिलां दत्त्वा लक्ष्मणगृहमागतः लक्ष्मणेन दृष्टः भो नाडुक मे पुत्रो धनदेवः त्वया
सह गतः स्थितवान् नाडुक आह भो लक्ष्मण नदीतीरात् श्येनेनापहृतः लक्ष्मण आह भो नाडुक मिथ्यावादिन् कथं
कायं धनदेवं श्येनः कथमपहरति नाडुकोऽब्रवीत् मूषकाः पुनर्लोहमयीं तुलां न खादयंति तदर्पय मे तुलां यदि पु
त्रेण कार्यं एवं विवदंतौ तौ राजद्वारमुपागतौ ततो लक्ष्मणस्तारस्वरेण प्रोवाच भो अब्रह्मण्यमब्रह्मण्यं वर्तते मम पुत्रो ध
नदेवनामा नाडुकेनापहृतः अथ धर्माधिकारणस्थैर्नाडुक उक्तः भो समर्पय लक्ष्मणपुत्रं नाडुकोऽब्रवीत् किं करोमि
पश्यतो मे नदीतीरात् श्येनेन नीतः ते ऊचुः भो नाडुक सत्यमुक्तं त्वया किं श्येनः पंचदशवार्षिकं पुत्रमपहर्तुं शक्नोति ५८
ततो नाडुको विहस्य प्रोवाच श्रूयतां मद्वचनं तुलां लोहसहस्रस्य खादंति यत्र मूषकाः श्येनः कुंजरं हरेत्तत्र किं चि
त्रं यदि पुत्रं हृतः १ ते प्रोचुः किमिदं नाडुकोपि तेषां तुलावृत्तांतमकथयत् १ तं श्रुत्वा ते विहस्य कस्य तुलां कस्य
पुत्रं तं समर्पयामासुः अतोहं ब्रवीमि तुलां लोहसहस्रस्येति कथा ॥२०॥ ॥करटकः पुनरब्रवीत् तन्मूर्ख पिंग
लिकं कृतं संजीवकप्रसादमसहमानेन त्वयैतन्नूनं कृतं यदि साध्विदमुच्यते प्रायेणात्मकुलान्वितं कुलीनं
स्त्रीव छलं दुर्जनाः दातारं सधनं कृतघ्नमृजवः प्राप्तं स्त्रियं कातराः वैरूप्यापहताश्च कांतवपुषं सौख्यास्थितं दुः
स्थिताः नानाशास्त्रविशारदं च पुरुषं निंदंति मूर्खाः सदा १ मूर्खाणां पंडिता द्वेष्या निर्धनानां महाधनाः व्रतिनः

पापशीलानां दुश्चरित्राः कुलस्त्रियः २ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति भूतानि निग्रहः किं करि
ष्यति ३ तस्यैवमुक्तमुपदेष्टुं यः शास्त्रोक्तं सदैव गृह्णाति न शुभा पाषाण इव शून्यहृदयो निश्चेष्टः किं तवोपदेशेन मू
र्ख त्वया सह संवाद एव न युज्यते कदाचित्त्वत्संपर्कादस्माकमनर्थः स्यात् उक्तं च मूर्खेण सह संवादो देशे ग्रामे गृहे
पुरे अनर्थायैव संभाव्यो वयं वदामो विनेवहि १ वरं जलधिपतनं वरं ज्वलनसेवनं न वै विवेकहीनेन मूर्खेण सह
संगतं २ जनाः तेषु प्रसंगास्तान् गुणदोषान् साध्वसाधुसंपर्कान् नानादेशविचारी वातश्च शुभाशुभानाघ्राति २ साधु
चेदमुच्यते माताप्येका पिताप्येको मम तस्य च पक्षिणः अहं मुनिभिरानीतः स च नीतो गवाशनैः १ गवाशनानां स गि
रः शृणोति राजन्नहं चाविरतं मुनीनां प्रत्यक्षमेतद्भवतापि दृष्टं संसर्गजा दोषगुणा भवंति २ युग्मे सोऽब्रवीत् कथ
मेतत् करटकः आह अस्ति कस्मिंश्चित्पर्वतैकदेशे शुकी प्रसूता तस्याः शुकौ सुतौ संजातौ अथाहारार्थं निर्ग
तायाः शुक्याः तौ पुत्रौ व्याधेन गृहीतौ तयोरेकः कथमपि दैववशादुत्पतितः द्वितीयकः पंजरके स्थापयित्वा पाठ
यितुमारब्धः अपरः शुकः परिभ्रमता ऋषिणा दृष्टः ततस्तेन संगृह्य स्वाश्रमपदमानीय पोषितः एवं कालेतिवर्तमा
ने कश्चिद्राजा स्वसैन्याद्दूरेणापहृतस्तद्वनोद्देशमागतो यत्र व्याधाः परिवसंति अथ राजानमागतमालोक्य पंजर
स्थः शुकः कलकलशब्दमकरोत् अथ स्वामिन् एष कोपि हयारूढः आगच्छति अथैनं बद्ध्वा व्यापादयेति अथ राजा
तद्वचनं श्रुत्वा भयतो द्रुततरं वाजिनं प्रेषितवान् अथ यावद्दूरादन्यद्वनं गच्छति तावत्पश्यति मुनीनामाश्रमे तत्रापि
पंजरस्थः शुकोऽब्रवीत् एह्येहि राजन् विश्राम्यतां शीतलानि पिबोदकानि फलानि स्वादय निचमदीय भोभो ऋषयः अ
मावर्धपाद्येन पूज्यतां विश्राम्योस्मिन् शीतले द्रुमतले एवं श्रुत्वा राजा तीव्रोत्फुल्लनयनो विस्मितमनाः किमिद
मिति चिंतितवान् शुकं चाप्रच्छत् मया हतोऽन्यवनोद्देशे त्वत्सदृशः शुको दृष्टः स क्रूरस्वरूपो बध्यतां पातयत इत्येव
मवदत् अथ राज्ञो वचनमाकर्ण्य शुकेन यथावृत्तमात्मनो वृत्तांतं निवेदितं अतोहं ब्रवीमि संसर्गजा दोषगुणा

भवंति कथा॥ ३०॥ अतः संसर्गस्त्वया सह न श्रेयान् उक्तंच पंडितोपि वरं शत्रुर्न मूर्खो हितकारकः स्वद
र्थेमृतश्चौरो वानरेण हतो नृपः २ दमनक आह कथमेतत् करटकः कथयति अस्ति कस्मिंश्चिद्राजपु
त्र एकत्र वणिक्पुत्राणां सह मैत्री समागतः इत्यहं विविधग्रामविहाररतिविनोदविलासक्रियाभिरेव सुखेन
वति धनुर्वेदगजाश्वारोहणवादनमृगयाक्रीडाविमुखः प्रतिदिनमास्ते अथान्यदा राजनीति विमुखेन
वानिति पित्रा निरस्तोतिजाप्यमानः दुःखं मित्रयोर्निवेदितवान् तावाहतुः आवयोरपि स्वकर्मविमुखयोः पि
तिपितरौ नित्यमेवास्मान् बहुजल्पतः तद्दुःखेन वन्मैत्रीसुखेन नावाभ्यामेतानि दिनानि ज्ञातं इदानीं भवानप्य
नेन दुःखेन दुःखितः दृष्ट्वा दुःखिताववां सहजौ अथ राजपुत्रोब्रवीत् नखल्वपमानितानामिह स्थातुं युक्तं।
अतः सर्वे एव स्वकीयदुःखान्निर्गत्य क्वाप्यन्यत्र स्थास्यामः यतः वीरव्रतस्य विद्यायाः पुण्यानां शक्तिशीलयो
: परीक्षा मानिना ज्ञेया स्वदेशत्यागतः फलैः १ अथ तथानुष्ठिते क्वापि गंतुं युक्तमिति चिंतयंतीस्म ततो वणिक्
पुत्रेणाभिहितं खल्वर्थं विना क्वापि नाभिमतसिद्धिर्न भवति रोहणाचलं गच्छामः तत्र रत्नान्यासाद्य सर्वमनोरथाननु
भविष्यामः इति समीचीनमेनमर्थं सर्वे प्रतिपद्य रोहणाचलं गताः तत्रानागप्रवसादेकैकं महामूल्यरत्नमासादितं
अथ ते पर्यालोचितवंतः कथमस्माभिरितो बहुप्रायासेनाटवीमार्गेण प्रस्थितै रेतानि रत्नानि रक्षणीयानि अथ ४९
वणिक्पुत्रोब्रवीत् ननु मंत्रीपुत्रोहं तन्मयात्रोपायश्चिंतितः अथ तानि रत्नानि स्वीयस्वीयोदरांतः प्रक्षिप्यनीया
ते यथा सार्थकस्य चौरादिकस्य योग्या न भवामः इति निर्णय भोजनवेलायामन्नकवलांतरे एकैकानि गलितानि
एवं चानुष्ठीयमाने तत्र पर्वतोपत्यकायामलक्षितो विश्रांतः कोपि पुरुषस्तान्दृष्ट्वा चिंतयामास अहो मया
त्र रोहणाचले रत्नार्थिना बहूनि दिनानि पर्यटता क्षीणमात्रमप्यत्या न किंचिल्लब्धं तदेतैः सह गच्छामि यतो यत्रैव मा
र्गे जातश्रमा निद्रायास्यंति तत्रैषामुदराणि विदार्य रत्नान्यपहरिष्यामि इति कृतनिश्चयः पर्वतादवतीर्य तो।

षां गच्छतां पृष्ठतो लग्नोब्रवीत् भोभो महापुरुषा न शक्तोस्म्यहं एकाकी भीषणाटवीमुल्लंघ्य स्वदेशं गंतुमिति भवतां सा
र्थे मिलिष्यामि तेपि सहायवृद्धिमिच्छंतः तथेति प्रतिपद्य सहैव गंतुमारब्धाः अथ तस्यां महाटव्यां गिरिगहनप्रदेशा
श्रिता मार्गायन्नाभिल्लपल्ली तिष्ठति तत्परिसरेण गच्छतां तेषां पल्लीपतिगृहे कौतुकवशाद्विधृतनानापक्षीणां मध्ये
कः पंजरस्थो वृद्धपक्षी शब्दं चकार। स च पल्लीपतिः समस्तपक्षिरुतभाषाज्ञः शब्दः पक्षिरुतार्थं विचार्य प्रहृष्टमना
: स्वभृत्यानब्रवीत् यत्किलैष पक्षी एवं कथयति मार्गे गच्छताममीषां पथिकानां पार्श्वे महामूल्यानि रत्नानि संति त
तो गृह्णीतेति तद्देतान्निधृत्यानयतः अथ तथानुष्ठिते तेन पल्लीपतिना स्वयमुद्ग्राह्य वितानामपि तेषां पार्श्वे किमपि न
प्राप्तं ततो मुक्तकक्षाः पत्रमात्रपरिच्छदाः गंतुमारब्धाः तथापि पक्षी तथैव च पुनर्विरौति तच्छ्रुत्वा पल्लीपतिना पुनरानायि
रा॰श्री ताः ततः सर्वेषां संशोध्य मुक्ताः तथापि यावद्गच्छंति तावत्तथैव तारस्वरं तस्मिन्पक्षिणि भोदरति पुनरप्याकार्य पल्लीप
तिना ते पृष्टाः यथा किल रत्नानि कथयंति तत्क्वनीतानि अथ ते ब्रुवन् नह्यस्माकं पार्श्वे रत्नानि विद्यंते संप्रति संध्या
संजाता प्रभाते रत्नकारणाद्वस्मदुदराणि विदारयिष्यामि इत्याक्षिप्य कारापवरके क्षिप्ताः ततश्चौरश्चिंतयामास।
प्रातः खलु पदममीषामुदरेषु विदार्यमाणेषु पल्लीपतिस्तादृशाः रत्नानि प्राप्स्यति तदा निश्चितं दुरात्मा मदीयमपि जठ
रं जोनात्याटयिष्यति तद्यथा कथंचिन्मम मृत्युरेव तत्किमहं करोमि उक्तंच अवश्यं गत्वरैः प्राणैः मृत्युकाले महात्म
नां परोपकारश्चेत्कश्चित्सिद्धश्चेदमृतोपमं २ तदस्मात्मोदरं प्रथममेव विदारणाय दत्वा स्ववध्यानप्येतान् रक्षामि
यतः आदावेव विदारिते मदीयोदरेप्यनिपुणमपि विक्ष्यमाणे दुरात्मायं न किंचिदासादयिष्यति तदाछिन्न
संशयः सन्न नस्त्वत एवामीषामुदरविदारणं निस्त्रिंशोपि करिष्यतेति एवं सति तेषां प्राणदाने धनादप्यधिकं मम पर
र कीर्तिरिह लोके अन्यजो केवजन्मशुद्धिश्च भविष्यति तस्मात्मकालमप्येतदेव किंचित्पंडितमरणमिति अथा
तिक्रांतायां रजन्यां प्रातरेव पल्लीपतिना तेषां जठरविदारणे प्रारब्धे यश्चौरः सो हियोजितांजलिर्भूत्वा तं च विज्ञ

वान् नसक्तोस्म्यमीषां चाहरणमुदरविदारणं दृष्टं अतः प्रसीद अहमेव ममोदरविदारणं कर्त्तव्यम्। ततः प्रक्षी-
णदयावशात् तथा प्रतिपन्ने विदारितेपि सति तस्योदरे न किंचिदुत्तममासादितं ततोसावनुशोचत् कष्टं भोः का-
यापि पक्षीहत विचारणमात्रेणाहं हितस्तेनेन महद्वेशशंकृतं। यथाग्रजवरं तथाशेषाणामपि न किंचित् संभ-
याम्पि इत्युक्त्वा त्रयोप्यहतशरीरामुक्ताः तैः सत्वरमटवीमुल्लंघ्य ग्रामं किंचिदधिष्टानं अतोहं ब्रवीमि स्ववधार्थि-
तस्ये प्रकृति कथा॥२१॥ अथ ते तत्राधिष्टाने वणिक्पुत्रमग्रेकृत्वा त्रीण्यपि रत्नानि विक्रीतानि बहुमूल्यधनर्थ-
न्यानानीय राजपुत्रासैग्रे मुक्तंच अनेनमंत्रित्वे नटपुत्रं संस्थाप्य तद्विषयाधिपतेः राज्यमाच्छेत्तुं पर्यालोच्य वणिक्-
पुत्रो मांडागारित्वे नियोजितः अथ स्वबुरतरकरिसुरगबलं प्रतिसव्यं द्विगुणार्थमेलयित्वा तस्य मंत्रिणः षाड्गुण्यप्र-
।योगबलेन विग्रहमारभ्य संग्रामेण तन्नृपं व्यापाद्य सराजपुत्रस्तद्राज्यमपि गृहीत्वा राजा बभूव। मित्रद्वयार्पितराज्यो-
गभारः स्वच्छंदवृत्ति विलासमेवाम्यनुभवतिस्म। अन्यदानेनात:पुरस्थेन प्रत्यासन्नमेकरावानरएकः कौतु-
कादात्मसन्निहितकृतः यतः शुकसारिकाकोरपारापतवानरादयः प्रकृत्यैव राजप्रियाः भवंति राजपितं वानरम-
ति विश्वास्यात्मशरीरस्तत्वात्खड्गधरं चकार १ अथ तस्य राज्ञो गृहाभ्यासे नानातरुसंमिलितं प्रमोदवनमस्ति तत्र तेन
राज्ञा वसंतसमये मधुकरोपानीयमानमदनाकीर्त्तिप्रसरं बहुकुसुमःपरिमलरमणीयमवलोक्यता श्रांतेन। ५०
राज्ञा वानरो दृष्टो निहितः अहमस्मिन्पुष्पगृहे स्वपिमि ममोपद्रवं कोपि कुर्वाणस्त्वयाऽप्रमत्तेन यत्नेन रक्षणीयः
इत्युक्त्वा राजा सुप्तस्तस्योपरि पुष्पपरिमलकस्तूरीकादिगंधलुब्धो मधुकरः समागत्य शिरसि लीनः तं दृष्ट्वा परोषो वा-
नरश्चिंतयामास। कथं मम प्रत्यक्षतोपि क्षुद्रजंतुनानेन राजा पक्षिमूयते इति निवारयितुमारब्धः अथ यदा निवार्य-
माणोपि भ्रमरः पुनःपुनः राजानमुपैति तत्कोपांधो वानरः खड्गमुपादाय भ्रमरमनुप्रहारं पातितवान् तेन च प्रहारेण
राज्ञः शिरः छिन्नं। अथ राज्ञी सुप्ता राजमहिषी त्रासादुत्थिता तादृशंचापमंजयमालोक्य क्रंदितवाद् रेरे वानरमू-

र्ख विश्वस्ते राजनि किमिदमाचरितं त्वयेति वानरोपि यथावृत्तमाख्यातवान् ततो मिलितलोकेन अनुशोच्यमानो
वानरः परिकृतः अतएवोच्यते पंडितोपि वरं शत्रुरिति कथा॥२२॥ ॥पुनः करटक आह पैशुन्यमात्रअंत्रि-
जः सौहार्द्यमविनाम कः अप्रमाणं स्यादवशो यत्र न तत्कार्यं श्रुतं भवेत् १ तथाच स्थितोपांतावस्त्वस्थास्तुनेवका-
र्यं विनस्यति साधुस्तच्छुमते येन न लोके र्दस्यते हिमः २ तथाच अंत्यावस्थापि बुधेन गुणान् विजहाति सुबुद्ध्या
बुध्या अतत्त्वमेव प्रख्याति शंखः शिखिस्तुक्तमुक्तोपि ३ उक्तंच यदि कार्यमकार्यमेव तत्त्वबुद्धस्तत्र मतिं प्रयोजये-
त् परयापि स्वप्रबोधितैर्निद्दिरथ्यागतमंबुपीयते ४ किंच कर्त्तव्यमेव कर्त्तव्यं प्राणैः कंठगतैरपि अकर्त्तव्यं न क-
र्त्तव्यं प्राणैः कंठगतैरपि ५ इत्युक्तस्तदीयमार्गानुगं वचनं अंध बुद्धि वद्विषममिव मन्यमानो दमनकोऽपसृतः अ-
त्रांतरे पिंगलकसंजीवकौ क्रोधसंचित मियोयुद्धाय पुनरुत्थितौ ततः पिंगलकः संजीवकं व्यापाद्य प्रशांतकोपोऽ-
सृक्संदिग्धपाणिः स्मृतपूर्वस्नेहवशात्करुणया बाष्पाविलनयने प्रमृज्य सपश्चात्तापमिदमब्रवीत् अहो कष्टं
महदिदं मकृतं मया कृतं मया द्वितीयमात्मशरीरं संजीवकं व्यापादयता आत्मन एवापकृतं उक्तंच भूम्येकदेश
स्य गुणान्वितस्य वा तत्त्वबुद्धिमतः प्रणाशः भृत्यप्रणाशो मरणं नृपाणां नष्टापि भूमिः सुलभा न भृत्याः १ तमेवं पिंग-
लकं अद्भुतिपरितं दृष्ट्वा तिष्टतया शनैः उपसृत्य दमनकोऽब्रवीत् स्वामिन्नन्याय्य एष मतः हत्वा किं मे शाद्वति-
क्रियते उक्तंच पिता वा यदि वा भ्राता पुत्रो वा यदि वा सुहृत् प्राणद्रोहे प्रवृत्ताः हन्तव्या भूतिमिच्छता १ कि-
च राजा घृणि ब्राह्मणः सर्वभक्षी वै स्त्रीच लज्जाप्रवुधाः सहायः प्रेष्यः प्रतीपः प्रसंगः प्रमादी त्याज्याः मवैयश्च कृतं
न वेत्ति २ गच्छ हरेम अपियत्तं दमि इद्धवालमपिपंडितेजनं देहिदेहमपिशाथितोर्थिना छिंधि बाहुमपि-
मात्मनः ३ नचायं धर्मो राज्ञां यः क्षिलप्राकृतपुरुषाणां साधारणः उक्तंच मेरुतुल्यप्रकृतिना स्वयं राज्यं प्र-
सिद्धं येहि दोषामनुष्याणां तएवनृपतेर्गुणाः ४ अपिच सत्यानृताच परुषा प्रियवादिनी च हिंस्रा दयालु-

वार्थपरावदाना नित्यव्यया प्रचुरनित्यधनागमा च वारांगनेव नृपनीतिरनेकरूपा ५ अथानागतमेव वि-
कारो समागत्य समुपविष्टः दमनकं प्रति करटको ऽब्रवीत् भवान्नाव मंत्रित्वमेव जानासि यतो द्वयोः प-
रप्रीत्युपभोगयोर्विच्छेदकारणं भेदः नवनीतिरेषां मंत्रिणां यत्सामदानविधिभेदसाध्येषु विद्यमानेषु स्वी-
त्यस्योपरि स्वामी युद्धोपदेशेन संशयमारोपितः उक्तं च धनदस्य तथैव मंत्रिणः प्रवचस्याथ जलेश्वरस्य च का-
खलु रक्षिताः श्रियः कलहे नित्यनियोजनकस्य चित्त १ जयोपदेशं प्रवदंति धीराः युद्धं व्यवस्यंति हि बुद्धिहीनाः
जयं च धीराः प्रवदंति शास्त्रे शास्त्रार्थसामादिगुणप्रयोगः २ तस्मान्मंत्रिणा कदाचिदपि स्वामिनो युद्धं नोपदेष्ट-
उक्तं च श्रेयो हितकारिणो वनीताः प्रतिपक्षक्षयकारिणोऽपकृष्टाः निवसंति नराग्रहेषु येषां प्रशमायांति न ते
न्यपरिग्रहाणां १ तस्माद्धितमेव वक्तव्यं कटुत्वमप्यपि सर्वदा एकांतहितवादित्वं विदध्यमनुजीवनः २ इष्टान
रंजनप्रियाणि यद्विजीवनः प्रभुप्रहितार्थायतिप्रक्षिपेरन्नृपश्रियः ३ किंच स्वामिना मंत्रिणः प्रत्येकशः
पृष्टव्याः पृष्टेषु च तेषु किं केनात्मनो हिताहितं श्रेयो वा हितं तत्सर्वं स्वयं विचारणीयं यतः कदाचिदन्यथा
स्थितमपि वस्तु यतिन्यायात् ऽन्यथा दृश्यते उक्तं च तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव न तलं विद्यते व्योम्नि
न खद्योते हुताशनं १ तस्मादपगतनयेन नृत्यनयदस्ति हितं न स्वामिना तत्तथैव प्रत्येतव्यं यतः कारणं तेषु
नृत्याहि स्वार्थसिद्धये विचित्रवाक्यैः कार्यमन्यथा स्थितमन्यथैव स्वामिने निवेदयंति तस्मादालोच्य स्वामि- ५१
ना कार्यमनुष्ठेयं उक्तं च सुहृद्भिराप्तैः सकृद्विचारितं स्वयं च बुद्ध्या प्रतिचिंतितात्प्रगं करोति कार्यं खलु यः स
बुद्धिमान् स एव लक्ष्म्या यशसां च भाजनं १ तस्मात्परवचनं सत्याहार्यबुद्धिना स्वामिना नत्राव्यते सर्वथैव प्रभु-
णां तरमवधार्य हिताहितवचनोत्तरकालपरिणामं विचार्यमहार्यमनाहार्यबुद्धिना स्वामिना स्वयमेव बुद्धिम-
ता सर्वकार्यजातं सदैव प्रत्येतव्यमिति कथा॥२२ ॥इति श्रीविष्णुशर्मकृते शास्त्रे पंचोपाख्याननाम्नि ग्रंथे।

सुहृद्भेदो नाम द्वितीयं तंत्रं समाप्तम्॥२॥ ॥ॐ॥ अथेदमारभ्यते काकोलूकीयं नाम तृतीयं तंत्रं॥ तस्यायमाद्यः
श्लोकः॥ न विश्वसेत्पूर्वविरोधितस्य शत्रोश्च मित्रत्वमुपागतस्य दग्धां गुहां पश्य उलूकपूर्णां काकप्रणीतेन हुता-
शनेन १ राजपुत्रा ऊचुः कथमेतत् विष्णुशर्मा कथयति अस्ति दक्षिणात्ये जनपदे महिलारोप्यं नाम नगरं तस्य
समीपस्थोऽनेकखगसनाथोऽतिघनतरपत्रच्छन्नो न्यग्रोधपादपो वर्तते तत्र मेघवर्णो नाम वायसो निवसति स्म प्र-
भूततरपरिवारः सन्न्यग्रोधे तत्र दुर्गं रचने कालं नयति स्म अथान्यो रिमर्दनो नाम उलूकराजः निवसति स्म अ-
संख्यातरपरिवारः गिरिगुहादुर्गाश्रयः प्रति वसति स्म स च रात्रावागत्य सदैव तस्य न्यग्रोधस्य समंतात्परिभ्रमति
यं कंचिद्वायसं पश्यति तं व्यापाद्य गच्छति एवं नित्याभिगमनात् शनैर्न्यग्रोधदुर्गं निर्वायसं कृतं अथवा युक्तमेव
संप्रेक्षते स्वयं शत्रुं प्रसरं तस्य हि स्वेच्छया रोगं चालस्यसंयुक्तः शनैस्तेनैव हन्यते १ अथान्येद्युः सर्वान् सचिवानाहू-
य प्रोवाच नोत्कटः स्तावदस्माकं सउरद्यसंपन्नः कालवन्नित्यमेव निशायां समेत्यान् स्थान् व्यापादयति तत्कि-
मस्य प्रतिविधातव्यं वयं तावद्रात्रौ न पश्यामः न च तस्य दुर्गं जानिमः येन गत्वा प्रहरामः तदत्र किं युज्यते संधिविग्रह-
यानासनसंश्रयद्वैधीभावानामेकतमस्य क्रियमाणस्य अथ ते प्रोचुः युक्तमभिहितं देवेन उक्तं च अपृष्टेनापि
वक्तव्यं सचिवेनात्र किंचन पृष्टेन त्वरितं पथ्यं वेत्स्यादप्रियमप्यलं २ यो न पृष्टो हितं ब्रूते परिणामसुखावहं मंत्री
च प्रियवक्ता च केवलं स रिपुः स्मृतः ३ तस्मादेकांतमासाद्य मंत्रः कार्यो महीपते एवं तस्य वयं कर्म नियमं निश्च-
तया ४ अथ तस्य अनुगताः पंचसचिवाः तद्यथा उज्जीवी संजीवी अनुजीवी प्रजीवी चिरंजीवी तेषां तावदुज्जीवी
पृष्टवान् भद्र एवं स्थिते किं मन्यते भवान् स आह राजन् बलवता सह विरोधो न कार्यः स च बलवान् प्रहारकालं
तस्मात्संधानीय उक्तं च बलीयसि प्रणमतां काले प्रहरतामपि संपदो नापगच्छंति प्रतीपमिव निम्नगाः ५ स
त्यो धार्मिकश्चार्यो भ्रातृसंघातवान् बली अनेकविजयी चैव संधेयः सरिपुर्भवेत् ६ संधिः कार्योऽप्यनार्येण

त्रायप्राणेशयेयं प्राणैः संरक्षितैः सर्वं यतो न भवति रक्षितं ७ योनेकविजयी संधानं संधानं यस्त्वागछति त
वेन तस्य श्रवश्यं यांति त्वरातयः ८ संधिमिछेत्समेनापि संदिग्धो विजयो युधि न हि सांशयिकं कुर्या
त्सुवाच वृहस्पतिः ९ संदिग्धो विजयो युद्धे युतनापि हि दृश्यते उपायत्रितयादूर्ध्वं तस्माद्युद्धं समाचरे
ए अभ्यहंकारतो मानं संधिः सामेनापि हतोन्दुः शं श्यामकं नमिवान्येन करोत्युन्नयं मतं भयं १० समं शक्तिमता युद्धम
शक्तस्य हि मृत्यवे हृषत्कुंभमिवाभित्वा नावतिष्ठति शक्तिमान् ११ अन्यच्च भूमिर्मित्रं हिरण्यं च विग्रहस्य
फलत्रयं नास्त्येकमपि यद्येषां विग्रहं न समाचरेत् १२ खनन्नाखुबलं सिंह पाषाणशकलाकुलं प्राप्नोति
नखभंगं वा फलं वा मूषकोन वेत् १३ बलीयसा समाक्रांतो वैतसीं वृत्तिमाचरेत् वांछन्नभृशिनी लक्ष्मी।
नभौजंगी कथंचन। १४ कुर्वन्न वैतसीं वृत्तिं प्राप्नोति महतीं श्रियं भुजंगवृत्तिमाप्नोति वधमर्हति केवलं १५
कौर्मं संकोचमास्थाय प्रहारानपि मर्षयेत् काले च मतिमान् त्रिष्ठेत् कृष्णसर्पवत् १६ आगतं मत्वा यः सा। गते वि
म्नापश्च संनयेत् विजयस्य ह्यनित्यत्वाद्रभसान समुत्पतेत् १७ तथा च बलिना सह योद्धव्यमिति नास्ति निद
र्शनं प्रतिवातं हि न घ्नः कदाचिदुपसर्पति १८ अथ श्रुत्वा संजीविनमाह नक्षत्रवानभिप्रायं श्रोतुमिच्छामि श्रा
ह देव न ममैतत्प्रतिभाति यच्छत्रुणा सह संधानं क्रियते उक्तं च शत्रुणा न हि संदध्यात्सुश्लिष्टेनापि संधिना सुतप्त ५२
मपि पानीयं शमयत्येव पावकं १९ अपरं च क्रूरो लुब्धो धर्मरहितः सत्वया विशेषान्न संधेयः उक्तं च क्रूरालु
ब्धालसासत्यः प्रमादी भीरुरस्थिरः मूढो योधावमंता च सुखोछेद्यो रिपुर्भवेत् २० अपरं तेन पराभूता वयं तद्य
दि संधानं करिष्यथ तद्भूयोपि कोपं विना शं करिष्यति उक्तं च चतुर्थोपायसाध्ये तु शत्रौ सांत्वमपक्रिया स्वेद्य।
मामज्वरं प्राज्ञः कोंभसा परिषिंचति २१ सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः प्रतप्तस्येव सहसा सर्पिषस्तो
यबिंदवः २२ यच्चैतदवदति देव रिपुर्बलवान् तदप्यपकारणं उक्तं च प्रमाणादधिकस्यापि महत्सत्वमधि

ष्ठितं पदं मूर्ध्नि समाधत्ते केसरी मत्तदंतिनः २३ स्वेछया शक्तिसंपन्नो हन्यात् शत्रुं लघुं गुरुं यथा कंठीरवो नागं भार
द्वाजः प्रचक्षते २४ मायया शत्रवो वध्या ह्यवध्याः स्युर्बलेन ये यथा स्त्रीरूपमास्थाय हतो भीमेन कीचकः २५ मृत्यो
रिवोग्रदंडस्य राज्ञो यांति वशे द्विषः सर्वतो हितमिछंति त्राणाय परिविश्रुते २६ न यातिशमनं यस्य तेजस्तेजस्विनो
जसा वृथा जातेन पुत्रेण मातुर्यौवनहारिणा २७ या लक्ष्मीर्नानुलिप्तांगी वैरिशोणितकुंकुमैः कांतापि मनसः प्री
तिं न सा धत्ते मनस्विनां २८ रिपुरक्तेन संसिक्ता तत्स्त्रीनेत्रांबुभिस्तथा न भूमिर्यस्य नृपस्य व वसेत्तत्र भूमिपः ए
तच्छ्रुत्वा प्रजीविनं प्रत्याह न त्वमपि स्वाभिप्रायं वद स आह देव दुष्टः सबलवान् निर्मर्यादश्च ततस्तेन सह
संधिविग्रहौ न युक्तौ केवलं यानमर्हति उक्तं च बलोत्कटेन दुष्टेन मर्यादारहितेन च न संधिविग्रहस्तेन विनाय।
नं प्रशस्यते ३० द्विधाकारं भवेद्यानं भयत्राणार्थरक्षणं एकमन्यजिगीषोश्च यात्रालक्षणमुच्यते ३१ कार्तिके वाथ
चैत्रे वा विजिगीषोः प्रशस्यते यानमुत्कृष्टवीर्यस्य शत्रुदेशे न चान्यदा ३२ अवस्कंदप्रधानस्य सर्वकालाः प्रकीर्तिता
ः व्यसने वर्तमानस्य शत्रोश्छिद्रान्वितस्य च ३३ स्वस्थानं सुदृढं कृत्वा शूरैश्चाप्तैर्महाबलैः परदेशं ततो गच्छेत् प्रणि
धिव्याप्तमग्रतः ३४ अज्ञातविविधासारतोयशस्यो व्रजेत्तु यः परराष्ट्रं न भूयः स स्वराष्ट्रमधिगच्छति ३५ न त्वेकं द्वौ
युक्तमपक्रमणं तेषां कारणं तत्प्रहर्तुं मृगपतिरपि चेत्संकुचत्युत्पतिष्णुः हृदयपतितवैरा गूढमंत्रप्रचाराः किमिह।
विगणय्यं तो बुद्धिमंतः सहंते अन्यच्च। बलवंतं रिपुं दृष्ट्वा देशत्यागं करोति यः युधिष्ठिरवदाप्नोति पुनर्जीवन्स मेदि
नीं ३६ युध्यतेहंकृतिं कृत्वा दुर्बलो यो बलीयसा न तस्य वांछितं कुर्यादात्मनश्च कुलक्षयं ३७ नद्बलवतानियु
क्तस्यापसरणसमयोयं न संधिविग्रहस्य अथैतदाकर्ण्य प्रजीविनं प्रत्याह न त्वमप्यात्मनोभिप्रायं वद स आ
ह देव संधिविग्रहयानानि त्रीण्यपि न प्रतिभांति विशेषतश्चासनं उक्तं च नक्रः स्वस्थानमासाद्य गजेंद्रमपि कर्षति
स एव च्युतस्थानाच्छुना परिभूयते ३८ अन्यच्च अभियुक्तो बलवता दुर्गे तिष्ठन् प्रयत्नवान् तत्रस्थः सु

त्मानं प्रकुर्याद्दात्ममुक्तये ३९ यो रिपुमागतं दृष्ट्वा भयसंत्रस्तमानसः स्वस्थानं यस्त्यजेत्प्राज्ञः स भूयो न व-
त्स्यति क्वचित् ४० दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः स्थानहीनस्तथा राजा गम्यः सर्वजंतुभिः ४१ निजस्था-
ने स्थितो एकः शतं योद्धुं भवेत्क्षमः बकमपि शत्रूणां तस्मात्स्थानं न संत्यजेत् ४२ तस्माद्दुर्गं दृढं कृत्वा विविधं
सारसंयुतं प्राकारं परिखायुक्तं शस्त्रादिभिरलंकृतं ४३ तिष्ठन्मध्यगतो नित्यं युद्धाय कृतनिश्चयः जीवन्संभ-
विष्यत्याणं यथैकस्या महीरुहः ४४ महानप्येकको वृक्षः सर्वतः सुप्रतिष्ठितः समं देनापि वातेन शक्यो धर्ष-
यितुं क्षमः ४५ अथ ये संहता वृक्षाः सर्वतः सुप्रतिष्ठिताः न ते शीघ्रेणापि वातेन हन्यंते ह्यन्योन्यसंश्रयात् ४६ ए-
वं मनुष्यमेकं च शौर्येणापि समन्वितं शक्यं द्विषंतो मन्यंते हिंसंति च ततः परं ४७ एतत्समाकर्ण्य आजीविनं प्रत्यु-
द भद्र त्वमपि वद स आह देव षाड्गुण्यमध्ये मम संश्रयः प्रतिभाति तस्यानुष्ठितं कार्यं उक्तं च असहायः समर्थो
पि तेजस्वी किं करिष्यति निर्वाते ज्वलितो वह्निः स्वयमेवोपशाम्यति ४८ तदत्र स्थितेन त्वया कश्चित्समर्थस्ताव-
संश्रयणीयः यो विपत्प्रतीकारं करोति यदि पुनस्त्वं स्वस्थानं त्यक्त्वा यास्यसि तत्को पि सेवको वाङ्मात्रेणापि
सहायत्वं न करिष्यति उक्तं च वनानि दहतो वह्नेः सखा भवति मारुतः स एव दीपनाशाय कृशे कस्यास्ति गौरवं
४९ सोऽहृदं अथवा नायमेकांतो यद्बलिनमेकं समाश्रयेत् यद्वल्पानामपि संश्रयो रक्षायै भवति उक्तं च संघवा-
न् क्षिपयत्येव वेणुर्निविडो वेणुभिर्वृतः न शक्यस्त्वमनुच्छेत्तुं दुर्बलोऽपि तथा नृपः ५० बलिनापि न बाध्यंते तनवोऽप्य- ५३
कसंश्रयाः प्रभंजनविक्षेपेण संहताः पादपा इव ५१ यदि पुनः संश्रयो भवति तत्किमुच्यते महाजनस्य संपर्कः
कस्य नोन्नतिकारकः पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियं ५२ तत्संश्रयं विना न कश्चित्प्रतीकारो भवति
तस्मात्संश्रयः कार्यः इति मे भिप्रायः अथैवमभिहिते स मेघवर्णः चिरंतनं पितृसचिवं दीर्घायुषं सकलनीति-
पारंगतं चिरंजीविनामानं प्रणम्योवाच तात यद्येते मया पृष्टास्तथा त्वमत्र स्थितस्यापि तत्परीक्षार्थं येन त्वं सकलं

श्रुत्वा यदुचितं तन्मे समादिशसि तद्युक्तियुक्तं भवति तत्समादेशय स आह वत्स सर्वैरमेवैतैर्नीतिशास्त्राश्रयमभिहितं स-
विवैः तदुपयुज्यते स्वकाले सदा सांप्रतमेव द्वैधीभावस्य कालः उक्तं च अविश्वासं सदा तिष्ठेत्संधिना विग्रहेण च द्वै-
धीभावं समाश्रित्य पापे शत्रौ बलीयसि ५३ तस्माद्विश्वास्य विश्वस्तो लोभं दर्शयद्भिः सुखेनोच्छिद्यते शत्रुः उक्तं च उच्छे-
द्यमपि विद्वांसो वर्धयंत्यरिमेकदा गुडेन वर्धितः श्लेष्मा सुखं तेन निपात्यते तथा च स्त्रीणां शत्रोः कुमित्रस्य पण्य-
स्त्रीणां विशेषतः यो भवेदेकभावो त्र स न जीवति मानवः ५५ कृत्यं तावद्द्विजातीनां मात्मनश्च गुरोस्तथा एकभा-
वेन कर्तव्यं शेषं द्वैभावमाश्रयेत् ५६ एकभावः सदा शस्तो यतीनां भावितात्मनां स्त्रीलुब्धानां न लोकानां शेषं द्वै-
त भावमाश्रिते ५७ द्वैधीभावं समाश्रित्य तस्य तत्र संस्थाने वासो भविष्यति लोभं दर्शयित्वा [illegible] शत्रुं वोच्चाटयि-
ष्यसि अपरं किंचिच्छिद्रं पश्यसि तत्कृत्वा व्यापादयिष्यसि मेघवर्ण आह तात न मया विदितस्तस्य संश्रयस्तत्क-
थं छिद्रं ज्ञायते चिरंजीव्याह न केवलं तत्स्थानं छिद्राण्यपि प्रकटीकृतानि प्रणिधिभिः उक्तं च गावो गंधेन
पश्यंति वेदैः पश्यंति वाडवाः चारैः पश्यंति राजानश्चक्षुर्भ्यामितरे जनाः ५८ यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः
गुप्तैश्चारैर्नृपो वेत्ति न स दुर्गतिमाप्नुयात् ५९ मेघवर्ण आह तात कानि तीर्थान्युच्यंते कति संख्यानि च कीदृशाः
गुप्ताश्चाराः सर्वं निवेद्यतामिति स आह अत्र विषये भगवता श्रीनारदेन युधिष्ठिरः प्रोक्तः शत्रुपक्षे अष्टादशती-
र्थानि स्वपक्षे पंचदश त्रिभिस्त्रिभिर्गुप्तचारैर्वेद्यानि तैर्ज्ञातैः स्वपक्षपरपक्षयो वशो भवति उक्तं च श्रीनारदेन
युधिष्ठिरं प्रति रिपुष्वष्टादशान्येव स्वपक्षे दश पंच च त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ६० तीर्थश-
ब्देन युक्तं कस्मादभिधीयते यद्यदि कुत्सितं भवति तत्स्वामिनो विपद्यते अथ प्रधानं भवति तद्वृद्धये स्यादिति
तद्यथा मंत्री पुरोहितः सेनापतिः युवराजः दौवारिकः अंतर्वासिकः प्रशासकः सामवेदकः प्रदेशनायकः सा-
धनाध्यक्षः गजाध्यक्षः कोशाध्यक्षः दुर्गपालः करपालः सीमपालः जलपालः सूपकारः प्रोत्कटभृत्याः ६१

मेदेन राजा कुरिपुर्न पश्यति स्वपक्षे देवी पट्टराज्ञी १ जननी २ कंचुकी ३ मालिकः शय्यापालकः पण्णनायकः सांव-
रिकः जलवाहकः तांबुलवाहकः आर्यागरक्षकः स्थानचिंतकः छत्रधरः चामरधरः वैद्यः विलासिन्यः एतेषां द्वा-
रिद्वारेण स्वपक्षघातः तथा च तथा च वैद्यग्रांवसराचार्याः स्वपक्षे पिरक्ता स्थिताः तथा हि डिंडिकोन्मत्ताः सर्वज्ञा
नातिशत्रुषु ६२ मेघवर्ण आह तात किं किं निमित्तं एवं विधं प्राणांतकारकं सदैव सर्वमायसोलूकानां वैरं सख्य।
हू हंसशुक कोकिल बक चातक मयूर कपोत पारापत प्रभृतयः सर्वे पक्षिणः समेत्य सोद्वेगं मंत्रितुमारब्धाः।
अहो अस्माकं तावत्स्वामी वैनतेयो राजा स च वासुदेवानुरक्तो नास्माकीय चिंतां करोति तत्किं तेन वृथा स्वामिना लु-
ब्धकपाशैर्निबध्यमानानां नर्ईर्ष्याक्रंदते उक्तं च परजैरपिच्छाच्छुदैः सुरवत्यनिले क्षणे मत्स्यैरिव लघुः छेद्यो।
क्रियते पार्थिवो जनैः ६२ यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा शत्रुः पार्थिवरूपेण स कृतांतो न संशयः
६३ यदि न स्यान्नरपतिः सम्यग्नेता ततः प्रजाः अकर्णधारा जलवत् विप्लवेतेह नौरिव ६४ षडिमान् पुरुषो जह्यात्।
भिन्नां नावमिवार्णवात् अप्रवक्तारमाचार्यमनधीयानं तथा र्त्विजं ६५ अरक्षितारं राजानं भार्यां चाप्रियवादि-
नीं ग्रामकामं च गोपालं वनकामं च नापितं ६६ संत्यजंति नरास्तान्वै य इच्छेत्प्रियमात्मनः तस्मिंश्चिन्त्यान्यः कश्चि-
द्राजा विहंगानां क्रियतामिति अथ तैर्भद्राकारमुलूकमवलोक्य सर्वैरभिहितं एषोस्माकं उलूको राजा भवत्वि- ५४
ति तन्नीयतां नृपासनेऽभिषेकसंबंधिना अथ साधिते विविधतीर्थोदके प्रगुणीकृते ष्टोत्तरशतमुल्लकांते दत्ते सिं-
हासने विवर्त्तिते सप्तद्वीपवती धरित्री मंडले प्रस्तारिते व्याघ्रचर्मणि आपूरितेषु हेमकुंभेषु सज्जीकृतेषु प्रस्तुतदर्पणा-
दि मांगल्यवस्तुषु च पठत्सु वेदोच्चारपरेषु समुदितमुखेषु विप्रेषु गीतपरेषु युवतिजने उलूको विषेकार्थं यावत्
सिंहासने उपविशति तावत्कुपितो वायसः समायातः सोचिंतयत् अहो किमेषः पक्षिणामालापक महोत्सवः।
अथ ते पक्षिणः संदृष्ट्वा मिथः प्रोचुः अहो पक्षीणां मध्ये चतुरो वायसः श्रूयते नराणां नापितो धूर्तः पक्षिणामिह।

वायसः दक्षिणांश्रृगालस्तु श्वेतभिक्षुस्तपस्विनां ६७ तदस्यापि वचनं ग्राह्यं उक्तं च बहुधा बहुभिः सार्धं चिंतिताश्च
निरूपिताः न कथं विहितीयंते विद्वद्भिश्चिंतिता नयाः ६८ अथ वायसः समेत्य तानाह अहो महाजन समागमोयं पर-
म महोत्सवः ते ऊचुः नास्ति विहंगमानां राजा तदस्योलूकस्य विहंगमराज्याभिषेकोऽभिरूपित आस्ते अहो युक्तमेत-
त् मयूरहंसचक्रवाकशुकहारीतक सारसादिषु पक्षिषु प्रधानभूतेषु विद्यमानेषु दिवांधस्य करालमुखस्याभिषे-
कः क्रियते तन्नैतन्मम मतं यतः वक्रनासं सुजिह्माक्षं क्रूरं अप्रियदर्शनं अक्रुद्धोयं दिवांधोऽत्र क्रुद्धः कीदृग्भवि-
ष्यति ६९ स्वभावरौद्रमत्युग्रं क्रूरमप्रियदर्शनं उलूकं नृपतिं कृत्वा का का सिद्धिर्भविष्यति ७० अपरं वैनतेये
स्वामिनि स्थिते किमेषो दिवांधः क्रियते तद्यदि गुणवानपि भवति तथाप्येकस्मिन् नान्यो नृपः प्रशस्तः एक एव
हिताथयि तेजस्वी पार्थिवो भुवि युगांत इव भास्वंतो बहवोत्र विपत्तये ७१ तत् अन्यस्य नाम्नापि यूयं परेषामगम्या
भविष्यथ उक्तं च गुरूणां नाममात्रेपि गृहीते स्वामिसंभवे दुष्टानां पुरतः क्षेमं तत्क्षणादेव जायते ७२ तथा च बु-
पदेशेन महतां सिद्धिः संजायते परा शशकस्योपदेशेन न्यूषिताः शशकाः सुखं ७३ ते ऊचुः कथमेतत् स आह।
अस्ति कस्मिंश्चिद्वने चतुर्दंतो नाम महागजो यूथाधिपः प्रतिवसतिस्म तत्र कदाचित् महती अनावृष्टिः संजाता
प्रभूत वर्षाणि यावत् यया तडागादीनि तनुजलपल्वलानि सरांसि शोषमुपागतानि अथ तैः समस्तैः गजैः प्रोचे
देव पिपासाकुलाः कलभाः मृतप्राया एके अपरे मृताश्च तदन्विष्यतां कश्चिज्जलाशयः यत्र जलपानेन स्वस्थ-
तां व्रजंति ततश्चिरं ध्यात्वा तेनाभिहितं अस्ति महान् ह्रदो विविक्तप्रदेशे स्थलमध्यगतः पातालगंगाजलेन सदा
पूर्णः तत्र गम्यतामिति ततः पंचरात्रमुपसर्प्य आसादितस्तैर्ह्रदः तत्र स्वेच्छया जलमवगाह्य अस्तमनवेला-
यां निष्क्रांताः तस्य ह्रदस्य समंतात् शशकबिलान्यसंख्याताः सुकोमलभूमौ तिष्ठंति तानि च तैर्गजैरितस्ततोभ्रम-
द्भिः प्रभिन्नानि बहवः शशका भग्नपादाः अन्ये जर्जितकलेवराः अन्ये रुधिरप्लुताः हतशिरोपरे बाष्पपिहि-

ततोऽवनाः कूटं बघातात्सर्वे समेत्य मंत्रं चक्रुः अहो विनष्टायुयंति त्यमेवैतत्गजयूथमागमिष्यति यतोनान्य
जलमस्ति तत्सर्वेषां नाशो भविष्यति उक्तं च स्पृशन्नपि गजो हंति जिघ्रन्नपि भुजंगमः हसन्नपि नृपो हंति मानयन्नपि
दुर्जनः १४ तच्चिंत्यतां कश्चिदुपायः तत्रैके प्रोचुः गम्यतां देशत्यागेन उक्तं च त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे
कुलं त्यजेत् ग्रामं जनपदस्यार्थे आत्मार्थे पृथ्वीं त्यजेत् १५ अन्ये प्रोचुः पितृपैतामहं स्थानमेतन्न शक्यते सहसा
त्युक्तुं तत्क्रियतां तेषां कृते। काचिद्विभीषिका यदि कथमपि दैववशान्न समायांति उक्तं च निर्विषेणापि सर्पेण क
र्तव्या महती फणा विषं भवतु मा भूयात् फटाटोपो भयंकरः १६ अथान्ये प्रोचुः यद्येवमस्ति एषां बिभीषिकास्था
नं येन नागमिष्यंति सच चतुरतरदूतायत्ता बिभीषिका यतोस्मत्स्वामी विजयदत्तो नाम शशकश्चंद्रमंडले नि
वसति स्म तत्प्रेष्यतां कश्चिन्मिथ्यादूतो यूथाधिपसकाशं यच्चंद्रः त्वंवेतमत्र ह्रदे आगच्छंतं निषेधयति यतोस्म
त्परिग्रहोऽस्य ह्रदस्य समंतान्निवसति एवमभिहिते श्रद्धेयवचनात्कदाचिन्निवर्तयिष्यति गजाः अन्ये प्रोचुः
यद्येवं तदत्रास्ति लंबकर्णो नाम शशकः सच वचनचतुरो दूतकर्मज्ञः स तत्र ह्रदे प्रेष्यतामिति उक्तं च सोऽकरोत्ति
स्पष्टो वाग्मी नानाशास्त्रविशारदः परचित्तावगंता च राज्ञः दूतः स इष्यते १७ अन्यच्च यो मूर्खो लोल्यसंपन्नो राज
द्विष्टं समाचरेत् मिथ्यावादी विशेषेण तस्य कार्यं न सिध्यति १८ तदन्विष्यतां यद्यस्माद्व्यसनात्संनिर्याति अथान्ये ५५
प्रोचुः अहो प्रयुक्तमेतत् नान्यः कश्चिदुपायोऽस्माकं जीवितव्यस्य तथानुष्ठिते लंबकर्णो विगजमार्गमासाद्य रम्य
स्थलमासाद्य यूथाधिपमुवाच भो दुष्टगज किमेवं लीलया निःशंकतयात्र परह्रदे आगतोऽसि तन्नागंतव्यं आव
र्तस्य पश्चात्तदाकर्ण्य विस्मितमना गज आह भोः कस्त्वं कस्य च स आह विजयदत्तो नाम शशकोऽहं चंद्रमंडले
वसामि सांप्रतं त्वं चंद्रमसा त्वत्पार्श्वे प्रहितः तच्छ्रुत्वा ८ श्रद्धेयत्वात्तस्य वचनस्य स आह गजः भोः शशक तत्कथ
य श्रीभगवतश्चंद्रस्यादेशं एनमत्वरं क्रियते स आह भवतातीव दिवसे यूथेन सहागच्छता प्रभूताः शशकाः

निपातिताः तत्किं न वेत्ति भवान् यन्मम परिग्रहोऽयं तद्यदि जीवितेन प्रयोजनं तदिनात्र ह्रदे भूयोऽप्यागंतव्यं इति संदे
शकः स आह गजः अथ क्व वर्तते भवत्स्वामी चंद्रः सांप्रतं स आह अत्र ह्रदे सांप्रतं शशकानां युष्मद्यूथक्षदर्थिता।
नां हतशेषाणां समाश्वासनायायातस्तिष्ठति अहं पुनस्तवांतिके प्रहितः गज आह भो यद्येवं स्वामिनं दर्शयत
मे येन प्रणम्यान्यत्र गच्छामि शशक आह भो आगच्छ अदर्शयत् आह च तं प्रति एष नः स्वामी जलमध्ये तिष्ठति त।
न्निभृतं प्रणम्य सत्वरं व्रज नो चेत्समाधिभंगात् भूयोऽपि प्रभूतकोपं करिष्यति।। अथ गजोऽपि त्रस्तमनास्तं प्रणम्य पुन
र्गमनाय प्रस्थितः शशकाश्च तद्दिनात् स्वपरिवाराः सुखेन तिष्ठंति अतोऽहं ब्रवीमि व्यपदेशेन महतामिति १ तथा
च क्षुद्रमलसं कापुरुषं व्यसनिनमकृतज्ञं च अपृष्टजल्पं तं नरं स्वामित्वेनाधियोजय स्वामी उक्तं च क्षुद्रमर्थपतिं
प्राप्य न्यायान्वेषणतत्परौ उभावपि क्षयं प्राप्तौ पुरा शशकपिंजलौ १ ते प्रोचुः कथमेतत् स आह।। ।।अथ।
कस्मिंश्चिद्वनोद्देशे वटवृक्षे पुराहं वसामि तत्राधस्तात्कोटरे कपिंजलो नाम चटकः प्रतिवसति स्म अथास्तम
नवेलायां आगतयोरनेकसुभाषितगोष्ठीदेवर्षिब्रह्मर्षिराजर्षिपुराणचरितकीर्तनेन तथा पर्यटनदृष्टा।
नेककौतूहलकीर्तनेन च परमसुखमनुभवतो द्वावयोः कालो व्रजति अथ कपिंजलकः प्राणयात्रार्थं गतो
न्यैश्चटकैः सह शालिक्षेत्रं गतः ततो यावन्निशामुखे नायातः सः तावदहं तद्दुःखितमनाश्चिंतितवान् अ
हो किमद्य शशकपिंजलो नायातः किं पाशेन केनापि बद्धः उताहो केनापि व्यापादितः सर्वथा यदि कुशली भ
वति तदा अनागतो न तिष्ठति एवं चिंतयतो मे बहूनि दिनानि अतिक्रांतानि ततश्च कदाचित्तत्र कोटरे शीघ्र।
गो नाम शशकोऽस्तमनवेलायां प्रविष्टः मया कपिंजलनिराशेन न निवारितः अथान्यस्मिन्नहनि कपिंज
लः शालिभक्षणादतीव पीवरतनुः स्वमाश्रमं दृष्ट्वा भूयोऽपि तत्रैव समायातः अथवा साध्विदमुच्यते न त
था कृत्नायते सौख्यमपि स्वर्गेऽपि देहिनां दरिद्रोऽगृहसंस्थोऽपि स्वजन्म स्वदेशके १ अथ सो कोटरांतः

शशकं दृष्ट्वा साक्षेपमिदमाह भो मदीयमेतद्गृहं तन्मुच्यतां शशकाह न तवेदं गृहं किं तु ममैव तत्किं मिथ्या
प्रभाषणं जल्पसि उक्तं च वापीकूपतडागानां देवलेकृतजन्मनां उत्सर्गात्परतः स्वाम्यमपकर्तुं न युज्यते १
तथा च प्रत्यक्षं यस्य यद्भुक्तं गृहाद्यं दशवत्सरान् तत्र भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि च मानुषाणा।
मयं न्यायो मुनिभिः परिकीर्तितः २ तिरश्चानां विहंगानां यावच्छिक्षा समाश्रयः ३ तन्नैतद्गृहं धर्मतो हि तवे
ति कपिंजलाह भो यदि स्मृतिप्रमाणं करोषि तद्गच्छ मया सह येन स्मृतिपाठकं दृष्ट्वा स यस्य ददाति स गृह्णातु
तथानुष्ठिते मया चिंतितं किमत्र भविष्यति मया द्रष्टव्योऽयं न्यायः ततः कौतुकादहमपि प्रस्थितः अत्रांतरे
तीक्ष्णदंष्ट्रो नाम आरण्यमार्जारः स तयोर्विवादं श्रुत्वा मार्गासन्ननदीतीरमासाद्य कृतकुशोपग्रहो द्वादशतिलक
युक्तो निमीलितनयन ऊर्ध्वबाहुरर्धपादस्पृष्टभूमिः सूर्याभिमुख इमां धर्मदेशनामकरोत् अहो असारोयं
संसारः क्षणभंगुराः प्राणाः स्वप्नसदृशाः प्रियसमागमाः इंद्रजालवत्कुटुंबपरिग्रहः तद्धर्मं मुक्त्वा नान्या गतिरस्ति
उक्तं च यस्य धर्मविहीनानि दिनान्यायांति यांति च स लोहकारभस्त्रेव श्वसन्नपि न जीवति १ नाच्छादयति कौपी
नं न दंशमशकापहम् शुनः पुच्छमिव व्यर्थं मानुष्यं धर्मवर्जितं २ पुलाका इव धान्येषु पूतिका इव पक्षिषु मशा
का इव मर्त्येषु येषां धर्मो न कारणं ३ श्रेयः पुष्पफलं वृक्षात् दध्नः श्रेयो घृतं स्मृतं श्रेयस्तैलं च पिण्याकात् श्रेयो धर्म १२८
स्तु मानुषात् ४ सृष्टास्ते च पुरीषामाहारार्थैव केवलं परार्थधर्महीनाश्च पुरुषाः पशवो यथा ५ स्थैर्यं सर्वेषु कृत्ते
षु शंसंति नयपंडिताः बह्वंतराययुक्तस्य धर्मस्य त्वरिता गतिः ६ संक्षेपात्कथ्यते धर्मो जनाः किं विस्तरेण च परोप
कारः पुण्याय पापाय परपीडनं ७ श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतां आत्मनः प्रतिकूलानि परेषां न समाचरेत् ८
अथ तस्य देशनं श्रुत्वा शशक आह भो कपिंजल एष नदीतीरे तपोधनो धर्मवादी तिष्ठति तदेनं पृच्छामः कदाचिदस्य
हते वैक्यं संपद्यते ततो दूरस्थौ तावूचतुः भो तपस्विन्धर्मदेशक आवयोर्विवादो वर्त्तते तद्धर्मशास्त्रद्वारेणास्माकं

निर्णयं देहि यो हीनवादी स त्वया भक्षणीयः सोऽब्रवीत् भद्रौ मा मैवं वदतं निवृत्तोहं कर्ममागतः अहिंसैव धर्ममार्गः
उक्तं च अहिंसा परमो धर्मो यस्मात्सद्भिरुदाहृतः यूकामत्कुणदंशादीन् तस्मात्तान्परिरक्षयेत् १ हिंसकान्यपि भू
तानि हिनस्ति यस्तु निर्दयः स याति नरकं घोरं किं पुनर्यः शुभानि च २ एते ये यज्ञकर्मणि पशून्व्यापादयंति ये।
तेऽपि मुग्धाः श्रुतेः परमार्थं न जानंति तत्र किलैतदुक्तं यदजैर्यष्टव्यं अजाः सप्तवार्षिका व्रीहयः कथ्यंते न पुनः पशु
विशेषाः उक्तं च वृक्षान्छित्वा पशून्हत्वा कृत्वा रुधिरकर्दमान् यद्येवं गम्यते स्वर्गे नरके केन गम्यते १ तन्नाहं
भक्षयामि जयपराजयनिर्णयं करोमि परं वृद्धोऽयं दूरान्न शृणोमि एवं ज्ञात्वा मम समीपवर्तिनौ भूत्वा न्यायं वदतं
१ येन मे विज्ञातविवादपरमार्थं वदतः परत्र न विनश्यते मानाद्वा यदि वा लोभात् यो न्यायमन्यथा ब्रूयात् स
याति नरकं घोरमित्याह भगवान्मनुः १ पंच पश्वनृते हंति दश हंति गवानृते शतं कन्यानृते हंति सहस्रं पुरुषा
नृते २ उपविष्टः सभामध्ये यो न वक्ति स्फुटं वचः तस्माद्दूरस्त्याज्यो न्यायो वा कीर्तिनः कृतं ३ तस्माद्विश्रब्धौ
कर्णोपांते निवेदयतां किं बहुना तेन क्षुद्रेण तथा तौ विश्वासितौ यथा तस्योत्संगिनौ जातौ ततश्च समकालमेकः
पादेनाक्रांतः अन्यो दंष्ट्राक्रकचेन ततो गतप्राणौ भक्षिताविति अतोहं ब्रवीमि २ क्षुद्रमर्थपतिं प्राप्येति ॥३॥
ततो भवतोऽपि नंदिवाधमर्थपतिमासाद्य रात्र्यंधाः शशकपिंजलमार्गेण यास्यथ एवं ज्ञात्वा यदुचितं तद्विधेयं
अतः परं तद्वचनमाकर्ण्य साधुनाभिहितं इत्युक्त्वा भूयोऽपि पार्थिवार्थं समेत्य मंत्रयिष्याम इति ब्रुवाणाः सर्वे
यथाभिमतं जग्मुः केवलमवशिष्टो भद्रासनोपविष्टोऽभिषेकाभिमुखो दिवांधः कृकालिकया सह स्थि
तः अथ तेनाभिहितः इत्युक्त्वा भूयोऽपि पार्थिवाग्रेकः कोत्र किमद्यापि मे न क्रियतेऽभिषेकः कृकालिकयाभि
हितं भद्र केनायं विघ्नस्तेऽभिषेकस्य काकेनागताः सर्वे विहंगा यथाचिंता सुविदित्वा केवलमेकोऽविशिष्टो वायसः
ततो वायसमुलूक आह भो दुरात्मन् किं मया तेऽपकृतं यत्त्वया मेऽभिषेको विघ्नितः तदद्य प्रभृति सान्वयानां

वयोर्वैरं उक्तं च रोहंति सायकैर्विद्धं छिन्नं रोहंति चासिना वाचाऽसक्ता बिभित्सुर्न प्ररोहति वाक्क्षतं १ इत्येव
मभिधाय उलूकः कलिकया सह स्वाश्रयं गतः अथ भयव्याकुलो वायसोऽपि चिंतयत् अहो अकारणं वैरं आसा
दयता मया किमिदं व्याहृतं उक्तं च अदेशकालंयमनीयतिक्षमं यदप्रियं लाघवकारि चात्मनः योत्राब्रवी
त्कारणवर्जितं वचो न तद्वचः स्याद्विषमेव तद्वचः १ बलोपपन्नोऽपि हि बुद्धिमान्नरः परं नयेन्न स्वयमेव वैरितां
मृत्युर्ममास्तीति विचिंत्य नत्वये दकारणं को हि विचक्षणो विषं २ मेघवर्ण आह तात एवं गते किं क्रियते स आ
ह वत्स एवं गतेऽपि षाड्गुण्यादपरः स्थूलोऽस्ति उपायो नास्ति शत्रुवंचनं तमंगीकृत्य स्वयमेवाहं तद्विजयाय यास्यामि
रिपून्वंचयित्वा वधिष्यामि उक्तं च बहुबुद्धिसमोपेताः सुविज्ञाना बलोत्कटाः शक्ता वंचयितुं धूर्ता ब्राह्मणं च
छगलादिव २ मेघवर्ण आह कथमेतत् सोऽब्रवीत् अस्ति कस्मिंश्चिदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः कृताग्निहो
म त्रपरिग्रहः प्रतिवसति स्म कदाचिन्माघमासे सौम्यानिले प्रतिचलिते मेघाच्छादितगगने मंदं २ वर्षति पर्ज
न्ये पशुप्रार्थनाय कंचिद्ग्रामांतरं गत्वा कश्चिद्यजमानो याचितः भो यजमान यज्ञयजनार्थं पशुमेकं समर्पय अ
थ तेनातीव पीवरतनुर्दत्तः पशुः सोऽपि समर्थं पशुमितश्चेतश्च गच्छंतं विज्ञाय स्कंधे कृत्वा सत्वरं स्वपुराभिमुखं
प्रतस्थे अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः क्षुत्क्षामकंठाः सन्मुखा बभूवुः तैस्तं तादृक्पीवरतनुपशुं स्कंधे कृ ५१
त्वा आरूढमवलोक्य यथाभिहितं भो अस्य पशोर्भक्षणाद्यतनीयो हिमवातो व्यर्थतां नीयते तदेनं वंचयि
त्वास्य मकाषाद्धृयते अथ तेषामेकस्तत्र वेषपरावर्तनं विधाय संमुखो भूत्वा अपमार्गेण तमाहिताग्निमूचे भो बा
लाग्निहोत्रिन् किमेवं जनविरुद्धं हास्यकार्यमनुष्ठीयते यदेष सारमेयोऽपवित्रः स्कंधाधिरूढो नीयते उक्तं च श्वान
कुक्कुटमार्जाराः समस्पर्शाः प्रकीर्तिताः रासभोष्ट्रौ विशेषेण तस्मात्तान्नैव संस्पृशेत् १ ततश्च तेन कोपाविष्टेनाभिहि
तं अहो किमंधो भवान् यत्पशुं सारमेयं संपादयसि स आह ब्रह्मन् न कोपः कार्यः यथेच्छया गम्यतां अथ याव

त्किंचिदंतरं गच्छति तावद्द्वितीयो धूर्तः अन्यवेषधारी सन्मुखमभ्येत्य तमुवाच अहो ब्राह्मण महाश्चर्यं यदसौ ब्राह्म
णः क्रमेजकशिशुं स्कंधे कृत्वा गच्छति उक्तं च सर्वासु धान्यजातिषु मृत्तकलशमुर्यथाऽशुच तथाऽजीवजातीषु का
योष्ट्रः प्रथकूजनैः १ तच्छ्रुत्वा स आह भो त्वमप्यंधः तच्छ्रुत्वा स आह कृपानिधान कोपो न कार्यः सुखेन गम्यतां
अथ किंचिदंतरं यावद्गच्छति तावत्तृतीयो धूर्तोऽन्यवेषधारी सन्मुखमभ्येत्य तमुवाच अहो अब्राह्मण मब्राह्म
णमस्य यत्स्कंधे रासभं कृत्वा गच्छति यः स्पृशेद्रासभं मर्त्यो ज्ञानादज्ञानतोऽपि वा सचेलं स्नानमुदिष्टं तस्य पापप्र
शांतये २ तत्त्वया यावत्किंचिन्न पश्यति तावदेनं हि त्यागच्छ अथासौ तं पशुं रासभं मन्यमानो वेगेन भूमौ निक्षिप्य गृ
हमुद्दिश्य पलायितुमारब्धः अतोऽहं ब्रवीमि बहुबुद्धिसमोपेता इति ॥३॥ ॥अथवा साध्विदमुच्यते॥ अस्ति
नवसेवकविनयैः प्राघ्रार्थीविनाशनचतुरैर्धूर्तजनैर्वचनचतुरनिकरैरिह कश्चिदवंचितो नास्ति तदत्रास्ति
किंचिद्वक्तव्यं ते तदवधार्य यथोचितमनुष्ठीयतां स आह तर्हि समादिश त्वदादेशो नान्यथा कार्यः मया
कदापि चिरंजीव्याह वत्स आकर्णय तर्हि सामादीनतिक्रम्य योऽयं मया पंचमोपायो निरूपितः तन्मां विपक्षभूतं कृ
त्वातिनिष्ठुरवचनैर्निर्भर्त्स्य निःसरणीयः यथा विपक्षप्रणिधीनां प्रत्ययो भवति तथा समाहृतरुधिरैरभिलिप्य अस्या
ग्रोधस्याधः प्रक्षिप्य गम्यतां पर्वतं प्रतिरोहितान्वलं तत्र सपरिवारस्तिष्ठ यावदहं सपत्नान् सुप्रणीतेन विधिना
विश्वास्याभिमुखी कृत्वा कृतार्थो ज्ञातदुर्गश्च मध्यदिवसे तं प्रदेशं गत्वा तान्व्यापादयामि एवं यया ज्ञातो मं
त्रः सम्यक् नान्यथा सिद्धिरिति मतश्चास्यस्यतो दुर्गमेषः पादप्रत्यापसाररहितः केवलं विघाति अपसारसा
मायुक्तं युक्तं तज्ज्ञानेर्दुर्गमुत्तमं अपसारपरित्यक्तं तज्ज्ञानेर्दुर्गमुत्तमं १ तत्त्वयाऽस्मदर्थे कृपा कार्या उक्तं च अपि
प्राणसमानिष्टान् पालितान्लालितानपि भृत्यान्युद्धे समुत्पन्ने पश्येत्क्लानामिवश्रजं १ तथा च प्राणवद्रक्षे
द्भृत्यान्स्वकायमिव पोषयेत् सदैकदिवसस्यार्थे यस्मिन्शत्रोः समागमः २ तत्त्वयाहं नात्र विषये निषेधनी

यः इत्युक्त्वेन श्वकलहं कर्तुमारब्धं अथ तेऽन्ये तस्य तत्त्वाच्चिरंजीविन मुष्टं स्वजवाचा जल्पंतमवलोक्य त
स्य वधायोद्यताः मेघवर्णेनाभिहितं अहो निवर्त्यतां यूयमस्य शत्रुपक्षपातिनो दुरात्मनः शिरः स्वयमेवा
निग्रहं करिष्यामि इत्यभिधाय तस्योपरिसमारुह्य लघुचंचुप्रहारैस्तं निहत्याहृतरुधिरेण प्लावयित्वा ऋष्य
मूकपर्वतं सपरिजनो गतः अत्रांतरे काककया द्विषत्प्रणिधिना तया सर्वं तद्भाषितं मंत्रं मेघवर्णस्योलूकराजे निवे
दितं यत्तव वैरिः संप्रति भीतो लीनो लीनपरिवारः प्रचलितः तदुलूकोपि तदाकर्ण्य अस्तमनवेलायां समागत्य
परिजनो वायसवधार्थं प्रचलितः प्राह च॥ अहो त्वर्यतां २ भीतः शत्रुः पलायनपरः पुण्यैर्लभ्यते उक्तं च शत्रो
श्च प्रबलेच्छिद्रमेकमन्यच्च संश्रयं प्राप्य शत्रुं वशे कुर्यादन्यथा तेन दह्यते १ तथा विडंविनाशं शत्रुर्देवानामपि व
ध्यगः छिद्रं शक्रेण संप्राप्य दितेर्गर्भो हतः पुरा २ एवं ब्रुवाणाः समंतान्न्यग्रोधपादपमधः परिवेष्ट्य व्यवस्थिताः
यावन्न कश्चिद्वायसो दृश्यते ततश्च शाखासमारूढो हृष्टमनाः स्तूयमानो बंदिभिरे तदुवाच अहो ज्ञायतां तेषां
मार्गः कतमेन मार्गेण ते प्रणष्टाः काकाः तन्न यावद्दुर्गं सामग्र्या माश्रयंति तावदेव पृष्ठे गत्वा व्यापाद्या भवंति उक्तं
च वृक्षमध्याश्रितः शत्रुरवध्यः स्याज्जिगीषुणां किं पुनः संश्रितो दुर्गं सामग्र्या परयायुतः १ अथान्यस्मिन्प्रस्तावे
चिरंजीवी मंदं २ शब्दमकरोत् तच्छ्रुत्वा सर्वेऽप्युलूकाः तस्य वधार्थं जग्मुः अथ तेनोक्तं अहं चिरंजीवी नाम मेघवर्ण ५८
मंत्री मेघवर्णेनेदृशीं दशां नीतः तन्निवेद्यतां आत्मनः स्वामिनस्तेन सह बहु वक्तव्यमस्ति अथ तैर्निवेदिते स
उलूकराजो विस्मयाविष्टस्तत्क्षणात्तस्य समीपं गत्वा प्रोवाच भोः किमेतां दशां गतः तत्कथ्यतां चिरंजीवी आह
देव श्रूयतां मदवस्थाकारणं अतीतदिने स दुरात्मा मेघवर्णो युष्मत्प्रहतप्रभूतवायसानां युष्माकमुपरि शो
कग्रस्तो युद्धार्थं प्रचलितः आसीत्ततो मयाभिहितं न भवतो युक्तं तदुपरि गंतुं उक्तं च बली यस्मात् हीनबलेन विरो
धं भूतिकामो मनसापि वांछयेत् न वध्यते वैतसवृत्तिमाश्रितस्य प्रणाशो हि पतंगवत्तथा १ तत्तस्योपप्रदानेन।

संधिविधानं युक्तं उक्तं च बलवंतं रिपुं दृष्ट्वा सर्वस्वमपि बुद्धिमान् दत्त्वा च रक्षयेत्प्राणान् रक्षितैस्तैर्धनैः पुनः २ त
त्तव पादपद्मसेवकारं मां श्रुत्वा दुर्जनप्रकोपितेन त्वत्पक्षपातिनं मां शंकमानेनेमां दशां नीतः तत्तव पादाः संप्रतं
मे शरणं किं बहुना यावदहं प्रचलितुं समर्थस्तथापि तस्यावासं मां नीत्वा सर्ववायसक्षयं करिष्यामि अथा
रिमर्दन एतदाकर्ण्य पितृपैतामहान् सचिवानुवाच रक्ताक्षः दीप्ताक्षः वक्रनाशः क्रूराक्षः एतस्य चत्वारः॥
सचिवाः आदौ रक्ताक्षं पृष्टवान् भद्र एष तावत्तस्य रिपोर्मंत्री मम हस्तीभूतस्तत्किं क्रियते स आह देव एत
स्य आद्यो मंत्री यद्यपि वेलामुहूर्तं गुणेन दुर्जनोक्तेन वाक्येन वियोजितस्तदस्य वाक्यं सोऽस्मदर्थेन्यथा करिष्यति
यतो नंदैव विग्रहासक्तेन वैरं भुजंगानां क्रोशः न्ययोन निद्रा च न विलासेषु च स्पृहा विग्रहासक्तचित्तानां नृप
णां क्वापि जायते १ तस्मादस्य द्वारेण साम्ना सुखेन वर्तितव्यं उक्तं च सामादिदंडपर्यंतो नयः प्रोक्तः स्वयंभुवा तेषां
उदंडः पापीयान् तं पश्चाद्विनियोजयेत् २ तथा च यामाभिहानि कार्याणि विकृतिं यांति नो क्वचित् सन्न्यासीनां।
मनासीव जायंति प्रमुदे सदा ३ सामसिद्धेषु कार्येषु यो दंडं कर्म कुरुते बुधः स पित्ते शर्करासाध्ये पटोलं कटुकं पिबे
त् ४ यच्चैवं वदसि शत्रुर्वो दंडे साध्यो न साम्ना साध्यस्तद्वदाम्युक्तं उक्तं च पर्णशाष्टमपि श्रुत्वा प्रसंति द्विरिण
वने ते पि साम्नैव बाध्यंते दुष्ट कैरीतगीतकैः ५ अन्यच्च शत्रोः समुच्छेदनार्थाय न साम्नस्त्वन्यदौषधं देवं ते हि
प्रपाते न न किं दह्यति पद्मिनी ६ तद्यदि मद्वचनं प्रमाणं तत्संधानाय रिपोः सामप्रयोक्तव्यं एवं तस्याभिप्राय
श्रुत्वा क्रूराक्षमाह भद्र तवाभिप्रायं श्रोतुमिच्छामि एवंविधेऽर्थे समुपस्थिते किं मया कर्तव्यं भवति स आह देव
तस्य निसर्गवैरिणो यत्सामप्रयोजनं तन्मम न प्रतिभाति उक्तं च चतुर्थोपायसाध्ये तु शत्रौ सांत्वमपक्रिया स्वे
द्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिंचति ७ तद्भेदसाध्यो दुष्टोपि रिपुर्भवति अपि विविधैस्त्रिकूटः शत्रुर्यातान्तदेन
सिध्यति तस्माद्भेदः प्रयोक्तव्यः शत्रूणां विजिगीषुणा ८ राज्यकामं समर्थं च यथा रामो बिभीषणं कूटजे दे॥

धनोऽग्नौ ईषयेद्धत्रुपक्षजं २ प्रधानपुरुषं यस्य हित्वा दर्पेण राजयः भेद्यं परबलं ज्ञात्वा दुर्जेयमपि भेदतः २० अ
तः सुखेन जयेत् घुणैर्भिन्नं सुदारुवत् एवं ज्ञात्वा विवेकिना शत्रुसाधनाय भेदः प्रयोक्तव्यः सर्वविजिगीषुगुणेषु
क्तो स्वशत्रुसाधनाय भेदो वरः तस्यासौ न विष्यति उक्तं च अतस्थिना विप्लवेन सुवृत्तेनापि चामरेण अतर्भिन्नेन
संप्राप्तं मौक्तिकेन निबंधनं २१ तद्यदि मम मतमनुष्ठीयते तदा स्वपक्षे भेदो रक्षणीयः परपक्षे प्रयोक्तव्यः एवं
तस्याभिप्रायं विदित्वा दीप्ताक्षमाह नह अत्र विषये तव कोऽभिप्रायः स आह देव मम सामभेदावपि न प्रति
भासतः ततो न साम्ना तथा शत्रुः साध्यति नच भेदेन यथोपप्रदानेन न लुब्धः तस्मादुपप्रदानेन वश्यः स्यात् वि
श्वास्य उक्तं च नाना विष्टो नटो वित्तं वीक्षितेन मच्चापदं दुग्धं पश्यति मार्जारो यत्तो न लकुटादिति २२ शत्रुर्वाञ्छा
विघाताय बुद्धियुक्तो महीपतिः सामं नयति सामेन यथैवापो महोदधिः २३ अपि स्यात्पि रद्दो वैरी सो पिदा
न विलोभितः गतो विश्वासभावं च शत्रोरात्मानमर्पयेत् २४ दुर्गस्था अपि बध्यन्ते शत्रवो दान संश्रयात् स्वल्प
मांसप्रदानेन कैवर्तैरिव मत्स्ययोर्यथा २५ अपरं यश्च शत्रोरुपप्रदानं वर्जयित्वा तिष्ठति सोऽप्यत्र उपप्रदानव्याजा
त् शत्रुर्निर्मूलं याति उक्तं च अच्छेद्यमपि विद्यामो वर्द्धयत्यरिमिक्तदा गुडेन वर्द्धितः श्लेष्मा यतो निर्नाशतां नयेत्
२६ एवं तद्वचनमाकर्ण्य क्रूरनाशमूर्च्छे मौनिवेद्यतामात्मनोऽभिप्रायं स आह देव किं वदामि यत्त्रयाणामप्येषां ५९
मध्ये एकेनापि न नीत्या श्रेयोऽभिहितः यतोऽशक्तानामिते सामभेदोपप्रदानोपायः शक्तानां पुनः शत्रुविषयेऽदंड
एव उक्तं च दंडं मुक्त्वा च यो हन्या न्युपायान्योजयेद्रिपौ यतं निर्जितमिति ज्ञात्वा स्वे [illegible] थावंति तं प्रति २७ अपरं सामा
दिभिश्रया लक्ष्मीर्भूभुजां दंडं विना सा लक्ष्मीर्नाभिवति उक्तं च अकृत्वा पौरुषं याश्री विलासिन्या पि कांतया जरद्ग
वोपि चाश्नाति दैवादुपगतं तृणं २८ मनसा सर्वलोकानां लक्ष्मीर्हस्तगतेव हि कर्माणोद्दामदंडानामेव स्याद्वशव
र्त्तिनी २९ दुर्बलास्त्रीव वित्तेन लक्ष्मीः संसेव्यतेरसैः पणस्त्री वोद्यतैश्चैव युद्धवीर्यधनप्रदैः ३० किरीटमणिवि

न्येषु मूर्द्धस्वात्मसबलेन हि नादत्वा द्विषतां पादं प्रबधः श्रियमश्नुते ३१ हेला कृष्ट स्फुरत्खड्ग दीप्तांशुपरिपिंजरैः श्रीम
त्करिकराकारे राहार्यते भुजैः श्रीयः ३२ पराक्रमपरामर्श वशीकृत नृपो नृपैः लक्ष्मीर्भोग्या कसुम्भेव स्वयंग्राहकृतं
टंकिनी ३३ शत्रोः श्रियं मदोच्छ्रायी सिंही वृत्तिसमाश्रितः करग्रहेण भुंजीत दुर्विनीतामिव स्त्रियं ३४ एवं तस्यापि
संमतं समाकर्ण्य पिंगरमात्यं प्राकारवर्णनामानं प्रत्याह सोऽभिधीयतामात्मनोऽभिप्रायः स आह अवध्योयं
विशेषान्नव पक्षाश्रयः शरणागतश्च तदेनं स्वदुर्गे नीत्वासम्मान्यच ततोऽन्यतो नाग्रसरणाशत्रवो व्यापादनीयाः सुःख
उक्तं च मंत्रो मन्त्रमुपादत्ते ज्ञातीनां ज्ञातिसम्भवः रावणं विजयेद्रामो विभीषणमयोजयत् ३५ अपरं अस्य वधा
न्महत्पातकमस्ति उक्तं च वदन्त्युदैन्यं शरणागतेषु कृतोपकारेण याचकेषु दयाविहीना [illegible] रंति ये त्वत्ते रौर
वादीनिनि [illegible] वयंति ३६ सदक्षिणसमृद्धस्य वाजिमेधस्य यत्फलं तत्फलं लभ्यते सम्यक् यो रक्षेच्छरणागतं ३
७ अथ तस्य मतमाकर्ण्य स्वयमरिमर्दनोऽभिहितवान् सोममाप्यमभिप्रायः एष तावत्कपटीभवति मदर्थे
स्वामिनातिरस्कृतः तत्प्रयुज्यते स्वदुर्गे नेत्रायुक्तमुक्तं प्राकारकरणेन यदि पुनरेतद्युज्यते हन्यते वा ततः कृत
घ्नता दोषो भवति उक्तं च ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृति
ः ३८ तथा च सत्कृताश्च कृतार्थाश्च मित्रायन्न भवंति ये मृतानामपि नो काकास्तेषां मांसानि भुंजते ३९ तच्छुत्वा
वक्रनाशः प्राह देव न युक्तमेतत् तच्छत्रु पक्षपातिनां दुर्गदर्शनं उक्तं च अज्ञातपुरुषायस्य प्रविशो निम
हीपतेः दुर्गं तस्य न संदेहः प्रविशंति द्रुतं द्विषः ४० तच्छ्रुत्वारिमर्दनः प्राह नानयुक्तमुक्तं भवता दुर्गमिति कात
रप्रवादोयं शूराणां स्वभुजः परं दुर्गं उक्तं च यस्य यस्यासहजं वैरं वीर्यं हन्यते सोऽन्वारिभिः मणिदीपस्य नो जेष्ठा
नि यद्वायुर्वारयते शिखां ४१ तन्नाहमस्य चिरंजीविनो विषये कृतघ्नो भविष्यामि दुर्गाश्रितोऽपि कालेन नाशं
यास्यामि उक्तं च दुर्गं त्रिकूटोपरि खा समुद्रो रक्षांसि योद्धा धनदाच्च वित्तं शास्त्रं च यस्योशनसा प्रणीतं स रावणः

कालवशाद्विपन्नः ३४ तन्नियतामेषः स्वदुर्गमित्युक्त्वा तमुवाच चिरंजीविन् मया यावत्त्वं च त्वत्परिग्रहः संगृ
ह्यितो गृहितश्च तदागम्यतां मे दुर्गं तत्र स्थोयत्त्वत्कुलोचितं तत्कुरुष्व सोप्यतिहृष्टो विहस्य तमुवाच किं बहुना
देवात्र प्रलपितेन मदीयकुलशीलतो फलेन ज्ञास्यसि तच्छ्रुत्वा वक्रनाशः प्रोवाच भो विनष्टं कुलं कौशिका
राजदोषेण तत्कस्य कथ्यते दोषमात्रेण जनः क्रुद्धं पार्थिवाय निवेदयेत् यदीमां हि प्रदोष्टनृप स्तदा कस्तं निषे
वेत् ३५ एतमनादृत्य चिरंजीविनमादाय शनैः शनैर्दुर्गमाभ्यगाद् उलूकं प्रति चिरंजीवि ततद्दुर्गं विषमतामा
लोक्य स्वचित्ते चिंतितं वध्यतां ये नोक्तः स्वामी मां प्रति स एष नीतिज्ञो हितश्च अन्ये मूढतमाः स्वामिनामद अथ ते
उलूकास्तेनोलूकपतिना प्रोक्ताः अद्यावि चिरंजीविनं सर्वमाश्रयं दर्शयत तच्छ्रुत्वा व्यचिंतयत् चिरंजीवि मया
तावत्तेषां वधोपायो विचिंतितः स मया मध्यस्थितेन न भवति एते पि सावधाना न विष्यति तदेतद्दुर्गद्वारमाश्र
यामि येनात्र स्थानं निग्रायं करोमि ततः स उलूकं नृप प्राह देव तद्वेतदकुयुक्तं परमहमपि नीतिज्ञो हितश्च
ते यद्यपि तेनुरक्तः शुचिस्तथापि ते दुर्गमध्ये न वासार्हः यावत्ते महत्कार्यं संपादितं तावदहमत्रैव दुर्गद्वारस्थः
सदा भक्तिसेवां करिष्यामि तथानुष्ठिते वक्रनाशः स्ववर्गानाहूय प्रोवाच भो एतावत्तं कालं एतस्मास्माकं स्वपात
ः कुलं दुर्गं च तदन्यं पर्वतमाश्रित्य दुर्गं श्रयामि उक्तं च अनागतं यः कुरुते स शोभते न शोभते यो न करोत्यनाग
तं वनेत्र संस्थेन महागुहाश्रया विहस्य वाचा न कदापि विश्रुता ते प्रोचुः कथमेतत् सोब्रवीत् अथ कस्मिंश्चि ६०
द्वनोद्देशे खरनिखरो नाम सिंहो निवसतिस्म स कदाचिदितश्चेतश्च विचरन् क्षुत्क्षामो न किंचिदपि सत्वमासा
दितवान् ततश्चास्तसमये महतीं गुहामासाद्य प्रविश्य चिंतितवान् नूनमेतस्यां गुहायां रात्रौ केनचित्सत्वेनागंत
व्यं तन्निभृतो भूत्वा तिष्ठामि यावदत्र सत्वः समागच्छति ततस्तस्याः स्वामी दधिपुच्छो नाम समायातः स यावत्पश्यति।
तावत्सिंहपद्धति गुहायां प्रविष्टा न च निष्क्रांता ततः सो व्यचिंतयत् अहो विनष्टोस्मि नूनमस्यांतर्गतेन सिंहेन भाव्यं

तत्किं करोमि कथं ज्ञास्यति मिदः एवं विचिंत्य द्वारस्थः फूत्कर्तुमारब्धः अहो बिल बिलेति प्रोच्य भूयोप्यभाषत: को हेतु।
स्त्वं न वेत्सि यत्त्वया सह मे समयधर्मोस्ति मया पि त्वं वक्तव्यो बाह्यादागमयातेन त्वं त्वया चाहमाकारणीयः तद्यदि मां ना
ह्वयसि तदा द्वितीयं बिलं यास्यामि सिंहोपि तच्छ्रुत्वा चिंतितवान् नूनमेषा गुहास्याह्वानं करोति साध्वसान्न।।
किंचिद्वदे अथवा साध्विदमुच्यते भयसंत्रस्तमनसां हस्तपादादिकाः क्रियाः प्रवर्तंते विना वाणी वेपथुश्चाधिको।
भवेत् १ तदहमस्या आह्वानं करोमि अथ सिंहशब्देन या गुहा प्रतिरवपूर्णा अन्यानपि दूरस्थान् त्रासयामा
स लोमांतकोपि पलायनपरः इमं श्लोकमपठत् अनागतं यः कुरुते स शोभते इति एवं मया सह गम्यतां एतदनि।
श्चय स परिजनो वक्रनाशोऽन्यदेशं गतः अथ वक्रनाशे गते चिरंजीव्यपि हृष्टमना व्यचिंतयत् अहो कल्याणम
स्माकमुपस्थितं यद्वक्रनाशो दूरदेशं गतः तदेते मूढतमाः सुवध्याः संजाता मे उक्तं च न दीर्घदर्शिनो यत्र [illegible]
मंत्रिणः सुर्महीपतिः क्रमान्मूलं क्रमं तस्य न चिरात्स्यात्परिक्षयः १ अहो साध्विदमुच्यते मंत्रिरूपा हि रिपवः।
संभाव्यास्ते विचक्षणैः ये संतं नयमुत्सृज्य सेवंते प्रतिलोमतः २ एवं विचिंत्य स्वकुलाये एकैकं काष्ठं दिने दि व
ने क्षिपति गुहाप्रदीपनार्थं न च ते मूर्खा उलूका जानंति यदेष कुलायमस्मद्दाहाय वर्धयते अथ साध्विदमुच्य
ते अमित्रं कुरुते मित्रं मित्रं द्वेष्टि निहंति च अविराज्ञेतेडः स्वं। दीपो जलदतो यथा ३ अथ प्रकृते तूलवद्ध
खडकाष्ठानि प्रग्रारे कुलायव्याजेन चित्ते दुर्गद्वारे स्थयोर्दृढे संजाते अथ तां ग्रामेषु उलूकेषु चिरंजीव मूकं गत्वा।
मेघवर्णमाह देव स्वामिन् साध्या धुना कृता मया तेरिपुगुहा तत्सर्वपरिवारेण समेतो नित्यमेव एकैकां वनक
ष्ठिकां गृहीत्वा सर्वैश्च वायसास्तत्र गुहाद्वारे स्मत्कुलीये प्रक्षिपंतु येन सर्वशत्रूणां कुंभीपाकेन विष्यति तच्छ्रुत्वा
प्रहृष्टो मेघवर्ण आह तत्कथयात्मवृत्तांतं यत् चिरात् दृष्टोसि स आह वत्स कालो नायं वक्तव्यस्य कदाचि
त्तस्य रिपोः कश्चित्प्रणिधिर्मम आगमनं तस्य निवेदयिष्यति तद्विज्ञानादंधोप्यपसरणमन्यत्र कारणेन विष्यति

त्वर्यतामधुना काकगोष्ठी उक्तं च शीघ्रकृत्येष्वसमुत्पन्ने विलंबं याति यो नरः तत्कृत्यं देवता तस्य कोपाद्विघ्नंत्य
ति १ यस्य तस्य हि कार्यस्य सफलस्य विशेषतः क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसं २ तद्गृहायातस्ते शत्रो॥
स विस्तरं निराकुलं मया कथयिष्यामि अथासौ तदाकर्ण्य एकैकां काष्ठिकां चलंती चंच्वग्रेण गृहीत्वा तद्गुह
द्वारं प्राप्य चिरंजीविनः कुलाये प्रचिक्षिपुः ततः सर्वे ते दिवांधाः द्वारस्यावृतत्वात् अगतिः स्मरंतः कुंभीपाकन्या
यमापन्नाः एवं शत्रून् निःशेषतां नीत्वा पुनरपि मेघवर्णस्तमेव न्यग्रोधपादपदुर्गं गतः प्रमुदितमनाः सुखोपविष्टः
सभामध्ये चिरंजीविनं प्राह तात कथं त्वया शत्रुगृहे गतेनैतावान्कालो नीतः तदत्र श्रवणाय कौतुकमस्मा॥
कं स प्राह आगामिफलवांछया वसत्कथमपि सेवको न ज्ञायते उक्तं च उदयकरो यो भावः शक्यते च सदा॥
जनैः ज्ञातं न विडंबास्यन्नं हृदि कालांतरस्थितं १ छत्रपादसमो ज्ञेयः सुहृत्परिजने सति तस्माज्ज्ञातः परिज्ञेयो
विपक्षेष्वेव केष्विव २ तथाच कार्यस्यापेक्षया भुक्तं विषमप्यमृतायते सर्वेषां प्राणिनामेव नात्र कार्या विचारणा ३
अन्यच्च सिद्धिं वांछयता जनेन विज्ञेनात्तेजो निगृह्य स्वकं सत्वोत्साहवतापि दैवगतिषु स्थैर्यं सुकार्यं बुधैः देवेंद्र
द्रविणाधिपैर्बहुगुणैरभ्यर्चितोऽप्यग्निभिः क्लिष्टः सुचिरायधूयत वने पूर्वं न धर्मात्मजः ४ तथाच रूपेणाप्र
तिमेन यौवनगुणैः श्रेष्ठे कुले जन्मना गत्वा नित्यदिनानि दैववशतो भूयो धनं वांछता सैरंध्रीप्रतिगर्हितेयुव॥
तिभिः साक्षेपमाज्ञाप्यया द्रौपद्या किल मत्स्य नवने घृष्टं न किं चंदनं ५ तदपि स्थेयो भवति सोऽपमान
मपि सहित्वा कार्यं साधयति संहिते सुहृदपि भूत्वा प्राज्ञः शक्तिक्षये निराकारं कालं प्रतीक्षमाणः प्रतिप्रच्छा
दितः शक्ति ६ तत्किं बहुनानेनात्र हस्त्वर्वसमानो हृष्टः सुखेनैकं वक्तुनाशं तेन सर्वे मिमानि प्रायो ज्ञातः विशेषेण
निवेदितो निजस्वामिने ततश्च तस्य कारणात्वं त्वनस्य सपरिजनो गतः शेषामंत्रिणः स्वामिना सह तत्रैव स्थिताः अ
थवा साध्विदमुच्यते संपातापर्यंतिच सपस्य भुजंगरोगाद् मंत्रिणां कमुपयाति न नीतिदोषः कं श्रीर्न दर्पयति कं न नि

हंति मृत्युः कं स्त्रीसंतेन विषयाः परिपीडयंति ७ कृपणस्य नश्यति यशो पिशुनस्य मैत्री नष्टक्रियस्य कुलमर्थपरस्य धर्मः
विद्याफलं व्यसनिनः कृपणस्य सौख्यं राज्यं प्रमत्तसचिवस्य नराधिपस्य ८ कथितं च वत्कुनाशेन नतत्र दुर्गे गच्छता
सता ज्ञो स्वामिन् श्रूयतां मे निश्चयोऽतिसंदेशकः शत्रुभ्यो ह्यागतो भृत्यः शत्रुसंसर्गतत्परः विकारहेतुर्विज्ञेयो वचने
न न विश्वसेत ९ आसने शयने याने पाने वा भोजने तथा किंचिच्छिद्रं समासाद्य ते कुर्वंति विरूपतां १० इत्था।
मपरिवारो गतः अहमपि तेषामपमानं सहमानो रंध्रप्रेक्षी एतावंती दिनानि यावत्तत्र स्थितः उक्तं च अपमानं पुर
स्कृत्य मानं कृत्वा तु पृष्ठतः स्वार्थमुद्धरयेत्प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ११ तथाच स्कंधेनापि वहेच्छत्रुं यावत्का
र्यं न सिध्यति संसिद्धे तु पुनस्तस्मिन् भिंद्यात्कुंभमिवाश्मना १२ तत्र यैतद्दनुष्ठीतं कोमलालापं विदधता मानहि
ने नापि उक्तं च वने प्रज्वलितो वह्निर्ज्वलन्मूलानि रक्षति समूलमुन्मूलयिता वायुश्च मृदुशीतलः १३ मेघवर्णः प्रा
ह तात सत्यमेतत्त्वं ये महात्मानो भवंति ते महापदं गता अपि प्रारब्धं न परित्यजंति महत्त्वमेतन्महतां नयालंबन।
धारिणां न मुंचति यदारब्धं प्राप्तेपि व्यसनोदये १४ तथाच प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहिता
विरमंति मध्याः विघ्नैः सहस्रगुणितैः प्रतिहन्यमानाः प्रारब्धमुत्तमगुणा न परित्यजंति १५ तत्कृतं निःकंटकं मम रा
ज्यं शत्रून् निःशेषतां नयता त्वया अथवा युक्तममैतन्नयवादिनां उक्तं च यतः शेषं रणाच्छेषं शत्रोः शेषं शेषयेत्
पुनः पुनः प्रवर्धंते तस्मान्निःशेषतां नयेत् १६ तन्नास्ति त्वत्समो बुद्धिमानमंत्री येन शस्त्रमोक्षणं विनापि शत्रवो
निहताः अथवा साध्विदमुच्यते शस्त्रैर्हता अपि रिपवो न हता भवंति प्रज्ञाहतास्तु नितरां सुहता भवंति।
शस्त्रैर्निहंति पुरुषस्य शरीरमेकं प्रज्ञा कुलं च विभवं च यशश्च हंति १७ चिरंजीवी प्राह सदेव सन्नावो यं न विघ्न
हृद्धित्वं वयं परं मूकाः कर्मानुष्ठानमात्रगमः उक्तं च प्रसरति मतिः कार्यारंभे दृढीभवति स्पृहा वयमुपगमा।
दर्थान्मंत्री न गच्छति विप्लवं कलयति सकलं कृत्यं चित्तं समुन्नतिमश्नुते भवति च रतिः श्लाघ्ये कृत्ये नरा

न विषमता ४८ तन्नवचन विषमतो विपद्धस्य न विषमतेति बुद्धिविपर्यासिनज्ञानं यतो ये विज्ञानवंतितेषां ध्यव
सुदृष्टाणां न विषमता न विषमतो व्यवहारादेव जानंति उक्तंच वांछयैव स्वयति पूर्वं तरं न विषमतु सान्य
सुकृतं यदि वेतरस्य विज्ञायते शिघ्र रजायंत कालोपि विज्ञान् प्रत्यक्षपदे रपरान् परजः कलापी ४९ तद्ध
सन्मुखो विधिर्भवति यतः न देवाः शस्त्रमादाय निघ्नंति चरिपन् कुध्या यं तु दिंमित्र मिच्छति बुध्या विरूप
तितं ५० बुद्धौ कलुषभूतायां विनाशसमुपस्थिते अनयोपि नयो जाति सर्वेषामव देहिनां ५१ लक्षणं तद्धि
ज्ञातमिति॥ ॥इतिश्री विष्णुशर्मविरचिते नीतिशास्त्रे पंचोपाख्याननाम्नि ग्रंथे काकोलूकीयं नाम तृतीयं तं
संपूर्ण॥३॥ ॥१५७०॥ अथेदमारभ्यते लब्धप्रणाशं नामचतुर्थं तंत्रं तस्यायमाद्यश्लोकः प्राप्तमर्थं तु यो मो
हात् संधानैः प्रतिमुंचति स तदा वंच्यते मूढो मकरः कपिना यथा १ समुत्पन्नेषु कार्येषु यस्य बुद्धिर्न हीयते स
कस्तरं तरं त्येते जलांते वानरो यथा २ राजपुत्राः प्रच्छंति कथमेतत् विष्णुशर्म कथयति अस्ति समुद्रोपकंठे महा
फलो जंबुपादपः तत्र रक्तमुखो नामा वानरः प्रतिवसति स्म स कदाचित् तस्य तरोरधस्तात् समुद्रोशालिला त्रिकमुखि
कराल मुखो मकरः स कोमल वालुका सनाथे तीरोपांते न्यविशत् ततश्च रक्तमुखेनोक्तं न वान तिथिरसा द्धि त्वम् ३
याद त्नान्यमृततुल्यानि जंबुफलानि उक्तंच प्रियो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा वैश्वदेवे तु संप्राप्ते सोतिथि
: स्वर्गसंक्रमः ३ न पृच्छेत् चरणं गोत्रं न च स्वाध्यायो देशमेव वा अतिथिं वैश्वदेवांते श्राद्धे च मनुरब्रवीत् ४ दूराद्ध्व ६२
यातं तथा ज्ञातं वैश्वदेवांतमागतं अतिथिं पूजयेद्यस्तु स याति परमां गति ५ अन्यच्च अपूजितोतिथिर्यस्तु गृहा
द्याति विनिःश्वसन् गच्छंति विमुखास्तस्य पितृभिः सह देवताः ६ एवमुक्त्वा जंबुफलानि तस्मै ददौ सोपि तानि भ
क्षयित्वा तेन सह चिरं गोष्ठी सुखं अनुभूय भूयोपि स्वगृहमध्यास्ते एवं नित्यमेव तौ वानर मकरौ जंबुच्छायाश्रि
तौ विविधैः साधुगोष्ठ्या कालं नयंतौ सुखं तिष्ठतः एकस्मिन्नहनि मकरेण जंबुफलानि स्वभार्यायै समानीयद

त्तानि तानि च सा भुक्त्वा तमाह नाथैवं विधान्यमृतफलानि क्व प्राप्नोसि सोब्रवीत् भद्रे ममास्ति सुहृद् रक्तमुखो नाम वा
नरः स प्रीतिपूर्वमिमानि फलानि प्रयच्छति तच्छ्रुत्वा साब्रवीत् यदिमानि फलानि नित्यं भक्षयति तर्हि तस्य हृदय
ममृतमयं भविष्यति तद्यदि मया भार्यया प्रयोजनं तत्तस्य हृदयं मे प्रयच्छ येन तद्भक्षयित्वा जरादि रहिता त्वया
सह क्रीडामि भद्रे तावदेव एकं प्रतिपन्नो भ्राता सोस्माकमपरं फलं दाता ततो व्यापादयितुं न शक्यते तत्त्यज मुधा
ग्रहं उक्तंच एकं प्रसूयते माता द्वितीयं वाक्प्रसूयते वाग्जातमधिकं प्रोचुः सोदरादपि बांधवः ७ साब्रवीत् त्वया
मद्वचनं नान्यथा कदापि कृतं तन्नूनमेषा वानरी न भविष्यति तदनुरागात्त्वं सकलमपि दिनं गमयसि तत्त्वं मम वांछितं
न प्रयच्छति अतः कारणात्त्वया सह संगमे प्राप्ते रात्रौ शय्यो बकुतवद्दूज्वालासमं प्रोच्छ्वसि कथं श्लिष्टबन्धे स्थि
तामालंबसे तन्नूनं त्वं हृदये कदाचिन्महिला स्थिता अथासौ पत्न्याः पुरतः सदीनमाह मयि त्वत्पादपतिते किंक
त्वमुपागते त्वं प्राणवल्लभे कस्मात् कोपमेष्यसि सापि तद्वचनमाकर्ण्याश्रुप्लुतमुखी तमुवाच सार्धं मनोरथशतैस्तव
धूर्त कांता से वस्थिता मनसि कृत्रिमप्रावरणा अस्माकमस्तितव किंचिदिह्या वकाशस्तस्मात्कृतं चरणपातविडंब
नाभिः ८ अपरं यदि तेन वल्लभा सा तत्किं मया शोकेन व्यापादयसि अथस मर्कटस्तेन सह कस्ताच स्नेहः तत्कि
बहुना यदि तस्य हृदयं न ददास्यामि तदाहं प्रायोपवेशनं कृत्वा प्राणांस्त्यजामि एवं तस्याः निश्चयं ज्ञात्वा
चिंताकुलितचित्तः स प्राह साधूच्यते अहो उक्तंच वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च एकाग्रहस्तु मुहु
र्णां नीलीमद्यपटस्तथा ९ तत्किं करोमि कथमसौ मे वध्यः स्यादिति विचिंत्य वानरपार्श्वमगमत् वानरोपि चि
यातं सोद्वेगमिवालोक्य प्रोवाच भो मित्र किमद्य चिरवेलायां समागतोसि कस्मात् साह्लादं नालपयसि न च सुभा
षितं वदसि स आह मित्राद्य तव भ्रातृजायया निष्ठुरगिराभिहितः किं नो कृतघ्नः मा मे च मात्मानं दर्शय यतस्त्वं
ति दिनं मित्रमुपजीवसि न च तस्य स्वगृहद्वारस्पर्शनेनापि प्रत्युपकारं करोषि तन्ने प्रायश्चित्तमपि नास्ति उक्तंच

ह्यग्नेव सुरापेच चौरेस्त्नग्ने ह्वतेशवे निष्कृतेर्विहितासद्भिः कृतघ्नेनास्ति निष्कृतिः २० तत्वंदेवरं प्रत्युपकारार्थं
नय नचेदहं परलोकदर्शनाय गमिष्ये इतिप्रोक्तस्तत्सकाशमागतः तेनमे तयासह कलहमानस्य यतीवेजा
व तदागच्छमे गृहेच आह जाया रचितचतुष्कप्रगुणितमणिमाणिक्याद्युचितमस्कारद्वारदेशवस्त्रे चंदनमालि
सोत्कंठातिष्ठति मर्कट आह भोमित्र उचितमभिहितं मेत्वद्भ्रातृपत्न्या उक्तंच ददातिप्रतिगृह्णातीतिः ६ परंवे
गावयं तवजलांतगृहं तत्कथं तत्र गंतुं शक्यते तस्मात्तामपि भ्रातृपत्नीमत्रानय येन प्रणम्य तदाशीर्वादं गृह्णा
त मि सोऽब्रवीत् मित्रास्ति समुद्रांतः सुरम्ये पुलिनदेशेऽस्मद्गृहं तन्मम पृष्ठमारूढः सुखेनाकृतभयो गच्छ सोपितच्छ्रु
त्वा सानंदमाह भद्र यद्येवं तत्वर्यतां किं विलंबेन एषोऽहं तव पृष्ठमारूढः तथानुष्ठितेऽगाधे जलधौ गच्छंतमालो
क्य भयत्रस्तमनाः वानरः प्रोवाच भ्रातः शनैः शनैर्गम्यतां संप्लाव्यते जलकल्लोलैर्मे शरीरं तच्छ्रुत्वा मकरश्चिंतयाम
स एषतावन्मम पृष्ठच्युतो गाधसलिलत्वात्तिलमात्रमपि गंतुं न शक्तः तत्कथयाम्यस्य स्वाभिप्रायं येनाभीष्टदेवता
मनुस्मरति उक्तंच भद्र मम भार्यावाक्येन विश्वास्य वधार्थमानीतः तत्स्मर्यतामभीष्टदेवता सोऽब्रवीत् भ्रातः किं तेमया
यापकृतं येनास्मान्मेव वधोपायश्चिंतितः मकर आह भोतस्यास्तावद्मृतफलस्वादनरसतव हृदयस्य भक्षणे दोहदः
संजातस्तदेतदनुष्ठितं ततः प्रत्युत्पन्नमति वानर आह यद्येवं तत्भद्र किं त्वया मे तत्रैव न कथितं तेनजंबूकोटरांतः
स्थापितं सुस्वादुहृदयं सदैव समान्येषां तत्हृदयं येन साकृष्टपाली तन्त्रयित्वा अनशनादतिनिवर्तते तच्छ्रुत्वा ६२
मकर आह भोरक्तमुखोहं त्वां तमेव जंबुपादपं प्रापयामि एवमुक्त्वा निवर्त्य तमेव जंबूतरुतलं समागमत् वानरोपि
त्तीर्णविविधदेवतोपयाचितेः प्राप्तः कथमपि जलधितीरं मासाद्य दीर्घाद्दीर्घतरक्रमेव क्रमेण तमेव जंबूपादपमारु
ह्य चिंतयामास अहो मया लब्धाः प्राणाः साध्वुच्यते न विश्वसेदविश्वस्ते विश्वस्तेनैव विश्वसेत् विश्वासाद्भयमुत्प
न्नं मूलादपि निकृंतति २२ तन्ममेतदद्य पुनर्जन्मदिनमिव संजातं मकर आह भो मित्रार्पय मे हृदयं येन तेभ्रातृपत्नी

भक्षयित्वानशनादुत्तिष्ठति अथ विहस्य ततो निर्भर्त्स्य मर्कट आह धिग्मूर्ख विश्वासघातक किं कस्मिंश्चिस्य चित्तहृ
दयं द्वितीयं भवति तच्छीघ्रमतो स्थानं अस्य जंबूवृक्षस्याधस्तान्न पुनरागंतव्यमिति उक्तंच सकृद्दुष्टंच यो मित्रं पुनः संधा
तुमिच्छति स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा २२ तच्छ्रुत्वा सविलक्षो मकरश्चिंतयामास अहो किं मया मूढेनास्य
स्वाभिप्रायो निवेदितः इति विचार्योक्तवान् भो मित्र न तव हृदयेन प्रयोजनं मया तव हृदयपरीक्षणार्थं हास्येनेद
मभिहितं तदागच्छ प्राघूर्णिकन्यायेनास्माकं आवासं तव भ्रातृपत्नी त्वां प्रत्युत्कंठिता तिष्ठति वानर आह भो दुष्टा
पसरताम्धुना नाहमागमिष्यामि उक्तंच बुभुक्षितः किं न करोति पापं क्षीणा नराः निष्करुणा भवंति आख्याहि भद्रे प्रि
यदर्शनाय न गंगदत्तः पुनरेति कूपं २५ मकर आह कथमेतत् सोऽब्रवीत् अस्ति कस्मिंश्चित्कूपे गंगदत्तो नाम मंडू
कराजः स कदाचिद्दायादैरुद्वेजितोऽरघट्टघटीमालामारुह्य कूपात्क्रमेण निष्क्रांतः अथ तेन चिंतितं कथं तेषां
दायादानां मया प्रत्युपकरणीयं उक्तंच आपदि येनापकृतं येन च हसितं दशासु विषमासु अपकृत्य तयोरुभयोः
वे पुनरेवजातं नरं मन्ये २३ इत्येवं चिंतयन् स बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत् तं दृष्ट्वा भूयोऽप्य
चिंतयत् एनं कृष्णसर्पं नीत्वा तत्र कूपे सकलदायादानुच्छेदं करोमि उक्तंच शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन
शत्रुणा व्यथाकरं सुखार्थं कंटकेनेव कंटकं २४ एवं विचार्य बिलद्वारं गत्वा तमाहूतवान् एह्येहि प्रियदर्श
न एहि तच्छ्रुत्वा सर्पश्चिंतयामास य एष मामाह्वयति स न स्वजातीयो भवति नैषा सर्पवाणी अन्येन केनापि सह
मम मर्त्यलोके संधानं नास्ति तदत्रैव स्थितस्तावद्वेद्मि कोऽयं भविष्यति उक्तंच यस्य न ज्ञायते शीलं न कुलं
पराक्रमं न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः २५ कदाचित्कोपि मंत्रौषधचतुरो वा मामाहूय बंधने क्षिप
ति अथवा कश्चित्पुरुषो वैरमनुस्मृत्य कस्यचिद्भक्षणार्थं मामाह्वयति आह च अहं गंगदत्तो नाम मंडूक
पतिः त्वत्सकाशं मैत्र्यर्थमभ्यागतः तच्छ्रुत्वा कृष्णसर्प आह भो अश्रद्धेयमेतत् यत्तृणानां वह्निना सह

उक्तंच योयस्यजायतेवध्यः सस्वप्नेपिकथंचन नतत्सकाशंप्राप्नोति परंतंतत्रकारणं २६ मंडूकआह शत्रु
नवोद्वेजितेनमयासमागतं सर्वस्वनाशेसंजाते प्राणानामपिसंशये अपिशत्रुंप्रणम्योच्चै रक्षेत्प्राणान्धनानि
२७ सर्पआह कस्मात्तेपरिभवः सआह दायादेभ्यः सपोब्रवीत् ततः क्वते आश्रयः कूपे वाप्यांतडागे
तत्कथय स्वाश्रयं सआह कूपेममाश्रयः सर्पआह तन्नास्तितत्रप्रवेशः प्रविष्टस्यस्थानंनास्ति यत्रस्थितस्ते
दायादान्व्यापादयामि तद्गम्यतामिति उक्तंच यच्छक्यंग्रसितुंग्रासं ग्रस्तंपरिणमेच्चयत् हितंचपरिणामेस्यात्
तत्कार्यंभूतिमिच्छता २८ गंगदत्तआह भोसमागच्छतः त्वामहंसुखोपायेनतेतत्रप्रवेशंकरिष्यामि तथातस्यम
ध्येजलोपांतेन्यतरकोटरमस्ति तत्रस्थितस्त्वंलीलयातान्दायादान्साधयिष्यसि तच्छ्रुत्वा सर्पोव्यचिंतयत् अहं
तद्वृद्धः कदाचित्कथंचिन्मूषकमेकंप्राप्नोमिनवा अथसाधूच्यते योहिप्राणपरिक्षीणः सहायैःपरिवर्जितः सोपि
र्वसुखोपायो वृत्तिमारभतेबुधः २९ एवंविचिंत्याह भोगंगदत्त यद्येवं तदग्रेभव येनतत्रगच्छावः गंगदत्तआह ।
भोप्रियदर्शन अहंत्वांतत्रसुखोपायेननयामि स्थानंचदर्शयामि परंत्वयास्मत्परिजनोरक्षणीयः केवलंयानहं
दर्शयिष्यामि तएवभक्षणीयाः सर्पआह भद्रसांप्रतंत्वंमेमित्रत्वमुपागतस्तन्नभेतव्यं यदेवंतवाभिरुचितंतदेवक
रिष्यामि एवमुक्त्वाबिलान्निःक्रम्यतमालिंग्यतेनैवसहप्रस्थितः अथकूपांतमासाद्यारहट्टघटिकामार्गेण सर्पस्तेन स
ह तस्यालयंगतः ततश्चगंगदत्तेन कृष्णसर्पंकोटरेधृत्वा दर्शितास्तेदायादास्तेनसर्वेशनैः शनैर्विश्वास्यभक्षिताः तद
भावे किंचित्तदीयाश्रयितैः साकंविश्वास्यनिःशेषिताः अथसर्पेणाभिहितं भद्रनिःशेषितास्तेरिपवः तत्प्रयच्छमे। ६४
किंचिद्भोजनाय यतोहंत्वयानीतः गंगदत्तआह भद्रत्वयाकृतंमित्रकृत्यं तत्सांप्रतमनेनैवमार्गेणगम्यतामिति सर्प
आह भोगंगदत्तनसम्यगभिहितं नवक्तव्यं कथमहंतत्रगच्छामि मदीयंबिलदुर्गमन्येनरुद्धंभविष्यति अत्रस्थितस्य
मेमंडूकमेकैकंस्ववर्गादपिप्रयच्छ नोचेत्सर्वानपिभक्षयिष्ये तच्छ्रुत्वा गंगदत्तोव्याकुलितमना व्यचिंतयत् अहोकि

मेतन्मयाकृतं एनमानीययदिनिषेधयिष्यामि तत्सर्वानपिभक्षयिष्यति अथसाधूच्यते योमित्रंकुरुतेमित्रं वीर्याभ्य।
धिकमात्मनः सकरोतिनसंदेहं स्वात्मनाहिविषभक्षणं ३० तत्प्रयच्छाम्यहमस्यैकैकंदिनंप्रतिसुहृदपि उक्तंच सर्व
स्वहरणेशक्तं शत्रुंबुद्धिमत्तोनराः तोषयंत्यल्पदानेन वाडवंसागरोयथा ३१ तथाच सर्वनाशेसमुत्पन्ने अर्धंत्यजं।
तिपंडिताः अर्धेनकुरुतेकार्यं सर्वनाशोहिदुस्तरः ३२ नस्वल्पस्यकृतेभूरि नाशयेन्मतिमान्नरः एतदेवहिपांडित्यं।
यत्स्वल्पाद्भूरिरक्षणं ३३ एवंनिश्चित्यैकैकंमंडूकंनित्यमादिशत् सोपितंभक्षयित्वातस्यपरोक्षेन्यद्भक्ष
यति अथसाधूच्यते यथाहिमलिनैर्वस्त्रैर्यत्रतत्रोपविश्यते एवंचलितवृत्तस्तु वृत्तशेषंनरक्षति ३४ अथान्यस्मि
न्दिनेतेनमंडूकान्भक्षयतागंगदत्तसुतः सुदत्तोनाममंडूकोभक्षितः तंदृष्ट्वा गंगदत्तस्तारस्वरेणविललाप ततस्तत्
पत्न्याभिहितं किंक्रंदसिनिराक्रंद स्वपक्षक्षयकारकः स्वपक्षस्यक्षयेजाते कस्त्राणंकःकरिष्यति ३५ तथापिचिंत्यताम
त्मनोनिष्क्रमणं अस्यवधोपायोवा अथगच्छताकालेनसमस्ताअपिमंडूकाः केवलंगंगदत्तस्तिष्ठति ततश्चप्रियद
र्शनेनोक्तं भद्रगंगदत्त बुभुक्षितोहं निःशेषिताः सर्वेमंडूकास्तद्दीयतांमेकिंचिद्भोजनं यतोहंत्वयानीतः सआह
भोमित्रनत्वयाअत्रविषये विद्यमानेनमयाचिंतानकार्या तद्यदिमांप्रेषयसि तदन्येषामपिकूपानांविश्वास्य सर्वान्मं
त डूकानानयामि सोब्रवीत् ममतावदभक्ष्यस्त्वं भ्रातृस्थानेचतोपकारकः त्वंसांप्रतंपितृस्थानेभवसि तदेवंकृतोपाय
वितस्मात्कूपान्निःक्रांतः सनार्यः प्रियदर्शनोपितदागमनकांक्षयातत्रस्थः प्रतीक्षमाणस्तिष्ठति अथचिरायत्प्रि
यदर्शनस्तस्मिन्नेवकूपे अन्यकोटरवासिनींगोधामुवाच भद्रेक्रियतांमेस्तोकंसाहाय्यं यतश्चिरपरिचितस्तेगंगद
त्तस्तद्गत्वा तत्सकाशंकुत्रचिज्जलाशयेतंसंकथय तदागम्यतां भवताद्रुततरं एकाकिनापियद्यन्येमंडूकानागच्छं
नाहंत्वयाविना अत्रवस्तुंशक्नोमि तथाहंयदित्वांप्रतिमनसापिविरुद्धमाचरामि तन्मदीयजन्मसुकृतंतवेति गोधा
च तद्वचनाद्द्रुततरमन्विष्य गंगदत्तमाह भद्रतवसुहृत्प्रियदर्शनस्तवमार्गंसमीक्षमाणस्तिष्ठति ततःशीघ्रम

म्यतां अपरं तेन त्वां विस्रम्भाचरणार्थं जन्मसुकृतमंतरेण तं तन्निःशंकेन मनसा समागम्यतामिति तच्छ्रुत्वा गं...
आह यतः बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवंति इत्येवं श्लोकमपाठीत् एवमुक्त्वा तां विसर्जयामास इति कथा १ तदहं
जलचरो ह्यमपि गंतुं नेच्छामि कथं विदधे तवाहं यथा त्वं न हन्यसे मित्र तद्भवतु त्वं कृतं केन कथं विदधियास्यामि तच्छ्रुत्वा मकर आह भो मित्र नैतद्युज्यते कर्तुं सर्वं
कृतघ्नतादोषमपनय मद्गृहागमनेन अथवा तवोपरि प्राणोपवेशनं करिष्यामि वानर आह भो मूर्ख नाहमपि
लंबकर्णः यः किल आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमं अकर्णहृदयो मूर्खो यो गत्वा पुनरागतः २६ मकर आह
कोऽसौ लंबकर्णो नाम कथं दृष्टापायो मृतः तन्मे निवेद्यतामिति वानर आह अस्ति कस्मिंश्चिद्वनोद्देशे करालकेसरो ना
म सिंहः तस्य च धूसरको नाम शृगालः सदानुयायी परिचारकोऽस्ति अथ कदाचित्सिंहस्य हस्तिना सह युध्यमानस्य श
रीरे गुरुतराः प्रहाराः संजाताः तैः पदमपि चलितुं न शक्नोति तस्य चलनाभावे धूसरकः क्षुत्क्षामकंठो दौर्बल्यं गतोऽन्यस्मि
न्नहनि तमवोचत् स्वामिन् बुभुक्षापीडितोऽहं तत्कथं ते शुश्रूषां करोमि सिंह आह भो धूसरक अन्वेषय किंचित्सत्त्वं ये
नेमामवस्थां गतोऽपि व्यापादयामि तच्छ्रुत्वा शृगालोऽन्वेषणं कुर्वन् कंचित्समीपवर्तिनं ग्राममासाद्य लंबकर्णनामानं रासभं त
डागोपांते प्रविरलदूर्वांकुराणि कृच्छ्रादास्वादयंतं दृष्टवान् ततश्च तेन समीपवर्तिना भूत्वाभिहितः माम मदीयो नमस्का
रोऽयं संभाव्यतां पुनः दृष्टः कथमेवं दुर्बलतां गतः लंबकर्ण आह भो भागिनेय किं करोमि रजकोऽतिनिर्दयो मामतिः
भारेण पीडयति घासमुष्टिमपि न प्रयच्छति केवलं लंबमानान् धूलिमिश्रितान् दूर्वांकुरान् भक्षयतो नास्ति शरीरपुष्टिः
इति शृगाल आह माम यद्येवं तदस्ति मरकतसदृशशष्पप्रायो नदीसनाथो रमणीयः प्रदेशः आगत्य मया सह सुभाषितगोष्ठीसुख
मनुभवन् तिष्ठ लंबकर्ण आह भो भागिनेय युक्तमुक्तं भवता परं ग्राम्याः पशवोऽरण्यचराणां वध्यास्तत्किं तेन भव्य
प्रदेशेन शृगाल आह मामैवं वद मद्भुजपंजररक्षितोऽसौ प्रदेशः तत्रान्यस्य कस्यचित्परस्य प्रवेशः परमनेनैव रजकदोषेण
खिन्नास्तिस्रो रासभ्योऽनाथाः संति ताश्च पुष्टिमापन्ना यौवनोत्कटा मामिदमाहुः भो मातुल कमपि त्वं ग

त्वा सदृशं पतिं वरयितुमानय तदर्थं त्वामहमानेतुमायातः अथ शृगालवचनं श्रुत्वा कामपीडितांगो लंबकर्णस्तमा
ह भद्र यद्येवं तदग्रे भव त्वरितं तत्र गच्छावः उक्तं च नामृतं न विषं किंचिदेकां मुक्त्वा नितंबिनीं जीव्यते संगतो यस्या म्री
यते च वियोगतः २७ ततः शृगालेन सहासौ सिंहांतिकमुपागतः सिंहोऽपि तं दृष्ट्वा यावदाक्रमति तावत्स रासभस्तस्य दृष्टि
पथमुपगतो भयात् पलायितुमारब्धः सिंहोऽपि वज्रघातमिव मन्यमानः किमिदमित्यचिंतयत् अहो तथाद्यैवाल्पक्लमो न पत
स्मात्पलायितः यावदसौ वलिततनुं ईक्षते तावत्क्रूरकांतनयनप्रतिनयानकमदृष्टपूर्वं यत्त्वं दृष्ट्वा भयार्तस्त्वरितं तदो
पवनगरं जगाम अथ गोमायुना सिंहोऽभिहितः भोः किमेतत् दृष्टस्ते विक्रमोऽयं अथ सिंहः सविस्मयमाह भो मया न क्र
मः सज्जीकृत आसीत् तत्किमहं करोमि अन्यथा मयाक्रांतो गजोऽपि न गच्छेत् शृगाल आह सांप्रतमपि त्वया मज्जितक्रमेण स्थ
६ तव्यं यत्पुनरपि तं अहं त्वदंतिकमानेष्यामीति सिंह आह यो मां प्रत्यक्षं दृष्ट्वा गतः स कथं पुनरत्र समेष्यति तदन्य
त्किंचित्सत्त्वमानय शृगाल आह किं तवानया चिंतया त्वं तावदर्थ अहमपि जागरूकस्तिष्ठामि इत्युक्त्वा शृगालोऽपि रासभा
नुमार्गं याव गच्छामिति तावत्तत्रैव स्थाने विवरं तिष्ठति अथ शृगालं दृष्ट्वा रासभः प्राह भो भागिनेय भव्यस्थाने त्वया
नीतः अहो दैवान्मृत्युवशं न गतः तत्कथय किमेतत्सत्त्वं मतिरौद्रं यस्य वज्रोपमप्रहारादहं मुक्तः तच्छ्रुत्वा शृगालः प्रह
सन्नाह भो माम सा रासभी विश्वस्ता द्रुतमागता त्वां सवलोकय सानुरागा त्वामालिंगितुमुत्थिता त्वं च कातरतया नष्टः
तथापि भवतो वलं बनार्थं हस्तः प्रसारितो न चान्यत्कारणं तदागच्छ सा च त्वत्कृते प्राणोपवेशनं कृतमिति वदति
यदि मे लंबकर्णो भर्ता न भवति तदहमग्नौ जले वा प्रविशामि विषं वा भक्षयिष्यामि तथापि त्वद्वियोगं सोढुं न श
मि तत्प्रसादं कृत्वा तत्रागच्छेति नो चेत्स्त्रीहत्या भविष्यति मन्मथश्च कोपं करिष्यति उक्तं च स्त्रीमुद्रां मकरध्वजस्य ज
यिनीं सर्वार्थसंपादिनीं ये मूढाः प्रविहाय यांति कुधियः स्वर्गाय वर्गेच्छया तेनैव प्रविनिहत्य निर्दयतरं नग्नीकृ
ता मुंडिताः केचिद्रक्तपटीकृताश्च जटिलाः कापालिकाश्चापरे २८ अथासौ तद्वचनं श्रद्धायितो भूयोऽपि...

सहस्थितः अथ साधुच्यते जानन्नपि नरो दैवात्प्रकरोति विगर्हितं कस्यचित्कर्म किं लोके गर्हितं रोचते
अत्रांतरे धूसरकस्तरितो रासभः पुनरपि सिंहस्यांतिकमुपागतः ततः प्राक्सूचितक्रमेण सिंहेन तत्का-
पादितः ततश्च तं दत्वा शृगाले रक्षापाले विधाय स्वयं स्नानार्थं नद्यां गतः शृगालोपि लौल्यात्तस्य कर्णहृ-
नं भक्षितवान् भक्षितं तं ज्ञात्वा कोपपरीतात्मा शृगालमाह सिंहः आः पाप किमिदमनुचितं यत्कर्णहृदयम-
नोच्छिष्टतां नीतो खरः शृगालः सविस्मयमाह स्वामिन् मा मैवं वद कर्णहृदयरहित एवासीदयं कथमन्यथा इ-
हागत्यायं त्वामवलोक्य भयाद्गत्वा पुनरागतः अत एवोच्यते आगतश्च गतश्चैव दृष्ट्वा सिंहं स्वयं च यः अकर्णहृदयो
मूर्खो यो गत्वा पुनरागतः ३० अथ शृगालवचनेन जातप्रत्ययः सिंहः तेनैव सह विभज्याशंकितमनास्तमभक्षयत् अ-
तोहं ब्रवीमि नाहमपि लंबकर्ण इति कथा ॥ ५ ॥ तन्मूर्ख कपटं कृतं त्वया परं युधिष्ठिरेणापि सत्यवचनं विनाशि-
तं साधुच्यते स्वार्थमुत्सृज्य यो दंभी सत्यं ब्रूते समंदधीः स स्वार्थाद्भ्रश्यते नूनं युधिष्ठिर इवापरः ३१ मकर आह क-
थमेतत् सोब्रवीत् अस्ति कस्मिंश्चिदधिष्ठाने कोपि युधिष्ठिर नामा कुंभकारः स कदाचित्प्रमत्तस्तीक्ष्णाग्रस्य भग्नभां-
डकर्परस्योपरि महता वेगेन धावमानः प्रपात । ततश्च कर्परकोट्या पाटितललाटतटो रुधिराप्लुतशरीरः कथंचिदुत्थितः
ततश्चापथ्यसेवनात् कर्परप्रहारः करालतां गतः अथ कदाचिद्दुर्भिक्षपीडिते देशे कुंभकारः सो केश्चिद्राजसेवकैः स-
ह देशांतरं गत्वा राजसेवको जातः अथ स राजा तस्य ललाटेऽतिकरालं कर्परप्रहारं दृष्ट्वा चिंतयामास नूनं वी-
रपुरुषोयं कश्चित् तेन ललाटे लग्नप्रहार एवं चिंत्य राज्ञा पृष्टः भो नरवान् किंजातीयश्च कस्मिन् रणे प्रहारो लग्नः सो ६६
ब्रवीत् युधिष्ठिर नामा कुलालोहं जात्या नचायं शस्त्रप्रहारः किंतु अनेकप्रकारकर्परसंकुले प्रांगणप्रदेशे म-
द्यपानविकलः प्रधावन् कर्परे परिपतितः ततश्च कर्परप्रहारोयं करालतां गतः ततो राजाप्यचिंतयत् अहो वंचि-
तोहमनेन राजपुत्रानुकारिणा कुलालेन तद्दीयतामस्यार्द्धचंद्रः तथानुष्ठिते कुंभकारः प्राह देव मैवं कुरु पश्य मे सं-

गरे हस्तलाघवं राजा प्राह भो सर्वगुणविशिष्टो भवान् तथापि गम्यतामिति उक्तं च शूरोसि कृतविद्योसि दर्शनीयोसि पुत्रक
यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ३२ कुलाल आह कथमेतत् राजा कथयति अस्ति कस्मिंश्चिद्वनोद्देशे सिं-
हमिथुनं अथ कदाचित् सिंही पुत्रद्वयं जनयामास सिंहोपि नित्यं मृगादीन् व्यापाद्य सिंह्यै ददाति अथ कदाचित्तेन
भ्रमता न किंचिदपि आसादितं भ्रमतो वानादित्योस्तमुपागतः अथ तेन गृहमागच्छता मार्गे शृगालशिशुः प्राप्तः भग-
वान् कोयमिति कृतानुकंपेन दंष्ट्रामध्ये विधृत्वा यत्नेन जीवन्नायं सिंह्यै समर्पितः ततः सिंह्याभिहितं भो कांतानीतं भो-
जनं किंचिन्मया सिंह आह प्रिये श्रुणु शृगालशिशुं विना न किंचिदासादितं अयमपि सजातीयो बालश्चेति मत्वा म-
या न हतः उक्तं च स्त्रीलिंगी विप्रबालेषु प्रहर्त्तव्यं न कर्हिचित् प्राणात्ययेपि संजाते विश्वस्तेषु विशेषतः ३३ इदानीं
त्वमेनं भक्षयित्वा पथ्यं कुरु प्रातरन्यत्किंचिदानेष्यामि सिंही प्राह उक्तं च अकृत्यं नैव कर्त्तव्यं प्राणत्यागेप्युपस्थिते ।
न च कृत्यं परित्याज्यं एष धर्मः सनातनः ३३ तस्मान्मया मायं हतो योनविष्यति पुत्रः इत्युक्त्वा स्वस्तनक्षीरेण तं परं पु-
ष्टिमनयत् एवं त्रयोपि शिशवः परस्परमज्ञातजातिविशेषा नितः तावपि निःस्पृहा हतां गतौ साधुच्यते एकेनापि सुधीरेण
सोत्साहेन रणं प्रति सोत्साहं जायते सैन्यं भग्ने भग्नमिवाप्नुयात् ३४ तथा च एतदेव हि वांछंति सर्वयोधान्महाब-
लान् शूरान्धीरान् कृतोत्साहान् वर्जयंति च कातरान् ३५ तौ द्वावपि भ्रातरौ गृहं प्राप्य विहसंतौ पितुरग्रे ज्येष्ठभ्रा-
तुश्चेष्टितमूचतुः यत्र किलायं गजं दृष्ट्वा दूरतोपि नष्टः सोपि तदाकर्ण्य कोपाविष्टमनाः स्फुरिताधरपल्लवस्ताम्रलो-
चनस्त्रिशिरो भ्रुकुटीं कृत्वा निर्भर्त्सयमानः परुषमुवाच अथ सिंह्या एकांते नीत्वा प्रबोधितासौ वत्स कदापि मैवं व-
दीः भवदीयभ्रातरौ एतौ अथासौ भ्रातृवचनेन प्रभूततरकोपाविष्टस्तामप्युवाच किमिदमेताभ्यां शौर्यविद्याभ्यां
समको न विद्योसि दर्शनीयोसि शस्त्रेन वाह्यो नो यदेतौ मामुपहसतः तन्मया वध्यमेतौ व्यापादनीयौ तच्छ्रुत्वान्त-
त र्विहस्य सिंही विहस्य प्राह शूरोसि कृतविद्योसि दर्शनीयोसि पुत्रक यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न ह-

३६ तस्मान्मक शृणु यतस्त्वं शृगालीसुतो मया परया स्वस्तनक्षीरेण पुष्टीनीतः यावदेतौ मे पुत्रौ शृगालं न जानी
तस्तावद्द्रुततरं गत्वा स्वजातीनां मध्ये भव नो चेदेताभ्यां निहतो मृत्युमेष्यसि सोऽपि तच्छ्रुत्वा भीतमनाः शनैः शनैरपसृत्य
स्वजातीयानां मिलितः तस्मात्त्वमपि यावदेते सुभटाः कुलालं त्वां न जानंति तावद्द्रुततरमपसर नो चेद्विडंबनं
प्राप्स्यसि कुलालोऽपि तदाकर्ण्य सत्वरं प्रनष्टः अतोऽहं ब्रवीमि स्वार्थमुत्सृज्य यो दंभी इति कथा॥४॥ धिग्मू
र्ख त्वया स्त्रियोऽर्थमनुष्ठितमारब्धं न हि स्त्रीणां विश्वासं कथंचिदपि गच्छेत् सुष्ठु खल्विदमाख्यानमाम्नायते यद
स्वकुलं त्यक्तं जीवितार्धं च हारितं सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः उष्ट्र मकरः प्राह कथमेतत् वा
नरः कथयति अस्ति कस्मिंश्चिदधिष्ठाने कोऽपि ब्राह्मणः तस्य प्रियाति प्राणप्रिया कुटुंबेन सह कलहं कुर्वाणा न
विश्राम्यति सोऽपि ब्राह्मणः कलहमसहमानो भार्यावात्सल्यात् स्वकुटुंबं परित्यज्य ब्राह्मण्या सह विप्रकृष्टं देशांत
रं गतः अथ महाटव्यां मध्ये ब्राह्मण्याभिहितं आर्यपुत्र तृषा मां बाधते तद्यावदुदकं गृहीत्वा समागच्छति तावत्तां
मृतामपश्यत् अतिवल्लभतया विषादं कुर्वन् यावद्विलपति तावदाकाशे वाचमशृणोत् हे ब्राह्मण ब्राह्मणी जी
जीवितार्धं प्रयच्छ दत्ते जीवितार्धे वाक्यसममेव जीविता सा ब्राह्मणी अथ जलं पीत्वा वनफलानि भक्षयित्वा गंतुमार
ब्धौ ततः क्रमेण कस्यचिन्नगरस्य प्रवेशे वाटिकां प्रविश्य ब्राह्मणो भार्यामभिहितवान् भद्रे यावदहं भोजनं गृहीत्वा
गच्छामि तावदत्र त्वया स्थातव्यमिति अभिधाय प्रयातः अथ तस्यां वाटिकायां पंगुररहट्टघटीं खेटयमानो दि
व्यगिरा गीतमुद्गीरयति तच्छ्रुत्वा कुसुमबाणार्दितया तया तत्सकाशं गत्वाभिहितं भद्र यदि मां न कामयसे तन्म
मासक्तां स्त्रीहत्या भविष्यति तव पंगुरब्रवीत् त्वं किं व्याधिग्रस्तेन मया करिष्यसि साब्रवीत् शक्तिमानेवोक्तेनापुरु
षः अवश्यं त्वया मम संगमः कर्तव्यः तच्छ्रुत्वा तथा कृतवान् सुरतानंतरं साब्रवीत् इतः प्रभृति यावज्जीवं मया।
त्मा भवते दत्तः इति ज्ञात्वा भवानप्यस्माभिः सहागच्छतु सा ब्राह्मणं प्रत्यब्रवीत् एवं पंगुं तं गृहीत्वा गच्छावः सोऽब्रवीत्

न शक्नोम्यात्मानमपि नेतुं किं पुनरिमं पंगुं साब्रवीत् पेटाभ्यंतरस्थमहं नेष्यामि अथ तत्कृतकथामोहितचित्तेन तत्।
प्रतिपन्नं तथानुष्ठिते चान्यस्मिन्दिने कूपोपकंठे विश्रांतो ब्राह्मणस्तया पंगुपुरुषासक्तया सो निर्जने कूपे पातितः॥
सापि पंगुं गृहीत्वा कस्मिन्नगरे प्रविष्टाः तत्र चौर्यरक्षानिमित्तं राजपुरुषैरितस्ततो भ्रमद्भिस्तन्मस्तकस्थां पेटीं दृष्ट्वा।
बलादवच्छिद्य राजाग्रे नीत्वा राजापि यावदुद्घाटयति तावत्पंगुं ददर्श ततः सा ब्राह्मणी विलापं कुर्वंती राजपुरु
षानुपदमेव तत्रागता राज्ञा पृष्टा स्ववृत्तांतं ब्रवीत् ममैष भर्ता व्याधिबाधितो दायादैरुद्वेजितो मया तत्स्नेहाकुलित
मनसा शिरसि गृहीत्वा त्वत्सकाशमानीतः राजाब्रवीत् ब्राह्मणि मे त्वं भगिनी ग्रामद्वयं गृहीत्वा भर्त्रा सह भोगान्भुं
जाना सुखेनात्र तिष्ठ तथानुष्ठिते तथा सो ब्राह्मणो दैववशात्केनापि साधुना कूपादुद्धृत परिभ्रमन् प्रः तदेव
५ नगरमायातः तया दुष्टभार्यया दृष्टो राज्ञे निवेदितश्च राजन्नयं मम भर्तुर्वैरी समायातः भार्यया दर्शितो राज्ञा वधा।
यादिष्टः सोऽब्रवीत् देवानया मम सर्वं किंचिद्गृहीतमस्ति यदि त्वं धर्मवत्सलस्तदा दापय राजाब्रवीत् भद्रे त्वया
सर्वं किंचिद्गृहीतमस्ति तत्समर्पय साप्याह देव मया न किंचिद्गृहीतं ब्राह्मण आह यन्मया ते वाचिकं जीविता
र्धं मया दत्तमिति जल्पंती प्राणैर्विमुक्ता ततः सविस्मयं राजाब्रवीत् किमेतदिति ब्राह्मणेनापि पूर्ववृत्तांतस्तस्मै
निवेदितः सकलोऽपि अतोऽहं ब्रवीमि यदर्थे स्वकुलं त्यक्तमिति कथा॥५॥ पुनरप्याह वानरः एतदुपाख्यानं
साधु श्रूयते नाकिं कुर्यान्न किं दद्यात् स्त्रीभिरभ्यर्थितो नरः अनश्वा यत्र हेषंति शिरः पर्वणि मुंडितं उष्ट्र मकरः प्रा
ह कथमेतत् वानरः कथयति अस्ति प्रख्यातबलपौरुषो अनेकनरेंद्रमुकुटमरीचिजालजटिलीकृतपादपीठः
शरच्छशांककिरणनिर्मलयशाः समुद्रपर्यंतायाः पृथिव्याः भर्ता नंदो नाम राजा तस्य सर्वशास्त्राधिगतसमस्ततत्त्वः स
चिवो वररुचिर्नाम तस्य च प्रियकलहेन जायाकुपिता सा च जीववल्लभाप्यनेकप्रकारं परितोष्यमाणापि न प्रसीदति
प्रब्रवीति भर्ता भद्रे येन प्रकारेण तुष्यति तं कथय निश्चितं तत्करोमि ततः कथंचित्प्रोक्तं यदि शिरो मुंडयित्वा

पादयोर्निपतसि तदा प्रसादात्सुखीभवामि तथानुष्ठिते प्रसन्नो सौ अथ तच्छ्रुत्वा नंदस्यापि भार्या तथैव रुष्टा च
प्रसाद्यमाना पि न तुष्यति तेनोक्तं भद्रे त्वया विना मुहूर्त्तमपि न जीवामि पादयोः पतित्वा त्वां प्रसादयामि साब्रवीत् य
दि खलीनं मुखे प्रक्षिप्याहं पृष्ठे तव समारुह्य त्वां धावयामि धावंश्च यदि त्वमश्ववद्धेषसे तदा प्रसन्ना भवामि तथैवानुष्ठि
तं अथ प्रभातसमये सभोपविष्टस्य वररुचिं राजा समायातः तं दृष्ट्वा पृच्छ भो वररुचे किमपर्वणि मुंडितं ते शि
रः सोब्रवीत् न किं कुर्यान्न किं दद्यादिति॥ तन्मूढ त्वमपि नंदवररुचिवत् स्त्रीवश्यः ततस्तद्वाणितेन त्वया मां प्रति
वधोपायः प्रारब्धः परं वाग्दोषेण व्यक्तीकृतः अथवा साध्विदमुच्यते आत्मनो मुखदोषेण बध्यंते शुकसारिकाः बकाः
स्तत्र न बध्यंते मौनं सर्वार्थसाधनं ३९ तथाच सुगुप्तं रक्षमाणोपि दर्शयन्दारुणं वपुः व्याघ्रचर्मपरिच्छन्नो वाक्कृ
ते रासभो हतः ४० मकर आह कथमेतत् वानरः कथयति अस्ति कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः तस्य
गर्दभ एकोस्ति सोपि घासाभावात् अतीव दुर्बलतां गतः तेन रजकेन अटव्यां भ्रमता मृतो व्याघ्रो दृष्टः चिंतितं च अहो
शोभनमापतितं अनेन व्याघ्रचर्मणा प्रच्छाद्य रासभं रात्रौ क्षेत्रे उत्सृजामि तत्र क्षेत्रे व्याघ्रं मत्वा न निःकासयंति तथानु
ष्ठिते रात्रौ यथेष्टं यवानां भक्षणं करोति प्रत्यूषे रजकोपि स्वाश्रयं नयति एवं गच्छति काले स पीनतनुः संजातः॥
कृच्छ्राद्बंधनं स्थानमपि नीयते अथान्यस्मिन्नहनि रासभो परक्षेत्रस्थितो रासभीशब्दमशृणोत् तच्छ्रवणमात्रेणै ६८
व स्वयं शब्दयितुमारब्धः अथ तैः क्षेत्रपालैः रासभोयं मत्वा लकुटपाषाणैः शरप्रहारैर्व्यापादितः अतोहं ब्रवी
मि सुगुप्तं रक्षमाणोपि कथा॥६॥ अथैवं तेन सह विवदंतं जलचरेणैकेनागत्य निवेदितं भो किमिदं तिष्ठसि त्व
दीयेन शये उपविष्टा सा मृता सोपि तच्छ्रुत्वातीव व्याकुलमनाः प्राजल्पत् भो किमिदं संजातं मम मंदभाग्यस्य उक्तं
च माता यस्य गृहे नास्ति भार्या च प्रियवादिनी अरण्यं तेन गंतव्यं यथारण्यं तथा गृहं ४१ तन्मित्र क्षम्यतां किंचि
न्ममापराधः अहं त्वद्वियोगाद्वैश्वानरे प्रवेशं करिष्यामि तच्छ्रुत्वा वानरः प्रहसन् प्रोवाच भो ज्ञातस्त्वं प्रथममेव म

यासीत् स्त्रीवश्यः स्त्रीजितश्चेति सांप्रतं तत्सत्यं संजातं तन्मूढानंदे प्रजाते त्वं विषादं गतः तावद्भार्यायां मृतायां प्रत्युत
:करुणमुच्यते उक्तं च या भार्या दुष्टचरिता सततं कलहप्रिया भार्यारूपेण सा ज्ञेया विदग्धैर्दारुणो ज्वरः ४२ तस्मा
त्सर्वप्रयत्नेन नामापि परिवर्जयेत् स्त्रीणामिहापि सर्वाय दिच्छेत्सुखमात्मनः ४३ यदंतस्तन्न जिह्वायां जिह्वायां
च न तद्बहिः यद्बहिस्तन्न कुर्वंति विचित्रचरिताः स्त्रियः ४४ आस्तां तावत्किमन्येन दौरात्म्येनेह योषितां विधृतं स्वो
दरेणापि घ्नंति पुत्रमपि स्वकं ४५ रुक्षायां स्नेहसद्भावं कठोरायां च मार्दवं नीरसायां रसं बालो बालिकायां विकल्पयेत्
४६ मकरः आह भो अस्त्वेतत् परं किं करोमि ममानर्थद्वयमेतत्संजातं एकं तावद्गृहभंगः अपरं मित्रेण सहासंतोषः
अथवा भवत्येवं दैववशतानां उक्तं च यादृशं मम पांडित्यं तादृशं द्विगुणं तव नाभूज्जारो न भर्त्ता च किं पश्यसि न
ग्नके ४७ वानर आह कथमेतत् सोब्रवीत् कस्मिंश्चिदधिष्ठाने हालिकदंपती प्रतिवसतः स्म हालिकभार्या प
तुर्वृद्धभावात् सदैवान्यचित्ता न कथंचिद्गृहे स्थैर्यमालभते केवलं परपुरुषपरता अथ केनचित् परवित्तापहारके
णापलक्षिता प्रोक्ता च सुभगे मृतभार्योहं त्वद्दर्शनस्मरपीडितश्च तद्दीयतां मे रतिः सर्वस्वदक्षिणा ततस्तु तयाभिहितं
सुभग यद्येवं तदस्ति मे पत्युः प्रभूतं धनं स वृद्धत्वात् प्रचलितुमप्यसमर्थः ततस्तद्धनमादायागच्छामि यथा त्वया
सहान्यत्र रतिसुखं भजामि सोब्रवीत् रोचते ममाप्येतत् प्रत्यूषे पत्रस्थाने शीघ्रमेव समागंतव्यं येन शुभतरं किंचिन्नग
रं गत्वा त्वया सह जीवलोकः सफलीक्रियते सापि तथेति प्रतिज्ञाय प्रहसितवदना स्वगृहं गत्वा रात्रौ सुप्ते भर्त्तरि
सर्वं वित्तमादाय प्रत्यूषसमये कथितं स्थानमुपागमत् धूर्तोपि तामग्रे विधाय दक्षिणां दिशमाश्रित्य प्रस्थित
वं सप्रमोदं तया सह व्रजतः सुखमनुभवतः योजनमात्रद्वये व्यतीते कामपि ग्रामनदीं दृष्ट्वा धूर्तश्चिंतयामास
महमेतया यौवनरहितया किं करिष्यामि किं च कदाचिदस्याः पृष्ठतः कोपि समेष्यति ततश्च महाननर्थः स्यात् केवलम
:वित्तमादाय गच्छामीति संचिंत्य तामुवाच प्रिये दुस्तरेयं नदी तदहं द्रव्यमात्रं पारे धृत्वा समागच्छामि

त्वामेकाकिनीं स्वपृष्ठमारोप्य सुखेनोत्तारयामि साप्याह एवं क्रियतामित्युक्ते शेषं वित्तमादाय पुनरप्याह नद्ये
नाच्छादनवस्त्रमपि धाय निःशंका सती व्रजसि तथानुष्ठिते धूर्तोपि वित्तं वस्त्रयुग्मं चादाय यथाचिंतितविषयं
सापि कंठनिवेशितहस्तयुगला सोद्वेगा नदीतीरे यावदुपतिष्ठति तावत्काचिच्छृगालिका गृहीतमांसपिंडा तत्रा-
गाम आगत्य च यावत्पश्यति तावन्नदीतीरे महान्मत्स्यः सलिलान्निष्क्रम्य बहिः स्थित आस्ते तं च दृष्ट्वा मांसपिंड-
मुत्सृज्य तं मत्स्यमभि सुखं ययौ अत्रांतरे आकाशात्कोपि गृध्रस्तं मांसपिंडमादायोत्पपात मत्स्योपि शृगालि-
कां दृष्ट्वा नद्यां प्रविवेश अथ सा शृगालिका व्यर्थश्रमा गृध्रमवलोकयंती नग्निकया सविस्मयमभिहिता गृध्रेणा-
पहृतं मांसं मत्स्योपि सलिलं गतः मत्स्यमांसपरिभ्रष्टा किं वीक्षसि जंबुके ४७ तच्छ्रुत्वा शृगालिका तामपि पतिधन-
परिभ्रष्टां दृष्ट्वा सोपहासमाह यादृशं मम पांडित्यं तादृशं द्विगुणं तव नापि जारो न भर्ता च जले पश्यसि नग्निके ४८
इति कथा ॥७॥ एवं तस्य कथयतः पुनरन्येन जलचरेणागत्य निवेदितं यदहो त्वदीयं गृहमपरेण जलचरेण गृही-
तं तच्छ्रुत्वा सोतिदुःखितमनाः तं गृहान्निःसारयितुमुपायं चिंतयन्नुवाच अहो पश्यत मे दैवहतस्य यत्किल मि-
त्रेण। मित्रं तावत्प्रातमपरं मे प्रिया मृता गृहमन्येन व्याप्तं च किमद्यापि न भविष्यति अथवा युक्तमिदमुच्यते क्षते प्रहा-
रा निपतंत्यभीक्ष्णमन्नक्षये वर्धति जाठराग्निः आपत्सु वैराणि समुद्भवंति वामे विधौ सर्वमिदं नराणां ५० तत्किं क-
रोमि किमनेन सह युद्धं किं वा साम्नैव संबोध्य गृहान्निःसारयामि किं भेदं वा दानं करोमि अथामुमेव वानरं मित्रं पृच्छा-
मि उक्तं च यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान्स्वहितान्गुरून् न तस्य जायते विघ्नं कस्मिंश्चिदपि कर्मणि ५१ इति विचिंत्य भू-
योपि जंबूवृक्षमारूढं तदहं त्वां पृच्छामि कथय किं करोमि सामादीनामुपायानां मध्ये कस्यात्र विषयः स आह भ- ६९
द्र कृतघ्न त्वं मया निषिद्धोपि किं मामनुसरसि नाहं तव मूर्खस्योपदेशं ददामि उक्तं च उपदेशो न दातव्यो यादृ-
शे तादृशे नरे पश्य वानरमूर्खेण सुगृही निर्गृहीकृता ५२ मकरः पृच्छति कथमेतत् सोब्रवीत् अस्ति कस्मिंश्चि-

दरण्ये वृक्षशाखाकृतकुलायौ पक्षिदंपती प्रतिवसतः स्म अथ कदाचिन्माघमासेऽकालकरकावृष्टिः समाहतवात-
कंपिततनुः कश्चिद्वानरस्तद्वृक्षमूलमुपागतः सोपि दंतवीणां वादयन्नतिदीनः संकुचितकरचरणः सानुकंपमभि-
हितः यथा हस्तपादसमायुक्तो दृश्यसे पुरुषाकृतिः शीतवाताहतो मूढ न करिष्यसि किं गृहं ५३ सोपि तदाकर्ण्य
व्यचिंतयत् अहो आत्मसंतुष्टो जीवलोकोयं दोषान्दुष्टवटिकात्मानं बहु मन्यते सुखं चैतत् सोक्तिकालेनोगर्दः
कस्य नाम न विद्येते उह्निप्रटिहिनः पादौ शेते नगमयाह्निवः ५४ एवं विचिंत्य तामाह सूचिमुखी दुराचारे रंडे पंडि-
तमानिनी तूष्णीं न वकरिष्यामि नोचेद्वधमगृहेपमं ५५ पार्वंतरमुत्तरार्धं असमर्थो हि ग्रहारंभे समर्थो ग्रहभंजने ॥
एवं तेन मानिनि निषिद्धापि पुनः पुनराश्रमकरणोपदेशेन तमुद्वेजयंति तदा सोपि तं वृक्षमारुह्य तस्याः कुलायं खंडशः
कृत्वा बभंज। अतोहं ब्रवीमि उपदेशो न कर्तव्यो कथा ॥८॥ पुनरपि वानर आह नाहं ते कथयिष्यामि यत्त्वया
वाक्येनाहं नवतामसमुद्रे प्रक्षेपितुं नीतः तदेवं न युक्तं यद्यप्यतीव वल्लभा भार्या तदपि तद्वचनेन मित्रं बांधवा-
दयः समुद्रे प्रक्षिप्यंते तच्छ्रुत्वाह मकरः यद्यप्येवं तथापि कृतागसो मे कुलप्रसादमुपदेशेनः उक्तं च उपका-
रिषु यः साधुः साधुत्वे तस्य को गुणः अपकारिषु यः साधुः स साधुः सद्भिरिष्यते ५६ तदाकर्ण्य वानर आह भ-
द्र यद्येवं तर्हि तत्र गत्वा तेन सह युद्धं कुरु उक्तं च उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् नीचमल्पप्रदानेन समश-
क्तिं पराक्रमैः ५७ मकर आह कथमेतत् सोब्रवीत् अस्ति कस्मिंश्चिद्वनोद्देशे महाचतुरको नाम शृगालः प्र-
वसति स्म तेन कदाचिदरण्ये स्वयंमृतो गजः समासादितः परं तस्य समंतात्परिभ्रमति कठिनत्वचं भेत्तुं न शक्नोति
मिति अथास्मिन्नवसरे इतश्चेतश्च परिभ्रमन्कश्चित्सिंहस्तत्रैव देशे समाययौ अथ तमागतं दृष्ट्वा सक्षितितल-
मिलन्मौलिमंडलः संयोजितकरकमलः सविनयमुवाच स्वामिन् त्वदीयोहं लागुडिकः त्वदर्थे गजमिमं रक्षा-
मि तदेनं भक्षयतु स्वामी अथ सिंह आह नाहमन्यहतं कदाचिदपि भक्षयामि ततो वै गजो मयाप्रसा-

तच्छ्रुत्वा शृगालः सानंदमाह युक्तमिदं स्वामिनो निजजन्तेषु अथ सिंहे गते कश्चित् व्याघ्रस्तत्राययौ तमपि दृ-
ष्ट्वा व्यचिंतयत् एकस्तावद्दुरात्मा तेनैव प्रणिपातेनापवाहयामि नूनं शूरोयं न खलु भेदं विना साध्यो भवति उक्तंच
अशक्यं तेकर्त्तुं सामदानमथापिवा भेदस्तत्र प्रकर्त्तव्यो यतो सो वश्यकारकः ५८ किंच अतो विभेदे न वध्यते
च अच्छिद्येना विकर्केन सुवृत्तेनापि चारुणा अंतर्भेदेन संप्राप्तं मौक्तिकेनापि बंधनं ५९ एवं संप्रधार्य तदभिमु-
खं गत्वा दूरादुन्नमितकंधरः ससंभ्रममुवाच माम किमत्र भवान् मृत्युमुखे प्रविष्टः येनायं गजो सिंहेन व्यापादि-
तः स च मां तद्रक्षणे नियुज्य स्वयं स्नानार्थं गतः कथितं च तेन गच्छता समासादितो गजः केनचिद् व्याघ्रेण [illegible]
इतो नीतः तद्दिनादारभ्य व्याघ्रोपरि कुपितोस्मि अथ तच्छ्रुत्वा व्याघ्रः सत्रस्तस्तमाह भो भागिनेय देहि मे प्राणदक्षि-
णां त्वया तस्यात्र चिरंस्य मदीया कापि वार्त्ता नाख्येया इत्येवमभिधाय ससत्वरं पलायितः अथ गते व्याघ्रे तत्र कश्चि-
द्द्वीपी आयात् तमपि दृष्ट्वा व्यचिंतयत् दृढदंष्ट्रोयं चित्रकः तस्मादेव गजस्य चर्मच्छेदं कारयामि इति निश्चित्य तमु-
वाच भो भागिनीसुत किमिति चिराद्दृष्टोसि कथं बुभुक्षितो लक्ष्यसे तदतिथिरसि मे उक्तंच समयस्थानवाजस्य प्रागते-
तिथिरिति तदेष गजः सिंहेन हतस्तिष्ठति अहं चास्मि तदादिष्टो रक्षपालः परं तथापि यावदसौ न समायाति तावद-
स्य मांसं भक्षयित्वा तृप्तिं कृत्वा च द्रुततरं व्रज स आह माम यद्येवं तन्न कार्यं मांसेन यतो जीवन्नरो भद्रशतानि पश्य-
ति तत् सर्वथा तदेव भुज्यते यत्परिणमति तदाहमितोपसरणामिति शृगाल आह भो धीर विश्रब्धो भूत्वा भक्षय त्वं यावदस्या-
गमनं दूरतोपि तवाहमावेदयिष्यामि अथ द्वीपिना तथानुष्ठिते भिन्नां त्वचं विज्ञाय तथाविहितं जंबुकेन भो भागि-
नीसुत गम्यतां गम्यतामेष सिंहः समायाति तच्छ्रुत्वा द्वीपी चित्रकोपि प्रनष्टः अथ यावदसौ तद्भेदकृतद्वारेण मांसं भक्ष-
यति तावदतिसंक्रुद्धोपरः शृगालः समाययौ अथ तमात्मतुल्यं ज्ञातपराक्रमं दृष्ट्वा उत्तमं प्रणिपातेनेत्यादि [illegible]प-
वन् तदभिमुखं कृतप्रयाणः स्वदंष्ट्राभिस्तं विदार्य दिगंतभागं कृत्वा स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे एवं त्व-

मपि त्वमपि निजरिपुं संजातं युद्धेन परिभूय दिगंतगतं कुरु नोचेत् पश्चाद्बद्धमूलादस्मात्त्वमपि नाशमवाप्स्यसि उक्तंच
संभाव्यं गोषु संपन्नं संभाव्यं ब्राह्मणे तपः संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयं ६० अतो हं ब्रवीमि इति कथा॥
॥१६ अन्यच्च यतः सुभिक्षाणि विचित्राणि शिथिलाः पौरयोषितः एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ६१
मकर आह कथमेतत् वानरः कथयति अथ अस्ति कस्मिंश्चिदधिष्ठाने चित्रांगो नाम सारमेयः तत्र चिरकालं दु-
र्भिक्षमापतितं अन्नाभावाच्च सारमेयादयो निष्कुलतां गंतुमारब्धाः अथ चित्रांगः क्षुत्क्षामकंठस्तद्भयादा-
न्यदेशांतरं गतः तत्र कस्मिंश्चित्पुरे कस्यचिद्गृहमेधिनो गृहिण्याः प्रमादेन प्रतिदिनं गृहे प्रविश्य विविधान्न-
नि परिभक्षयन् परां तृप्तिं गच्छति परं तद्गृहाद्बहिर्निष्क्रामितो न्यैर्मदोद्धतसारमेयैः सर्वासु दिक्षु परिवेष्ट्य सर्वा-
गं दंष्ट्राभिर्विदार्यते ततस्तेन चिंतितं वरं स्वदेशो यत्र दुर्भिक्षेपि सुखेन स्थीयते न च कोपि युद्धं क-
रोति तदहं तदेव स्वनगरं व्रजामीति अवधार्य स्वस्थानं गतः अथासौ देशांतरादायातः स्वजनैः पृष्टो भोः कथय अ-
स्मद्विदेशः किंचेष्टो लोकः स आह किं कथ्यते लोकस्य सुभिक्षाणि विचित्राणि कथा ॥६२॥ सोपि तदुपदेशं
श्रुत्वा कृतमरणनिश्चयो वानरमनुज्ञाप्य च निजाश्रयं तेन विग्रहं कृत्वा तद्वेष्टनात् स्वशत्रुं व्यापाद्य आ-
श्रयं च लब्ध्वा सुखेन चिरकालमतिष्ठत् साधु चेदमुच्यते अकृत्वा पौरुषं या श्रीः किं तयापि सुभोग्यया जरद्गवोपि सम-
श्नाति दैवादुपगतं तृणं ६३ इति श्रीविष्णुशर्मकृते नीतिशास्त्रे पंचोपाख्यान नाम्नि ग्रंथे लब्धप्रणाशनं ना-
म चतुर्थं तंत्रं समाप्तिमगमत्॥४॥ ॥[illegible]॥ अथेदमारभ्यते अपरीक्षितकारकं नाम पंचमं तंत्रं॥ य-
स्यायमादिमः श्लोकः कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितं तन्नरेण न कर्त्तव्यं नापितेनात्र यत्कृतं १ राजपु-
त्राः कथमेतत् विष्णुशर्मा कथयति शृणुत अस्ति दक्षिणस्यां दिशि पाटिकं नामधेयं नगरं तत्र मणि-
भद्रो नाम श्रेष्ठी प्रतिवसति स्म तस्य धर्मार्थकाममोक्षाणि कर्माणि कुर्वतः धनक्षयं प्राप्तं निर्धनो जातः अतो

MEMORIAL

स्वं प्राप चिंतयामास अहो कष्टं धिक्कमदरिद्रावस्थायाः तदुक्तं शीलं शौचं क्षांतिर्दाक्षिण्यं मधुरता
कुलेजन्म: न विराजंति ते सर्वे वित्तेन हीनेन पुरुषस्य २ मानो वा दर्पो वा विज्ञानं विभ्रमः सुबुद्धिर्वा: सर्वं प्र
णश्यति सममवित्तेन विना यदा पुरुषः ३ अन्यच्च प्रतिदिवसं याति लयं वसंतवाताहते व शिशिरश्रीः बुद्धिर्वि
प्रबुद्धिः कुटुंबभरचिंतया सततं ४ गगनमिव नष्टतारं शुष्कसर इव श्मशानमिव रौद्रं प्रियदर्शनेन हीनं भ
ति गृहं धनविहीनस्य ५ तथाच न विज्ञायते हि जघ्यो लक्ष्मीहीनाः पुरोपि निवसंतः सततं जातविनष्टाः पय
मिव बुद्बुदाः पयसि ६ रूपयुता गुणयुक्ताः विद्यावंतोऽकुले समुद्भूताः यस्य यदा वित्तं वः स्याच्च तस्य तदा दासतां
यांति ७ अन्यच्च निर्द्रव्यं पुरुषं सदैव विकलं सर्वत्र मंदादरं मित्रैश्चापि विनापराधकुपितं दृष्ट्वा न संभाष्यते।
भार्या रूपवती त्वमंदमनसा स्नेहेन नालिंग्यते तस्माद्द्रव्यमुपार्जय प्रियसखे द्रव्येण सर्वे वशाः ८ जातिर्यातु र
सातलं गुणगणास्तस्याप्यधो गच्छतां शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना सौर्ये वैरिणि वज्रमाशु निप
तत्वर्थोस्तु नः केवलं येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ९ विवस्वांस्तु वरं जीव निर्धनाच्च मृतो वरं अं
तरं नैव पश्यामि निर्धनस्य मृतस्य च १० एतदन्यच्च नानाविधमालोचयन् विषादमाप चिरं चिंतयित्वा निद्रारिते
अहमनःशब्देन प्राणत्यक्ते आनन व्यर्थजीवितेन किं न चिंता एवं निश्चयं सुष्वाप ततारुणोदयवेलायां स्वप्न
माप किं तत्पद्मनामा निधिः क्षपणकरूपेणागत्य माणिभद्रश्रेष्ठीनं प्राह भोभोश्रेष्ठिन् दुःखं मागाः अहमस्मि पद्म
नामा निधिः अनेनैव रूपेण प्रातर्निस्वार्थं आगमिष्यामि त्वद्गृहे तदा त्वं चागत्य मन्मस्तके लकुटप्रहारेण तर्जनं
कुर्याः ततोहमक्षयसुवर्णपुरुषो भूत्वा त्वद्भवने निपतिष्ये ततस्त्वमक्षयसुवर्णं भुंजय ददस्व च क्षपणकस्त्वे
वं वदति यावत्तावज्जागृतो बभूव चिंतयामास च ततः स्वप्नं सत्यमसत्यं वा किं परं त्वहं जानामि मिथ्यैव ज्ञातः।
मद्धिती कुर्वन् निद्रोतोहं तस्मात्तदुक्तं व्याधितेन सशोकेन चिताग्रस्तेन जंतुना कामार्तेन मत्तेन दृष्टः स्व ९२

प्नो निरर्थकः ११ तच्छ्रुत्वा तत्पत्नी धर्मनाम्नी प्राह स्वामिन् सत्यमेतद्भविता सावधानैर्भवितव्यं भवद्भिः ततस्तेन विनि
तावच्चनमंगीकृत्य स्वपावित्र्यार्थं कश्चिन्नापितः समाहूतः सच श्रेष्ठीनां नखोल्लेखनं करोति तावत्तद्दृष्टः क्षप
णकः समागतः तं दृष्ट्वा हर्षोद्दीप्ती सत्वरमुत्थाय श्रेष्ठीना क्षपणको गृहे नीतस्तत्र गत्वा यष्टिकया तं मस्तके न
जघान सच सुवर्णमयः पुरुषो जातः तदाघातध्वनिमाकर्ण्य नापितेनेक्षितं चिंतितं च तावच्छ्रेष्ठिना पद्मनिधिः को
शे निक्षिप्तः सच बहिर्गत्य पूर्णं नखोल्लेखनं कारयित्वा नापिकाय किंचिद्दत्वा तं प्रत्याह भो त्वं गुणवानसि।
५५ कस्याग्रे न वाच्यमेतत् सच तद्वचनमंगीकृत्य तं विश्वास्य सविनयं प्रणम्य स्वगृहं गत्वा चिंतितं च अहो चित्रमे
तदनेन क्षपणको मस्तके हतः सुवर्णपुरुषः संजातः ततोहमप्येवं कुर्यामिति विचिंत्य श्रावकधर्मः मंगीकृत्य
सकपटमज्ञातरूपो माल्यां गत्वा पार्श्वनाथं त्रिः परिक्रम्य मुखे उत्तरीयं बद्ध्वा देववंदनं गुरुवंदनं कुर्वन्नंज
लिं बद्ध्वा श्लोकमेकं भणन् देवाग्रे यथा जयंतं ते जिता लोके कृतार्थी ज्ञानशालिनी अस्माकं तु प्रसन्नत्वं म
नोसोपि न जायते १२ साजिह्वा या जिनं स्तौति तच्चित्तं यच्च निर्मलं श्लाघ्यं यत्र पूज्यो जिनः सदा १४ जैनधर्मो महा जनदेव वकुले
न्लोके सर्वज्ञेष्वेषु यद्दया आत्मवर्द्धते तस्य दुर्जनः समुपाश्रयः १४ अहं वंदे पुनर्वंदे वंदे पूज्यं मुनीश्वरं य
स्य संस्पर्शमात्रेण प्राप्यते धर्मसंग्रहः १५ अहिंसा परमो धर्मो यैस्तु सम्यगनुष्ठितः ज्ञानवंतस्त एवात्र न जातु दि
सनप्रियाः १६ एतान्यन्यानि नानापद्यान्यपाठ्य पूज्यगुरुं भट्टारकाग्रे गत्वा भूमिमालिंग्य दंडवत्पतित्वा तद्द
र्यो मस्तकं धृत्वा नमोस्तु वंदामीति मंत्रेणाष्टोत्तरशतं नमस्कारान् कृत्वा निषसाद गुरुरपि धर्मबुद्धिः इति मं
त्रेणाशीर्वादं दत्वा पप्रच्छ भोभो श्रावकश्रेष्ठिन् कुतः प्राप्ता यूयं विवेकिनो जिनधर्मे सचाह प्रभो देशांतरतः स
मागताः युष्मदर्थमपरिपालिते तस्मिन् नगरे स्वामिनि वसामः अतो जिनसेवकान् वनेऽद्य विनविहाररूपाः
श्रीमद्भिः तत्र चे मया किंचित्पुस्तकानि पुष्टिपत्राणि सुदृढांबराणि दुकूलानि दैर्घ्यवंति प्रत्यर्थं समानितानि

निमनाथानिविधेयानि यदिममधर्मोपायःप्रवेजिमश्चेत् ततोगुरुराह नोश्रावकश्रेष्ठएकाकिनो वयं नाथं कुर्म
हीः सद्वाह स्वामिन् श्रीमद्भिःसमं वकैरपि सेवकाश्चनाथता विधेया इतिमुक्त्वा ग्रामामंत्र्यप्रस्थितः स्वगृ
प्रतियततयोहर्षिताः सर्वे लोभमोहेनमोहिताः २७ दिवसेसार्द्धयामेतु दिनेशेपर्वतमस्तके नग्नाःशीघ्रंगुरोदं
धर्मद्वेषिमुक्त्वाः २८ प्रस्थितायतयःसर्वे छद्मजैन्यगृहंप्रति विमंगायतयःश्रुद्धा अहिंसाधर्मतत्पराः २९
नापितेनसुदुष्टेन कापटिनप्रतारिताः नराणांतःप्राकृतंघोरं प्राप्तास्तस्यप्रतोलिकां ३० एकाकीमुक्तसंसर्गःप्राणि
पात्रादिवर्जिः सोपिसेवाश्रितेलोके दृश्यायाःप्रत्यकोऽवकं ३१ यावत्क्षपणकाःसमायांति तावद्दुष्टेननापितेनस्व
द्विरमध्येस्वलयष्टिकसमंसाध्यस्थापिताः मवंति ततस्तेसमायाताः प्रवेशिताःमध्यहर्म्येस्वेनयंस्वागतंकृत्वा
स्वादिर्थ्यायष्ट्यामस्तकेताडिताः केयंतोमृताः किंयंतोबुबारवंकुर्वतः कियंतोपलायिताः किंयंतोरुधिरार्द्रदे
हाःमंतःपलायिताः तेषांकोलाहलंश्रुत्वादुर्गपालःसमागतः सेवकैश्चसहागत्यहट्टेतत्कोऽवकंतदा ३२ तेसर्वेना
पितस्यग्रहेप्रविष्टाः तत्रक्षयतयोनिपतिताःताडिताःदृष्टाः ततसौनापितःतैराजसेवकैर्बध्वाराजद्वारेश्रानीतः तंरा
जकुपितःसन्दृष्ट्वा रेदुष्टदुष्टमेयतयो केनकारणेनताडिताः तेनमणिभद्रश्रेष्ठीनः अशेषवृत्तांतंनिवेदितं तच्छ्रु
त्वा मणिभद्रमानीयदृष्टं तेनश्रेष्ठीनाखिलस्वप्नहत्तांतंतंकथितं तच्छ्रुत्वानैयायकैन्यायंकृतकथितं न्यायमस्याप ७२
राधः अनेननापितेनान्यस्त्रांत्याताडिताः तमाकार्यसर्वैर्जनैः शिक्षाकृता ततोतेसर्वेश्लोकमेकंब्रूयाणः सयथा।
कुदृष्टंकुपरिज्ञातं कुश्रुतंकुपरीक्षितं तन्नरेणनकर्तव्यं नापितेनात्रयत्कृतं ३३ अन्यच्च अपरीक्षितंनकर्तव्यं
कर्तव्यंसुपरीक्षितं पश्चाद्भवतिसंतापो ब्राह्मण्यानकुलादिव ३४ मणिभद्रःपृच्छति कथमेतत्तदानाववुः पूर्वदिशा
दिशिउज्जयिनीनामनगरी तत्रदेवशर्मानामब्राह्मणोनिवसतिस्म तस्यकलावतीनाम्नीभार्यास्ति तयापुत्रोजनितः
तस्यांगृहे एकानकुलीनिवसति तयापिनकुलोजनितः वयाब्राह्मण्यानकुलः स्वपुत्रइवपालितः सपुत्रजातः॥

सपुत्रःचत्वारवर्षयुतो बभूव द्वौमिलित्वाक्रीडांकुर्वतः परंसापिविश्वासंनकरोति एवंकियंतोदिवसानिर्गमिताःए
कस्मिन्दिवसेचिंतितं अस्यविश्वासोमयानविधेय अयंकदाचिन्ममपुत्रंव्यापादयति एवंसासंकासतिनविश्वा
सयति पुत्रोअतिववल्लभोवर्तते तयोः कुपुत्रोपिनवेत्पुत्रो हृदयानंददायकः दुर्विनितकुरूपोपि मूर्खोपि
व्यसनीखलः ३५ एवंसंज्ञायतेलोके चंदनंकिलशीतलं पुत्रगात्रस्यसंस्पर्शो चंदनादपिशीतलं ३५ साब्रा
ह्मणीएकस्मिन्दिवसेजलमाननायगच्छतिसति स्वस्वामिनंनिवेदयति स्वामिन्नहंजलमाननायगच्छामि परंमद्गृ
हे नकुलादविश्वासोनकर्तव्यः साकलावतीवापिकांप्रतिगता सब्राह्मणःक्षणमेकंस्थित्वाभिक्षार्थंगतः तावत्स
मयेएकोमहान्सर्पो स्वगृहान्निःसृत्य तत्रागतः नकुलेनचिंतितं एनंदनिष्यति तदाममोपरिमातासकोपान
विष्यति अतोयंमयावध्यः एवंविचिंत्य स्वजातिवैरत्वात् हतश्चेतश्चधावन्सन्सर्पंजघानः रुधिरार्द्रमुखेन
नकुलःजननींप्रतिगतः ततोतयाचिंतितंयदनेनमेनपुत्रोक्रीडांकरोति सर्पोमृतोदृष्टः ततोसातिवदुःखप्राप्
आक्रंदंकरोति तावत्सब्राह्मणःआगतःसोपिदुःखप्राप्ः ब्राह्मणीस्वामिनंप्रतिवचनमुवाच अरेस्वामिन्त्वयाती
वलोभेनममवचनंनकृतं अतोऽचिंतितंदुःखमिदमागतं अतिलोभोनकार्यः तदुक्तं अतिलोभोनकर्तव्यो।
लोभान्नैवपरित्यजेत अतिलोभाभिभूतस्य चक्रंभ्रमतिमस्तके ३५ ब्राह्मणःपृच्छति कथमेतत् कलावतीकथय
सं॰ ती पश्चिमंदिशिसुवर्णपुरंनामनगरं तत्रचत्वारोब्राह्मणाःसख्यंप्राप्तास्तिष्ठंति तेचत्वारोपिदारिद्र्येणपीडिताःचिं
तयंति धिग्नेनव्यर्थजीवितेन तदुक्तं वरंवनंव्याघ्रगजैःसमन्वितं जलेनहीनंबहुकंटकावृतं तृणानिशय्या
परिधानवल्कलं नबंधुवर्गेधनहीनजीवितं ३६ अन्यच्च श्रीमानवोपिसुकोपितोपिपितरोत्साहंतितिबंधवा रा
तेनगुणास्त्यजंतिमनुजास्फारान्नवंत्यापदः भार्यासाधुसुवंशजानमजतेनोयांतिमित्राणिच न्यासाक्षेपणाः
माअपिनराणांयेषांनहिस्याद्धनं ३७ तथाच शूरःसुरूपःसुभगश्चवाग्मी शस्त्राणिशास्त्राणिविदांकरोति अर्थ

विनानैव कला कलापि शोभां विधत्ते त्र मनुष्यलोके ॥ २८ अन्यच्च तानींद्रियाणि विकलानि तदेव नाम सा
रप्रतिहता वचनं तदेव अर्थोष्मणा विरहितः पुरुषः स एव बाह्यः क्षणेन भवतीति महद्विचित्रं ॥ २९ एवं ना
विधं विचार्य चत्वारोपि प्रचलिताः तदुक्तं सत्यं परित्यजति मुंचति बंधुवर्गं शीघ्रं विहाय जननीमपि जन्मभूमिं
संत्यज्य गच्छति विदेशमभीष्टलोकं चिंताकुलः कृतमतिः पुरुषोत्र लोके ३० तेषां वनाद्वनं ग्रामाद्ग्रामं गच्छतां ।
मुज्जयिनी नाम नगर्यां प्राप्ता तत्र क्षिप्रा नाम नदी वर्त्तते तस्यां स्नानसंध्यावंदनादिकं विधाय महाकालं नमस्कृ
त्य प्रस्थिताः यावद्मार्गे गच्छंति तावद्भैरवानंदो नाम योगीराजो मिलितः ततो योगिना तेषामाह्वानं कृतं तच्छ्रुत्वा
चत्वारोपि तेन सह कानने गताः योगिः पृच्छति भवदालयं कुत्र तिष्ठति कुत्र गम्यति भवद्भिश्च विप्रा ऊचुः स्वामि
न्वयं सिद्धयात्रां कर्त्तुं समुत्सुकाः तत्र महानर्थो लभ्यते ऽस्माभिश्च मृत्युं गच्छामो वयं एतच्छ्रुत्वा भैरवानंदो योगिः
प्राह पुरुषैश्चिंतितं न लभ्यते तदुक्तं प्राप्यानि बहु कृत्यानि कथं न लभ्यते वंछितानि द्रव्याणि अवसररहितेन नरा
न साहसं कदापि करणीयं ३१ अन्यच्च पतति कदाचिन्नभसः खाते पातालतोपि स्थलमेति दैवमचिंत्यं बलवत्
बलवान्न च पुरुषकारोत्र ३२ तथाच मभिमतफलरेखासिद्धावती च पुरुषकारेण यद्यपि कथयसि दैवं पु॰ ९३
षश्रमः सोपि दृष्टाख्यः ३३ अन्यच्च क्लेशेनांगमदग्ध्वा सुखासुखानि नेह लभ्यंते मधुमथनेनायस्तैराश्लिष्यते बा
हुभिर्लक्ष्मीः ३४ तथाच दूरस्थितमोह्यरि नागो यावत्पुरुषेण पौरुषं न कृतं जयति तुलामधिरूढो भास्वानिव जल
दपटलानि ३५ इति योगिवचनमाकर्ण्य ब्राह्मणा ऊचुः भोः स्वामिन् भवता मंत्रयंत्रबिलप्रवेशशाकिनीसाधन ।
श्मसानसाधनादिकं मन्यसि तच्चेत्तर्हि निवेदितव्यं येन कृत्वार्थप्राप्तिर्भवति अस्माभिर्बहुतरं साहसं धार्यते म
हांत एवमहतामर्थं साधयितुं क्षमाः उक्तं च समुद्रादन्यः को बिभर्त्ति वडवानलं ३६ ततो तेन चिरं चिंतयित्वा ते
षां सिद्धिमंत्रा व्यक्ताः कथितं च भो हिमाचलभूमौ गच्छतां यत्रैकस्य देहो निपतति तेन तत्रार्थी लभ्यंते एवमुपदेशं

कृत्वा योगिराजो ऽतर्द्धे ततस्ते चत्वारोपि साहसं धृत्वा प्रस्थिताः उत्तरस्यां दिशि गच्छतां तेषां एकस्य देहो निपतितः ।
तेन तत्र खनितं तत्र ताम्रं निःसृतं दृष्ट्वा वदति भो बंधवः ताम्रं गृहीतव्यं स्वल्पेनैव संतोषोस्तु नः द्वितीयो भणति रे मू
र्ख अनेन स्फारेण ताम्रेण किं कर्त्तव्यं ततोग्रे रौप्यं लभ्यते तद्गृहीतव्यं एवमुक्ते ताम्रसिद्धिर्वदति भो मित्राणि भव
द्भिरग्रे गंतव्यं परमहं नागमिष्ये स ताम्रसिद्धिस्ताम्रं गृहीत्वा स्वगृहं प्रति प्रचलितः ततोनंतरं ते त्रयोप्यग्रे चलिताः
तेषां गच्छतामेकस्य कायो निपतितः तेन तत्र खनितं तत्र रौप्यभूमिर्दृष्टा तेन कथितं रौप्यं गृहीत्वा गंतव्यं एकः वद
ति रे मूर्ख यथात्र रौप्यमयी भूमिर्दृष्टा तथाग्रे सुवर्णमयी भविष्यति तर्हि रौप्येण किं कर्त्तव्यं एतन्महद्दरिद्रम
नेन स्फारेणापि न गच्छति रौप्यसिद्धिनोक्तं भवद्भिरग्रे गंतव्यं परमस्माकमनेन संतोषोस्ति ततो रौप्यं गृहीत्वा स्वगृहं
प्रति प्रस्थितः ततो द्वावग्रे चलितौ तयोर्गच्छतस्तृतीयस्य शरीरं निपतितं तेन तत्र खनितं तत्र सुवर्णभूमिर्दृष्टा ते
नोक्तं मित्र सुवर्णं गृहीत्वा गंतव्यम् सो वदति रे मूर्ख प्रथमं ताम्रं ततो रौप्यं पश्चात्सुवर्णं ततोग्रे रत्नभूमिर्भविष्य
ति ततः सुवर्णसिद्धिर्वदति भो आर्य त्वं गच्छ परमहं नागमिष्ये परं त्वमत्रागमिष्यति तावदहं त्वन्मार्गं पश्यामि ।
ततः स अग्रे प्रस्थितः तावदेन विडितः क्षुधातृषया पीडितः सन् सिद्धिमार्गतो भ्रमितः इतस्ततो यावत्पश्यति ।
तावन्महती शिलोपरि स्थितो ग्रीवायां चक्रं भ्रमति शोणितबिंदुवर्षी ईदृशः पुमान् दृष्टः तेनाग्रे गत्वा पृच्छितः
भो आर्य कस्त्वं चक्रं ग्रीवां व्यथयति तेन कारणेन कुत्रापि जलमस्ति चेत्तदा निवेदितव्यं एवमुक्ते च चक्रं तत्रतो
उत्पत्य तस्य मस्तके स्थितं भ्रमति स्म सो तीव दुःखमगात् ततस्तं पृच्छति स्म किमेतत् स आह परस्मवा
सदृशः कश्चित्पुरुषः सिद्धवर्त्तिन आगच्छति भवतां प्रश्नं करिष्यति तदा त्वन्मस्तकं विहाय तस्य शिरस्या
रोहणं करिष्यति सत्यसिद्धो वदति कियत्कालो गतः पूर्वसिद्धो वदति कालं न जानामि परमधुना कस्य राज्यं व
र्त्तते न विनः कथयंति वेणिवत्सस्य पूर्वं विदन् रामचंद्रस्य राज्यमारभ्याहं वत्सराजराज्यपर्यंतमनेनैव

नापीडितः सन् कानने निवसामि नचिनः पृच्छति त्वयात्र भोजनं विधीयते वा नः जीर्णो वदति भो आर्य
रेण निक्षिप्तवस्मनि भयमुत्पादयित्वा कृत्यमेतत् येनात्र कोपि नागच्छति अधुनात्र क्षुधा तृषा जरा मरणा
तो केवलं व्यथां सहे यदा कश्चिदन्यः पुरुषो द्रव्यार्थी सिद्धवर्त्मन्यागमिष्यति तदा त्वामुक्त्वा तं व्यथयि
ति एवमुक्त्वा सोयथास्थानं गतः ततोनन्तरं सुवर्णसिद्धिरपि तमन्वेषमाणो व्यथयापीडितमघोरकानने स
त्रं ददर्श ततोग्रे गत्वा त्वं पृच्छति स्म रे मित्र किमेतत् चक्रधरो वदति दैवयोगादेनामवस्थां गतोहं सुवर्णसि
द्धिर्वदति भो आर्य त्वया लोभमोहितेन ममादेशो न स्वीकृतः त्वं विद्यावान् कुलवान् परं बुद्धिरहितो तः
इत्थं गतिं गतः तदुक्तं भवति वरं बुद्धिर्न सा विद्या विद्यातो बुद्धिरुत्तमा बुद्धिहीना नपश्यन्ति यथा ते सिंहका
रकाः ३७ चक्रधरः पृच्छति कथमेतत् सुवर्णसिद्धिः कथयति गौडदेशे जंबुनदपुरं नाम नगरं विराजते तत्र च
त्वारो द्विजाः निवसन्ति स्म त्रयो विद्वांसः एको मूर्खः परं बुद्धिमान् चत्वारोपि कदाचिन्मिथ वितर्कं कृतवंतः शृणुत
मित्राणि अनया विद्यया किं यदा देशान्तरं गत्वा राजानं सद्धर्षं कृत्वा स्फारं वित्तं प्राप्य स्वदेशमागत्य पुरुषा
न क्रीयंते एवं नानाविधं विचार्य परदेशं प्रतिप्रस्थिताः ततो मार्गं गच्छंतः संतः कथयन्ति स्म अयं श्रीमान् परं
नो विद्वान् अतो राज्ञा मुष्टितदा न योग्यो यं नास्त्येव अतोयं मूर्खः स्वगृहं प्रति गच्छतितदा कृत्वे द्वितीयो वदति ३४

भो आर्य त्वं मूर्खः अतो गच्छ स्वगृहं प्रति एवमुक्ते तृतीयो वदति रे मित्रे आवां शैशवावस्थायां अयं मित्रं एवं क
थं निषेधं कर्तुं शक्यः अतोयं सुखेनागच्छतु यदा सर्वेषां द्रव्यं मिलति तदा विभागो देयः अथवा किं च न स्य तदुक्तं
किं तया क्रियते लक्ष्म्या या वधूरिव केवला यान वेश्येव सामान्या पथिकैरपि भुज्यते ३८ तथा च अयं निज।
श्चेति गणना लघुचेतसां उदारचरितानां तु वसुधैव कुटुम्बकं ३९ एवं विचार्य सर्वे प्रस्थिताः मार्गं गच्छन्तः सं
तः एकं गह्वरं वनं प्रापुः तत्र जलपूर्णं तडागं दृष्ट्वा ऊचुः एवंविधं सरोवरं त्यक्त्वा न्यत्र गन्तुं न शक्याः अतोत्र मध्या

ह्न संध्या भोजनादिकं विधाय गम्यतां एवं विचार्य तत्र स्नानं संध्यादिकं कृत्वा यावत् तिष्ठंति तावत् पूर्णानंदो नाम योगी
राजः समागतः ततः सस्मिन्नागते सति ते सद्धर्षाः ऊचुः धन्या वयं कृतार्था जाताः तव दर्शनेन एवमनुस्तुतः स योगि
राजः पृच्छति स्म के यूयं कस्मै अस्मिन्नारण्ये कानने निवसंतः ते ऊचुः स्वामिन् वयं विद्यार्थिन प्रदेशाटनाय निर्गताः
एवं तेषां दीनवचनं श्रुत्वा सकरुणेन योगिना त्रयाणां त्रयो मंत्राः दत्ताः योगिस्तु स्वगतिं गतः ततस्ते चत्वारोपि मुदेन
प्रस्थिताः मार्गं गच्छंतः संतः दूरे रस्थिनी दृष्टवंतः तानि दृष्ट्वा विचारं कुर्वते भो अस्माकं मंत्रसिद्धिस्तथ्या वा तथ्येति क
थं ज्ञेयमतोस्थि संचयपरीक्षां कुर्मः तेषु एको वदति रे मूर्खं त्याज्य एषु यद्धत्तं ते शरीरं तत् संबुद्धं करोमि द्वितीयो वदा
ति पश्चात् मध्ये चर्मा मिथ प्रपूर्णं करोमि तृतीयो वदत्यहं सजीवं करोमि तर्हि मे विद्या सत्या भवति एवं चिंतयित्वा मिलि
त्वा शरीरं कृतवंतः यावत् तृतीयो सजीवं करोति तावत् स बुधिमानुवाच भो मित्राणि अयं सिंहः सजीवो न क्षिप्यति तदा सर्वे
षां विनाशं करिष्यति अयं क्रूरजीवोस्ति ततस्ते ऊचुः रे मूर्ख अस्माकं विघ्नजो न भवति ततस्तेषां वचनमाकर्ण्य बु
द्धिमान कथयति क्षणमेकं स्थेयं यावदहं वृक्षोपरि स्थानं करोमि ते क्षणं स्थिताः बुद्धिमता पादपारोहणं कृ
ततो तैः सिंहः सजीवं कृतः सजीवेन हरिणा त्रयोपि व्यापादिता भक्षिताश्च ततः सिंहः स्वस्थानं गतः तेन स
लोकितं सिंहगमनानंतरं स बुद्धिमान स्वदेशं गतः अतोहं ब्रवीमि वरं बुद्धिर्न सा विद्येति चक्रधरः कथयति।
अहो अकारणमेतत् बहुबुद्धया विनश्यं दैवेनापि सुरक्षिताः स्वल्पबुद्धिरपि दैवेक पुरे तिष्ठति ततः श
तबुद्धिस्थिरस्यायं लंबते यं सहस्रधीः एकबुद्धिरहं भद्र क्रीडामि विमले जले ४० सुवर्णसिद्धिः पृच्छति क
थमेतत् स चक्रधरः कथयति मध्यदेशे विमलानाम नदी वर्तते तस्याः ह्रदे सहस्रधी शतधी नामानौ म
निवसतः तयोरेकधीर्नाम दर्दुरः मित्रत्वमागमत् तेन द्वावपि एकवेलं गोष्ठिं कुर्वंति तत्क्षणे गोष्ठी कृत्वा स्वस्वालयं
एकस्मिन् दिवसे त्रयोपि नदीतीरे यावत् गोष्ठी कुर्वंति तावत्कृत्तांताधीवराः समाप्ताः गच्छंतः संतः कथयंति

अद्यदिने त्वन्यस्थाने मत्स्या व्यापादिता: परमुख: कालेत्र ह्रदे बहवो मत्स्या संति ते व्यापादितव्या: एवमन्योन्यमा
लापं तेषां श्रुत्वा तौ मंडूको सो हरिमित्रं चितको मुक्ताबन्धु: सर्वे कोवदंति रे मित्र श्रूयतां व्याधा: किं वदंति।
अधुना किं कर्त्तव्यं महद्भयमुपागतं सर्वेषामेव विनाशो जायते तत्र ह्रदे पिच अतो सर्वैरन्यजलाश्रयो आ।
श्रितव्य: तच्छ्रुत्वा सहस्रधी: कथयति नो आर्य मा बिभी बिकावचमात्रेणैव ति: तदुक्तं सर्पाणांच खलानांच स
र्वेषां दुष्टचेतसां अभिप्राया न सिध्यंति तेनेदं वर्त्तते जगत् ॥२२॥ प्रथमं तेत्रनागमिष्यंति यदि कदाचिदागमि।
ष्यंति तथाहं त्वां तथा सर्वेषां सहस्रबुद्धि कृत्वा रक्षयिष्यामि नीरगतिमहं बहु जानामि अतो न भीति: तच्छ्रुत्व।
शतधीरुवाच आर्य सम्यगुदितं यत: बुद्धिर्बुद्धिमतां लोके नास्त्यगम्या हि विद्यते बुद्ध्या यते हता नंदा चाणा
क्येनासिपाणय: ॥२३॥ न यत्रास्ति गतिर्वायो रश्मीणांच विशेस्वत: तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा ॥२४॥
तेषां पापिष्टानां वचनं श्रुत्वा कथं स्वर्गमायतनं त्याज्यं जन्मधरा सर्वतोपि प्रियाभवति तर्हि कुत्रापि न गंतव्यं।
बुद्धिबलेन सर्वेषामहं रक्षणं करिष्यामि हरिर्वदति ममैकाबुद्धिरस्ति पलायनं कार्यम् यदा सर्वेषां न रोचते तदा।
हं अन्यजलाश्रये सकुटुंबो गमिष्यामि एवं कथयित्वा नेकोरात्रौ अन्यजलाश्रये सपरिवारोगत: तत: प्रात:स ७५
मये ते व्याधेरागत्य कनिष्ठा: ज्येष्ठा: मध्या: सर्वे व्यापादिता: तौ शतबुद्धि सहस्रधी नामानौ विपुलां नीरगतिं कुर्व
त: व्यापादितौ सायंकाल पर्यंतं स्थित्वा तत विनाशिता: सर्वेषां गृहीत्वा स्वमंदिरं गंतुमुपचक्राम शतधी ज्येष्ठ:।
अत: केनचित् पारधिना शिरसि स्थापित: सहस्रधी दोर्भ्यां मिलित्वा गृहीत: इत्थं गृहं तौ व्याधा: कुत्र चित्स्थाने
केन दृष्टा: नेक: स्वभार्यां कथयति शतबुद्धि: शिरस्थोयमिति चक्रधर: कथयति नो आर्य दृष्टमीत्र वचो स्वीकार्यं
तदा शुभं न कृतं चेदशुभं तच्छ्रुत्वा सुवर्णसिद्धि: कथयति रे मित्र मया बहुतरं निषिद्ध: परं लोभाश्रितेन त्वया न कृत
मस्मद्वचनं तर्हि कष्टं गता साधु मातुल गीतेन वारितोपि न संस्थित: अपूर्वोयं मणिर्बद्ध: स्वलब्धं गीतजं फलं ॥२५॥ च।

चक्रधर: पृच्छति कथमेतत् सुवर्णसिद्धि: कथयति अस्त्युत्तरस्यां दिशि चंपापुरी नाम नगर्यं तत्र चंपको नाम रजको
निवसति स्म तस्य गृहे गर्दभो सकलभारवाही वर्त्तते स रासभो रजकस्य कार्यं दिवसे विधाय रात्रौ वने चरति प्रात:
पश्चादागत्य रजकगृहे तिष्ठति ततो एकदा रात्रौ कानने विचरन् सन् केनचित् गोमायुनाम सह मित्रत्वं गत: द्वा
वप्यनुदिनं त्रपुवनं प्राप्य चिर्भटाणि भक्षयत: एकदा क्षेत्रस्वामिना चिंतितं अनुदिने कोत्रागच्छति एवं विचा
र्य निश्चितं मयात्र रक्षितव्यं प्राप्य चौरो विलोकनीय: तौ द्वावपि क्षेत्रं विलंघ्य भक्षयित्वा हृष्टपुष्टांगौ जातौ कस्मि
न्समये रासभो गोमायुं प्रतिवदति नो भ्रातुर्भागिनेय पश्य कीदृशी रात्रिर्निर्मला वर्त्तते अहं गानं कर्त्तुमुद्युक्तो जा।
त: अतस्त्वं कथय केन रागेण गीतं गातव्यं मयाहं तच्छ्रुत्वा गोमायुर्वदति रे मातुल आवाभ्यां चौरी क्रियते
तदा गीतं गातुमुचितं कस्त्वं चौरी कर्त्तुं यदा गच्छति तदा गुप्ततया तिष्ठति अतो मौनं कार्यं न च गेयं तदुक्तं का।
सी विवर्जयेच्चौर्यं निद्रालुश्च भवेच्चौरिकां जिह्वालोलं रुजाक्रांतो जीवितं यो हि गच्छति ॥२६॥ अतो तव गानमत्यं
तमधुरं यत् शब्द: कर्णस्फोटयति तर्हि क्षेत्रपाल: कथं न जानाति तव गानं श्रुत्वा मे क्षेत्रपाल: जागरूको भूत्वा।
आवयोर्विनाशं करिष्यति अतो महाकंटकीकृत्य सुदृढाणि चिर्भटाणि भक्ष तच्छ्रुत्वा खर: कुपितमना: प्राह रे मू
र्ख गानं रसो न ज्ञायते त्वं वनचर: अतो ईदृशं वदति तदुक्तं स्वरेणाहृतोऽहं तमसि प्रिय सन्निधौ आत्मा
नां जायते कर्णे गीतसंकरजा सुधा ॥२७॥ जंबुक: कथयति नो आर्य अन्यत् मम सुजाप्रितादिके ज्ञानं स्फारं व
दीति रागोद्भवसोऽस्ति परं किं करोमि येन नाशो भवति रासभो वदति धिग्धिक् मूर्खत्वमेतस्य संगीतं नाभिवेत्ति
य: संगीतेन सर्वेदेन देवानपि वशं नयेत् ॥२८॥ तच्छ्रूयतां तस्य भेदा: सप्तस्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशति:।
तानाएकोनपंचाशत् इत्येतत् स्वरमंडलं ॥२९॥ तानत्रयं स्वरा तांच रसानां षट्त्रिंशति स्वरलक्षणमित्येवं नरतै:सम

दाज्ञतं ५० सुवर्णरचितं श्रृंगं पीतांगैः सकलैर्हतं धन्यानां जायते कर्णे विशेषात् शरदि स्थिते ५१ नान्यत्प्रीताद्धि
र्लोके देवानामपि विश्रुत तस्मात्त्वं गीतमाधुर्यं शृणुष्वैकाग्रचेतसा ५२ त्वं च मामज्ञातगीत तत्त्वमत्वा निवारय
सि गोमायुरुवाच मामातुल यदि शुद्धं त्वया न वितंडं तदाहं कंटकपरिधिं मुक्त्वा गच्छामि तावन्तूष्णीं भूत्वा तिष्ठ
महत्ते सति जनवह्निर्गेयं एवं भणित्वा सो बहिर्गतः ततो रासभो ऊर्ध्वग्रीवां कृत्वा गानमभ्यसितवान् तच्छब्दं श्रुत्वा।
क्षेत्रपालः महत्काष्ठं हस्ते धृत्वागतः तत्रागत्य रासभं ताडितवान् स रासभोपि भूमौ वामनमृत्युः सन्पतितः ततः
मधि क्षेत्रपालः खरग्रीवायां काष्ठं स्थूलं बद्ध्वा सारात्रिंको ज्ञात्वा सुप्तः खरोपि क्षणमेकं व्यथां भुक्त्वोत्थितः तदुक्तं सार
मेयस्य वाजिनश्च गर्दभस्य विशेषतः मुहूर्तात्परतो नस्यात् प्रहारजनिता व्यथा ५३ यावत् खरः काष्ठेन सह क्षेत्रान्निर्ग
तः तावज्जंबुको आगत्य मिलितः तत्रागत्य हास्यमकरोत् साधु मातुल गीतेनेति ॥ ५४॥ सुवर्णसिद्धिः कथयति ॥
भो आर्य मया त्वं निवारितः परं न स्वीकृतं मद्वचनं त्वया चक्रधरो वदति मित्र सत्यमेतत् परं यस्य नास्ति स्वयं प्र
ज्ञा मित्राणां च करोति न स एव निधनं याति यथा मंथरको मृतः ५५ सुवर्णसिद्धिः पृच्छति चक्रधर कथयति क॥
स्मिन्देशे मंथरको नाम कैवर्त्तः वस्त्रकर्म कुर्वन्निष्ठति कियंतैर्दिवसैः काष्ठानि भग्नानि तस्यार्थे कुठारं गृहीत्वा।
वने गतः तत्रैकं काष्ठं श्रृंगं दृष्ट्वा तच्छेदयति यावत्तावत्तत्रस्थो व्यंतरः कथयति रे कैवर्त्त ममाश्रमोऽस्मिन्वृक्षे। ९६
वर्त्तते अत्र सुखेन निवसामि अतो मा छेदय कैवर्त्तो वदति भो आर्य मम काष्ठानि नास्ति तैर्विना हं सकुटुंबः पंच
त्वं गमिष्यामि तद्वचनानंतरं व्यंतरः कथयति रे मित्र त्वं दृढं रक्षय इष्टं त्वां वरं दास्यामि तद्वाक्यं श्रुत्वा कैवर्त्तेनोक्तं
तदाहं स्वगेहं गत्वा कुटुंबेन निवेदयित्वागमिष्यामि तेनोक्तं शीघ्रमागच्छः सः स्वगृहं प्रतिप्रस्थितः यावत्स्वपुरं प्राप्तस्तावत्
रथ्यायां स्वमित्रं मिलितं तं पृष्टवान् रे मित्रात्र काननेमां प्रसन्नमुखो व्यंतरो वदति वरं वृणीष्व अतस्त्वं कथय।

कं वरं वृणोमि तेनोक्तं राज्यं वृणीष्व त्वं राजा अहं मंत्री पश्चादेतेषां जनानां सुखं भुक्त्वा ततः परं लोकं साधय तदुक्तं।
राजा न्यायपरो नित्यं मिह कीर्तिमवाप्य च तत्पुनस्तुः स्वर्गे स्पर्द्धति त्रिदशैः सह ५६ तच्छ्रुत्वा कैवर्त्तः कथय।
त्यातः सत्यमेतत्परं स्वभार्यां पृच्छामि दुर्बलस्य गृहे भार्या मंत्री मित्र नापितो वदति रे मित्र कथमेतत् शास्त्रविरु
द्धं क्रियते नवत्ता यन्नायिकया सह मंत्रं करोति सा अल्पधीर्भवति तदुक्तं भोजनाच्छादनं दद्यात् ऋतुकाले च सं।
गमं भूषणाद्यं च नारीणां न तास्तिर्मंत्रयेत्सुधीः ५७ यत्र स्त्री कितवो यत्र यत्र बालोनुशासकः राज्यं निर्मूलतां या।
ति तद्धदं भार्गवोब्रवीत् ५८ तावत्स्वां सुप्रसन्नो सो तावत्स्फुरखेरतः पुरुषो यो पितां यावत्तन्मृह्लातिरहो
वचः ५९ अन्यच्च एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः न तासां वल्लभः कोपि सुतोपि स्वसुखं विना ६०
कैवर्त्तो वदति हे भ्रातः त्वं तथापि भार्यां पृच्छामि एवं भणित्वा गेहं प्रतिगतः भार्यां प्रत्युवाच हे स्त्री कानने व्यंत
रः प्रसन्नो जातः वरं ददाति किमिच्छामि मम एकं नापितो मित्रं च गतः तं पृष्टं किमिच्छामि तेनोक्तं राज्यं वृणी
ष्व अतः कस्तवाभिप्रायः स्त्री प्रत्युवाच चारणैर्बंदिभिर्नीचैर्नापितैर्मालिकैरपि न मंत्रं मतिमान्कुर्यात्सार्द्धं।
भिक्षुभिरेव च ६१ शृणु अन्यत् राज्यभारोऽसाध्यः संधिविग्रहस्थानानि आसनसंश्रयद्वैधीभाव एवं कृते पुरुष
स्य कुतः सुखं तदुक्तं यदैव राज्ये कुरुते भिलाष स्तदैव याति व्यसनेषु बुद्धिः घटा नृपाणामभिषेककाले सहां
भसैवापदमुद्गिरंति ६२ तथा च रामस्य व्रजनं बलेर्नियमनं पांडोः सुतानां वनं वृष्णीनां निधनं नलस्य नृपतेः रा
ज्यात्परिभ्रंशनं सौदासं तवस्त्वा अर्जुनवधं संचिंत्य लंकेश्वरं दृष्ट्वा राज्यकृते विडंबनगतं विद्यान्नतत्प्रार्थयेत्
६३ कैवर्त्त उवाच सत्यमुक्तं परं किमिच्छामि नारी वदति तयाद्यात्यां हस्ताभ्यां वस्त्राणि संख्यातानि कृतानि।
अथ चत्वारि करैर्द्विगुणानि पुष्कलानि भविष्यंति अधुना तु करौ द्वे प्रार्थनीयौ यथा सह वस्त्राणि भवंति

एवं कृते न धनाढ्या भविष्यथ यूयं स्वजातौ महान्तो भविष्यथ सुखेन कालं निर्वाहं करिष्यथ एवं श्रुत्वा।
सहर्षो जातः वदति च देशाद्भिन्नया सम्प्रदत्तं अतो त्वमेव यां स्वामि ततो रोषणातः व्यंतरस्तुतिं कृतवान्
स्वामिन् द्वावस्मौ करौ देयौ दृष्टतः व्यंतरः कथयति तथास्तु कथिते सति तत्क्षणे चतुर्भुजो जातः हस्तावना।
यासेन दृष्टौ जातौ स हर्षः स्वगृहं प्रस्थितः तावज्जनैः राक्षसोऽयमिति भणित्वा ऽश्मकाष्ठाद्यै र्व्यापादितः स
पंचत्वं गतः अतोऽहं ब्रवीमि यस्य नास्ति स्वयं प्रज्ञेति तीकथा॥ ६४॥ चक्रधरः कथयति सत्यं सत्यमेतज्ज्ञातं
नो आर्य सर्वलोकः सुबुद्धिरपि लोभि मिथ्याचारिणीतया भ्रमितः सन् उपहासपदवीं गच्छति तदुक्तं अनागतव।
तीं चिंता मसम्भाव्यां करोति यः स एव पांडुरः शेते सोमशर्मपिता यथा ६५ सुवर्णसिद्धिः पृच्छति चक्रधर कथं
कलिंगदेशे केतकीपुरं नाम नगरं तत्र दीर्घसूत्री द्विजः स्वित अपार कृपणो निवसति स्म सो भिक्षाटणेन
ल्वोदरं बिभर्त्ति उदरपूर्णावशेषं पिष्टं घटे क्षिप्त्वा संचयं करोति च इत्थं क्रियंते र्दिवसै र्महान् घटः सक्तुन पू
र्णो जातः सो तरिद्धेते उन्वि र्निबद्ध तिष्ठति तस्याधो मंचकं कृत्वा सुप्तः मनश्चिंतयति अये दुर्भिक्षं भविष्य
ति तदा मातं विक्रयं करिष्यामि तस्य शतं वप्रवानागमिष्यामि आपारेण चर्दयित्वा स्वगृहे सुवर्णं करिष्या। ११
मि ततो धवलगृहं करिष्यामि एवं कृते कश्चित् द्विजः मां धनाढ्यं दृष्ट्वा नवयौवनोद्गमां स्वकन्यां दास्यति त
तः पुत्रोत्पत्ति र्जायात स पुत्रः क्रोधाकुलो भविष्यति तदाहं पुस्तकमनुवाचनं कुर्वन्तिष्ठामि। स्त्री रपि गृहक।
र्येणाकुला भविष्यती स्मृतिमहावाक्यश्रवणं करिष्यति तदाहं तां क्रोधेन हनिष्यामी इत्थं मनसि विचिंत्य घटे।
पादप्रहारः कृतः तेन घटस्थ पिष्टो गृहे विकीर्णः ततो स ब्राह्मणो शरीरं पांडुरूपेण मृत्युं गतः अतोऽहं ब्रवीमि
अनागतवतीं चिंतेति ६६ सुवर्णसिद्धिः कथयति सत्यं सत्यं परमत्र तव को दोषः सर्वलोभेनाकुलितमस्ति

तदुक्तं यो लोभात् कुरुते कर्म नैवोदकमवेक्षते विडंबनामवाप्नोति स यथा चंद्रभूपतिः ६७ चक्रधरः पृच्छति सु।
वर्णसिद्धिः कथयति कस्मिंश्चिद्देशे मालतीपुरं नाम नगरं तत्र चंद्रो नाम राजा राज्यं करोति तस्य चत्वारः पुत्राः संति
तेषां मध्ये एके क्रीडार्थं वानरयूथं घृतशर्कराक्षाद्यिभिः पोषणं कृत्वा पालितमस्ति तद्वानरयूथपतिरेको बृहस्पतिरि
व सकलनीतिशास्त्रसंपन्नो वर्त्तते तस्य राज्ञः कनिष्ठपुत्रेण मर्कटानां तथा मेषादीनां यूथं पालितमस्ति तेषां मध्ये
एको मेषः मदोन्मत्तः पाकशालायां प्रवेशं कृत्वा यं पश्यति तं खादयति अतस्तस्याः सूपकाराः काष्ठप्रहारैस्तं ताडयं
ति तथापि दिने दिने विघ्नो वृद्धिं गच्छति परं न शाम्यति ततो वानरयूथपति श्चिंतयत् अयं नित्यविरोधो न शुभः
एते सूपकाराः एनं कश्चित् समये काष्ठेनाग्नेर्ज्वलितकाष्ठेन प्रहारं करिष्यंति तदा मेषस्य रोमावलिर्ज्वलिता भविष्य।
ति स प्रज्वलितः सन् हयशालायामागमिष्यति तत्र तृणानि प्रज्वलिष्यंति तेन हयाः प्रदग्धा भविष्यंति तेषां व्रणाना।
मुपशांत्यर्थं वानरतैलं करिष्यति अतः सर्वेषां वानराणां क्षयः समागतः अतो नित्यविरोधेन शुभं तदुक्तं भवति।
तस्मात् कलहो नित्यो नित्यं गृहे यत्राधिकारिणि तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् ६८ कलहान्तानि हर्म्याणि
कुवाक्यान्तं च सौहृदं कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणां ६९ यूथपतिः सर्वेषां प्रति कथयति रेत्रा।
तरः नित्यकलहो न योग्यः अस्य राज्ञः गृहं त्यक्त्वा कानने गंतव्यमेव तद्वृद्धवानरस्य वचनं श्रुत्वा यौवनेन मदोन्मत्ता
अद्य भो स्वामिन् वृद्धत्वेन त्वं विकलो जातः अतोऽपीदृशं वदति तदुक्तं वदनं दशनै र्हीनं लाला स्रवति नित्यशः बुद्धि
र्न स्फुरति क्वापि बालवृद्धे विशेषतः ७० स्वामिन् राजपुत्रेण स्वहस्तदत्तामृतसदृशं भक्षणोऽपीदृशं स्वर्गसुखं त्यक्त्वा
कानने कटुकतीक्ष्णफलभक्षणाय न गच्छामो वयं एतच्छ्रुत्वा स यूथपतिः क्रोधाकुलितमना स्तान् वदति रे मूर्खाः यू
यं सुखं पश्यामः परं दुःखं न पश्यामः भवद्भिर्गमनं कार्यं वा न कार्यं परमहमेतद्विरोधं जयेत्यक्त्वान्यस्थाने गच्छामि।

तदुक्तं स्वमित्रं व्यसने प्राप्तं स्वस्थानं परिपीडितं धन्यास्ते ये न पश्यंति देशभंगं कुलक्षयं ॥१२॥ एवं भणित्वा स यूथप
तिः सर्वान् विहाय वने गतः ततोन्यद्दिवैने मेषः पाकशालायां प्रविष्टः यदा सूपकारेण दृष्टः अन्यत्काष्टं तदा
ज्वलितकाष्टेन हत्वा स मेषस्तेन रोमावलिः प्रज्वलिता सः हयशालायां प्रविष्टः ततः तत्राग्निः प्रबलो जातः
अग्निना हयाः प्रदग्धाः केचिन्मृताः तस्मिन्नवसरे नृपतिरागतः नृपतिना गत्वा वह्निः शांतः कृतः हया दग्धाः
वैद्या आकारिताः भो वैद्याः यद्दग्धानामौषधं कथ्यते तैरुक्तं स्वामिन् अश्वानां दाहोपशांत्यर्थं भेषजं सः
र्वैर्भणितमस्ति कपीनां मेदसा दोषो वह्निदाघसमुद्भवः अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥१४॥ तद्वच
ःश्रुत्वा राज्ञा वानरवधार्थं प्रतिकारः कृतः ते पाषाणादिभिस्ताडिताः ते पंचत्वं गताः तेषां तैलेनोपचारः कृतः तद्
वृत्तांतं वानरेण श्रुतं सोतीव दुःखं प्राप क्रोधप्रज्वलितो जातः परं क्षमां गतः तथाहि नयावज्ञादिवा कामान् क्रो
धमानमदांस्तथा निर्दोषं सदैवात्र संसेव्यो धर्मपुंगवः ॥१३॥ सहते रिपुकृतां पीडां अवज्ञां कालयोगतः वंशजः सु
धीर्धीलोकैः संसेव्यो धर्मपुंगवः ॥१४॥ विचिंत्य शुद्धया बुद्ध्या क्षमामालंबते तु यः सुखं परंपराप्राप्तं द्विगुणं त्रि
गुणं लभेत् ॥१५॥ एवं विचिंत्य स वृद्धवानरः भ्रमन् भ्रमन्नयं प्राप एतस्मिन् स एकं महत्सरोवरं प्राप सरोरुहैराच्छा ३८
दितं जलपूर्णं तं दृष्ट्वाग्रे गतः तत्र वनचरमनुष्यपादप्रवेशो दृष्टः तं पश्यन् अयं प्राप एतस्मिन् जलाश्रये कोपि
दुष्टप्राणी तिष्ठति ततः स वौ वरे लंबायमानविटपपादपो वर्तते तमारोहणं कृत्वा कमलनालेनोच्छ्वासेन ज
लं पिबति स्म तदेव क्षणे राक्षसः एकां रत्नमालां कंठे कृत्वा बहिर्निर्गतः वानरं प्रत्युवाच रे वानर एतत्सरोवरे यः प्र
विशति तं मद्दलं भक्षयामि परं त्वं महान् धूर्तः यद्दूरतः जलं पिबति तदा त्वामहं संतुष्टः वरं वृणीष्व वानरोवाच भवतो
कियती शक्तिर्भक्षणे राक्षस उवाच सहस्रदशसहस्रलक्षयावंतो जलं प्रविशंति तावंतो मया भक्षणीयाः ये

बहिर्निर्गतास्तान् प्रति न शक्तिः वानर उवाच सत्यमेतत् तदा ममैकेन राज्ञा सह वैरमस्ति तं सपरिवारं जलमध्ये प्र
वेशं करिष्यामि इयं रत्नमाला मां देया यथाऽनेन लोभेन सर्वान् वंचयित्वात्रानयिष्ये राक्षसेन दत्ता स पादेश्वारो
पिता नगरीं प्रति प्रस्थितः ततोनंतरं पुरीं प्रविश्य अट्टालिकायां स्थितः तं दृष्ट्वा लोकाः पृच्छंति स्म भो मित्र एते दि
वसाः कुत्र निर्गमिताः इयं रत्नमाला कुत्रत्ता लब्धा सूर्यतेजसोप्यधिका स वानरोवाच भो लोका वनमध्ये एकं
सरोवरं श्रेष्ठमस्ति कुबेरेण निर्मितं भवति यः रविदिवसेऽर्द्धसूर्योदयात् पूर्वं प्रविशति तस्मिन् सरोवरे ईदृश
रत्नमालायामंडितः धनदरूपया निःसरति तद्वार्तां राज्ञा श्रुत्वा तेन वानरो आकारितः पृच्छितं च तेन तथा रा
ज्ञोग्रे कथितं राज्ञा तद्वचो श्रुत्वा लोभेन निपतितः राजा वानरेण सह तत्सरोवरं प्रति प्रस्थितः तस्या लोभेन वानरं
नरवाहने आरोप्य गच्छति सर्वे जना लोभवशा भवंति तदुक्तं तृष्णे देवि नमस्तुभ्यं यथा विद्यान्विता अपि अकृ
तेषु नियोज्यंते भ्रामंते दुर्गमेष्वपि ॥१६॥ इह ते शतं सहस्रं सहस्री लक्षमीहते लक्षाधिपस्ततो राज्यं राज्यात्स्व
र्गमीहते ॥१७॥ जीर्यंते शीर्यंते केशा दंता जीर्यंति शीर्यतः चक्षुःश्रोत्रे च जीर्येते तृष्णैव तरुणायते ॥१८॥ प्रातःकाले
राजानं वानरः कथयति स्वामिन् अर्द्धोदिते सूर्ये यः कश्चित् प्रविशति स रत्नमालायामंडितः निःसरति अतो वे
गेन सर्वेषां मध्ये योद्धा यः ततो भवानपि प्रदेशे सहैव करिष्यावः मया रत्नमालाया आकारो दृष्टः तत्र तः रत्नमा
लं बहुलां दर्शयिष्यामि यावच्छक्तिस्तावद्गृहीतव्या एवं भणिते मंत्री ससैन्यः सरोवरे प्रविष्टः ततो राक्षसाः स
र्वे व्यापादिताः भक्षिताश्च ततः कोपि बहिर्न निर्याति राजा वानरं प्रत्युवाच किमहो विलंबमाश्रयसि क
न प्रत्यागतास्ते पुरुषाः तच्छ्रुत्वा वानरो वृक्षोपरि स्थित्वा हास्यमकरोत् रे राजन् सर्वपरिवारः राक्षसा भक्षितः
त्वया मत्परिवारो अश्वार्थे मारितः अतो मया वैरं गृहीतं त्वं स्वामिन् ततो मया न छलितः अतो गच्छ त्वया य

त्कृतं तत्क्षणः तदुक्तं शठे प्रति सत्यं कुर्यात् हिंसने प्रतिहिंसनं तत्र दोषं न पश्यामि यो दुष्टे दुष्टमाचरेत् ७९ त्वं
मम वंशो व्यापादितः ततो मयापि स्ववैरं गृहीतं अधुना गच्छ स्वपुरीं राजा श्रुत्वा एक एव दुःखितमनाः गेहं
पश्चात्स राक्षसोऽपि मित्वात् मानं दो बहिर्गतः वानरं वर्णयति स्म पश्चात्क्रमा जातमपि तस्मै दत्वा यावपि स्वस्था॥
ने गतौ अतोहं ब्रवीमि योजीत्वा त्वकृते कर्मणः इति कथा॥ पुनः सुवर्णसिद्धिः कथयति नो आर्य मामादेशो
देयः यदहं स्वाश्रमे गच्छामि चक्रधरो वाच रे मित्रास्यैव वेलायै मित्रसंग्रहः मामीदृशं दुःखं त्यक्त्वा कथं गृहं रिव
मिष्यसि तदुक्तं यस्तु स्वार्थ आपदि मित्रं याति निष्ठुरतां सुहृत् कृतघ्नस्तेन पापेन नरकं यात्यसंशयं पुनः सु
वर्णसिद्धिरुवाच आर्य सत्यमेतत् परं गम्यस्थानेन त्याज्यः परं गम्यस्थानं अन्यस्त्येव तदा कथं तिष्ठामि।
पुनस्त्वद्वदनं पश्यामि तदा मम मनो शंकते यदैवात्मम मोपि स्वकं भ्रमति तदा यावपि नष्टौ एकमपि न कुशली
न गच्छति तदुक्तं यादृशी वदनच्छाया दृश्यते तव वानर चिरकाले गृहीतोसि यो गच्छति मजीवति पुनश्च
क्रधरः प्रयच्छति सुवर्णसिद्धिः कथयति कस्मिन्देशे सूर्यपुरं नाम नगरं तत्र नन्दसेनो नाम राजा राज्यं करो
ति तस्य गृहे सर्वलक्षणसंपूर्णा रत्नावलि नाम्नी कन्यास्ति कश्चिद्राक्षसस्तस्या हरणार्थं नित्यमागत्य तिष्ठति। ७९
परं रक्षार्थं बहवः संत्यतो हरणं कर्तुं न शशाक सा कंपज्वरपीडिता जाता राक्षसच्छायासंसर्गेण स राक्षसः एकस्मि
न्दिने गृहे गुप्तः सन् तिष्ठति शृणोति च किं वदति सा शृणोमि तावज्ज्वरादिपीडिता सा कन्या कंदर्पमुद्दिश्य।
स्वसखीं प्रत्याचष्टे हे सख्ययं दुरात्मा त्र समागत्य मां कदर्थयति अतः पापिष्ठं निषेधयिष्यति कश्चित् छुत्वा स
राक्षसश्चिंतयति स्म अनुमानेन ज्ञायते यथाहं तथा कश्चिद्विकरालनामा राक्षस एतस्याः हरणार्थं मा ग
च्छति परं हरणं कर्तुं न शक्तः इत्थं चिंतयित्वा अश्वरूपेण पश्यति तावत्समये कश्चिच्चौरः स्थित्वा प्रस्थितः चौर

श्चिंतयति अयं विकरालनामा राक्षसो भवति किं कार्यं ततश्चोरः लोहमयं हारमुत्थाय प्रचलितः चौरेण ताडितः
सन्नतिवेगेन निःसृतः सोंकुशं नमानयति चौरो बकुलेद्दुः खंवापः तथापि सोऽश्वः वेगेन धावयति चौरः
भितश्चिंतयति अश्वास्त्वीदृशा न भवंति सत्यं राक्षसोऽयं भविष्यति कुत्रचिद्वृक्षे शरीरं रक्षामि एवं चिंतयतः।
स राक्षसो वटवृक्षाधो गतः तत्र वटवृक्षमूलं गृहीत्वोपरि स्थितो पश्चात्स्वावपि चिंतयतः अहो जीवितं राक्ष
सः पलायितः नयं नास्ति तत्र एकः राक्षसो मित्रमस्ति स राक्षसः स्वमित्रं वदति रे आर्य नायं राक्षसः चौरोयं।
तर्हि एनं भक्षयत्वं एवं श्रुत्वा राक्षसः प्रत्यागतः चौरश्चिंतयति किं कर्तव्यं वानरपुच्छं मुखेन गृहीत्वा स्थितः
तदा चिंतितं तेनायं महान्राक्षसः अविकल्पात् न वदति विकलवदनः स्तिष्ठति राक्षसः वानरमवस्थांतरं
प्राप्तं दृष्ट्वा श्लोकमेकं बभाण यादृशी वदनच्छाया इति कथा॥ यदयं विकरालमुखस्तथायं वानरो पि त्वादृ
शो दृश्यते सुवर्णसिद्धिः कथय। आर्य ममादेशं देहि अहं नगरं गच्छामि आवयो लेनिदृष्टफलं चक्रधरः
कथयति कारणमस्ति न य स्थापनयश्चैव देवाः संपद्यते नृणां तद्दशा कुरुते कर्म अनाश्रमफलं पुमान् पु
ङ्गत्रिकूटं परितः समुद्रस्ति पुनः अंधकः कुब्जकश्चैव त्रिस्तनी राजकन्यका त्रयो प्यन्यायतः सिद्धा स।
न्मुखे कर्मणि स्थिते पुनः सुवर्णसिद्धिः पृच्छति चक्रधरः कथयति उत्तरस्यां दिशि मधुपुरं नाम नगरं तत्र म
धुसेनो नाम राजा राज्यं करोति तस्यापत्या कश्चित्समये त्रिस्तनी कन्या जनिता तस्योत्पत्तिं ज्ञात्वा राज्ञा गु
प्त तयासेवकाः कथिताः अयं महानुत्पातः कन्याकानने त्याज्या तच्छ्रुत्वा ते ऊचुः स्वामिन् यदा कन्याश्च
न कारिणी इत्थं मनसि स्थितं तदा ब्राह्मणाः पृच्छितव्याः पश्चाद्ब्राह्मणवचनानंतरं यद्युघति तत्कार्यं यथा
हपरत्र बाधा न भवति तदुक्तं यः परिपृच्छति धारयति शृणोति च चिंतयत्यनिशं तस्य दिवाकरकिरणै

नलिनी वविसर्पति बुद्धिः ८४ अन्यच्च पृच्छकेन सदा भाव्यं उत्तमेषणजगीषुणा राक्षसेन गृहीतोपि प्रश्न-
क्मोद्धितः पुरा ८५ राजा पृच्छति कथमेतत् सेवका कथयति स्वामिन् कस्मिंश्चिद्वनोद्देशे चंडको नाम रा-
निवसति एकस्मिन्समये राक्षसः परिभ्रमन् ब्राह्मणसमीपं गतः तत्र गत्वा ब्राह्मणमुवाच मां स्कंधे धृत्वा
ग्रे सरोवरं वर्तते तत्र गच्छ ब्राह्मणोपि यत्रस्तः सन् गृहीत्वा प्रचलितः तस्य राक्षसस्य पादावग्रे आगतौ स्तः ते
स्पर्शितौ तदा कमलसदृशसुकोमलौ दृष्टौ ततस्तेन प्रश्नः कृतः भो स्वामिन् भवतां पादावग्रे सुकोमलौ क-
स्तः पश्चात्तेनोक्तं अहंप्रवमि तस्मात्कोमलौ यः कश्चित्समीपं आगच्छति तं गृहीतास्मद्यामि अतोस्मिन्सरो-
वरे स्नानदेवतार्चनं कृत्वा त्वां भक्षयामि ततस्तेन स्वस्य बंधनविमोचनस्योपायश्चिंतितः सरोवरं प्राप्तो जले
गत्वा राक्षसो वदति भो स्वामिन् यावदहं स्नानदेवतार्चनं करोमि तावत्त्वं तीरे तिष्ठ द्विजेनोक्तं स्वामिन्नहं
वतिष्ठामि विप्रश्चिंतयामास अयं मां व्यापादयिष्यति अतः पलायनं युक्तं स उपंगुः अतः मां प्रति न गच्छति त-
तः स द्विजः पलायितः राक्षसस्तु हतस्ततो हुंकारं कृत्वा स्थितः प्रश्नात्स द्विजो मुक्तः अतोहं ब्रवीमि। पृच्छकेन स- ८७
दा भाव्यं इति कथा ॥ तेन राज्ञा पितेषां वचनं श्रुत्वा ब्राह्मणाः पृष्टाः भो विप्राः राजपत्न्या त्रिस्तनी कन्या जनि-
तास्ति अस्याः विघ्नाशो वक्तव्यः विप्रास्तु हीनांगी चाधिकांगी च याप्नवेल्कन्यकान्तृणां सास्याद्भर्तृविना-
शाय स्वशीलनिधनाय च ८६ यापुनस्त्रिस्तनोपेता याहृष्टिप्रत्तिगोचरा। पितरं नाशयत्याशु ध्रुवं तेनसायत्रसं-
शयः ८७ तस्मादस्यास्पर्शनमपि न कर्तव्यं यदस्याः कश्चिद्विवाहं करोति तदेव सद्यर्नृ देशांतरं निष्कास-
नीया परं न रक्षणीया ततः सा गुप्ततया रक्षिता यौवनपूर्णा जाता दिनं दिनं प्रति राजा देशांतरं प्रतिश्रुश्राव-
यति यः कश्चित्कन्यां विवाहयति तं लक्षं देयं एकस्मिन्दिवसे अत्र चित्रस्थाने एको अंधः निवसति त-

स्य मंथरको नाम कुब्जको मित्रत्वं गतः ताभ्यां चिंतितं दृश्यमाज्ञा वान्यां स्त्री कार्या कन्यालक्षलाभोपि भविष्यति ततः सु-
खेनानंदपूर्णं करिष्याम तथा च कन्यादूषणेन पंचत्वं गमिष्यावः तदा दुःखं गच्छति लज्जा स्नेहः स्वरविशदता बु-
द्धयः सौमनस्यं प्राणानंगः पवनसमता दुःखहानिर्विलासाः धर्मः शास्त्रं सुरगुरुमतिः शौचमाचारचिंता सर्वे
पूर्णे जठरपिठरे प्राणिनां संभवंति ८८ इत्थं चिंतयित्वा अंधेनादेशो स्वीकृत भो आर्य राजा मां कन्यां त्रिस्तनीं दास्य-
ति तदाहं गृह्णामि ततस्ते राजपुरुषैः राज्ञाग्रे विज्ञप्तं राजन् एकोंधः आदेशः स्वीकरोति यन्मां राजा त्रिस्तनीं दास्य-
ति तदा गृहीष्यामि तच्छ्रुत्वा राजा आह अंधः कुब्जकः यश्चिरयः विवाहं करोति तस्य देया अनुचरा राज्ञः आदे-
शं स्वीकृत्य राजकुमारीं गृहीत्वा वने गताः अंधकुब्जकयोः कन्यां च परं लक्षं दत्वा कथितं च रे अंध देशांतरं गच्छ।
तच्छ्रुत्वा त्रयोपि परदेशं गत्वा सुखं बुभुजुः ततस्ते सर्वे परदेशं गत्वा सुखिनो जाताः स अंधो नायिकया सह शय्या-
यां तिष्ठति अग्रे कुब्जकः कार्यं करोति एवं क्रियतो दिवसाः निर्गमिताः एकदा कुब्जकेन सह सा त्रिस्तनी व्यभि-
चारं कुर्वती सती कुब्जकं वदति रे कुब्जक कुत्रतो विषमानयित्वा एवं विषं दत्वा व्यापादयामि ततो निःशंकं
भोगं करिष्यामि एकदा कुब्जकोपि भ्रमन् मृतः सर्पो ददर्श तं दृष्ट्वा मनहर्षजातः मृतसर्पं गृहीत्वा गृहमागतः गृहमा-
गत्य पत्नीं प्रति कथयति रे प्रिये तस्यांधस्य मत्स्यमांसादि अतिवल्लभमस्ति अतः कपटेन मृतसर्पविषं दत्वा व्या-
दितव्य एवं भणित्वा कुब्जकः कार्यांतरं गतः तं सर्पं हरिद्रालवणाभ्यां संस्कारं कृत्वा चुल्ल्यां भांडं मुक्त्वा तन्मांसा-
मिषेण कृष्णसर्पं मुक्त्वा अंधं कथयति हे स्वामिन् प्राणनाथ अद्य दिने मत्स्यमांसं मानितं वर्तते तन्मांसं चुल्ल्यां भां-
डे मुक्तं भवति तन्मांसं भवद्भिः पाचनीयं अहं गृहकार्यं करोमि ततस्तद्वचनं श्रुत्वा अंधो हर्षितः तं पाचयति
बो ततो तस्य सर्वस्य बाष्पेन चक्षुर्दोषः शनैः शनैर्गतः ततः स अंधो ति चायं बाष्पं गृह्णामीति तावद्दोषरहिता-

चक्षुर्भ्यां पश्यति स्म तदा मृतकृष्णसर्पो दृष्टः तदा क्रोधेन ज्वलितश्चिंतितं च एतद्दुश्चरित्रं कुब्जकस्य न विष्यति एवं।
विचिंत्य तूष्णीं यावत्स्थितः तावत्कुब्जको गृहं प्रविष्टः ततः कुब्जकेनागत्य त्रिस्तनी चुंबिता लिंगिता च अंधस्तयावि
धे कुब्जकं दृष्ट्वा प्रकुपितः कुपितेनांधेन कुब्जकात्रापि शस्त्रेन दृष्टं तदा कुब्जः पादाभ्यां गृहीत्वा त्रिस्तन्यास्तनोपरि नि।
क्षिप्तः तेन प्रहारेण तृतीयस्तनो गतः कुब्जको पि ऋजुकायो जातः अतोहं ब्रवीमि अंधकः कुब्जकश्चेति॥ सुवर्ण
सिद्धिः कथयति सत्यं प्र दैवे च सन्मुखीते सर्वकार्याणि सिध्यति विमुखे च विनाशो हि नात्र कार्या विचारणा ७५
अतः पुरुषेण सत्पुरुषस्य सन्मित्रस्य वचनं स्वीकार्यं यः सज्जनवचनं नांगीकरोति स विनाशं गच्छति तदुक्तं भवति
एकोदरः पृथक्ग्रीवा तथान्याहारकर्मणा असंमत्या पुरा नष्टो पक्षी भारंडको यथा ७६ चक्रधरः पृच्छति सुवर्ण
सिद्धिः कथयति कुत्रचित्समुद्रोपकंठे भेरुंड नामा पक्षी निवसति एकमुदरं मुखद्वे तस्य तस्य तन मध्ये एकस्य वद
नस्य समुद्रोपकंठादेकं फलं दैवेन दत्तं तन्मध्ये द्वितीयेन मुखेन विभागः प्रार्थितः तेन न दत्तः तद्वदनं कुपितं क्रो
धेन ज्वलितं च पश्चात्तेन मुखेन लक्षितं वर्णितं च मयानेकानि फलान्यास्वादितानि परमेतस्य फलस्यास्वादो कुत्रा न्याति
पि न दृष्टः कल्पवृक्षपारिजातसंभवं न विष्यति एवं मया मन्यते तदा द्वितीयं मुखं कथयति उदरं तु एकं मे वास्ति
तावत द्वितीयं भवति एवं यदा तदा संतोषः कार्यः दुःखं मा गा तच्छ्रुत्वा द्वितीयं मुखं दुःखं प्राप्य पश्चात्प्रथमवद ८२
नेन तस्य फलस्यार्द्धं भेरुंड्याः करे समर्पितं तया स्वादितं तेन कृत्वा सा प्रथममुखं स्नेहयति तद्दिनमारभ्य द्वितीये
न मुखेन क्रोधाक्रांतेन चिंतितं किं कार्यं मया एवं क्रियंतो दिवसा निर्गमिताः एकस्य द्वितीयस्य मुखस्यापि वि
षफलं प्राप्तं तेन कथितं रे प्रथममुख त्वया हं वंचितः अतो तेन दुःखेनाहं विषफलेन ज्ञायिष्यामि प्रथममुखे
न उक्तं रे द्वितीयमुख क्षम्यतां मम अपराधः एनं विषफलं मा भक्षय स्वद्दिनमारभ्यावयोर्यत् किंचिद्वस्तु मिलि

ष्यति तद्विभागेन भक्षणीयं परं त्वया मा कार्या द्वितीयेन मुखेन रुषा प्रथममुखस्यावगणनां कृत्वा विषफलं भक्षि
तं पश्चाद्देकोदरे द्वावपि मृत्युं गतौ अतोहं ब्रवीमि एकोदरः पृथक्ग्रीवेति॥ चक्रधरोवाच सत्यमेतत् त्वं स्वा
लयं गच्छ परमेकाकिना न गंतव्यं एकः स्वादु न भुंजीत एकोर्थान्नैव चिंतयेत् एको न गच्छेदध्वानं नैकः सुप्तेषु जा
गृयात् अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः कर्कटेन द्वितीयेन जीवितं परिरक्षितं ७७ सुवर्णसिद्धिराह
कथमेतत् चक्रधरः कथयति एकस्मिन्नगरे यज्ञदत्तो नामा ब्राह्मणः प्रतिवसति स्म स चैकदा कार्यवशात् अन्य
न्यनगरं प्रति प्रस्थितः तदा तस्य माता वदति रे पुत्र कोपि द्वितीयः पुरुषः सहायी वर्त्तते किं तेनोक्तं मातः को
प्यन्यो नास्ति अयं पंथा निर्भयोस्ति त्वया चिंता न कार्या स्वल्पैर्दिनैरागमिष्यामि पश्चात्तस्य मात्रा गृहाग्रे कर्क
टा बहवः संति तेषां मध्ये एकं कर्कटं स्वकरे नीत्वा पुत्रदत्तस्तदत्तः ततः समादर्व वैचारी कृत्य कर्कटं कर्पूर
सिंधूकायां स्थाप्य तं गृहीत्वा प्रचलितः एवं कुर्वाणः सन् ग्रीष्मकाले सूर्यकिरणैः संतापितः सन् छायावृक्ष
स्याधः सुप्तः एवं स्थिते वृक्षकोटरमध्यादेकः कृष्णसर्पो निःसृत्य तस्य पथिकस्य सामीप्यमागमत् स सर्पः कर्पूर
गंधेन वंचितः सन् मात्रा यात्रा प्रक्षिप्त साक्पूर सिंधुका गलिता तेन कर्कटेन सर्पस्योदरं विदार्य बहिर्निसृतं।
तस्य व्यथया सर्पः पंचत्वं गतः यावत् सर्पो मृतः तावद्ब्राह्मणो प्रबोधितः सन् यदा पश्यति तदा कृष्णसर्पो दृष्टः
ततस्तेन यज्ञदत्तेन चिंतितं मातृवचनं सफलं जातं द्वितीयो जनः मार्गे सुखदायी अतोहं ब्रवीमि अपि का॥
पुरुषो मार्गे इति॥ पश्चात् सुवर्णसिद्धिः प्रतिचक्रधरः कथयति यदा तव वचनमंगीकृतं भवति तदा एवं कथं न
भवेत् अपि च गतेबहुतरे काले स्वल्पं तदनुवर्त्तते चेतः महानागराज्ञां च मनोहारिणी ७८ यथा स राजपुत्रो
राजकन्या महानागा यथा पुरा गते बहुतरे काले चेतनामा पुरुषत्वमे ७९ तथाहं चेतनाः पूर्वं मया कृता न भवति
तर्हि अहं ईदृशी अवस्थां कथं गमिष्यामि सुवर्णसिद्धिः पृच्छति चक्रधरः कथयति कश्चिद्देशो विदर्भनाम्नी।

नगरी तत्र वसुनामा राजा राज्यं करोति तस्य सुमावसेन नाम पुत्रः परं च मदमोगा नाम्नी कन्यास्ति तस्य विरोचनो ना
मा मंत्री तस्यैकोपुत्रः सुंदरो नामा महामूर्खः अविवेकी वर्त्तते तथा राज्ञः गृहे एका महानाम्नी पात्रं वर्त्तते एवं
कियंतैर्दिवसैः राजपुत्रो राज्ययोग्यो बभूव परं तस्य पुत्रस्य राज्याभिषेकं न करोति राजा स पुत्रो चिंतातुरो भूत्
एनं राजानं अहं व्यापादयामि तदा राज्यं मम हस्तंगतं भविष्यति एवं विचिंत्य ब्राह्मणं पृच्छ राजपुत्रः तेन ब्राह्म
णेन मुहूर्त्तं न दत्तं माघे मासि शुक्लपक्षे षष्ठ्यां भृगुवारे संयुता सा तिथिः सर्वता वापि ग्राह्या स्वकार्यसिद्ध्ये अतः
ततो राजपुत्रेण चिंतितं मत्पिता वसंतोत्सवे नृत्यविलोकनाय तिष्ठति तस्मिन्समये एनं शस्त्रघातं करोमि [illegible] तदा
राज्ञः राज्यं मम भविष्यति पश्चात्तेन राज्ञा स्वमंत्रिणा कार्यं कथितं रे मंत्री अतः परं पुत्राय राज्यं दत्त्वा सिंहासना
रोपणं मया पुत्रस्य कार्यं स राजा ब्राह्मणं पृच्छः रे ब्राह्मण राजपुत्रस्याभिषेकार्थं मुहूर्त्तं विलोकनीयं तेन ब्राह्मणेन
मनसि विचार्य राजानं प्रति तन्मुहूर्त्तं दत्तं ततो राजकन्या यौवनोद्धामा जाता तस्याः विवाहचिंता [illegible] किं
तः कुरूपाः नीचाः कियंतो धनरहिताः कियंतो मूर्खाः अतो वरं विलोकयति ततोनंतरं सा राजकन्या एकं शस्त्र
पाणिनं सुंदरं विचक्षणं मीदृशं दृष्ट्वा तं मा कार्यं कथयति स्म यत्त्वं मां गृहीत्वा परदेशं प्रति यास्यसि नहि [illegible] अहम
पि बहुततरं गृहीत्वा तव संगेनागमिष्यामि एवं श्रुत्वा तेनोक्तं भवतु तव इच्छास्ति अहमागमिष्यामि ततो [illegible]
राजपुत्र्या स एव ब्राह्मणः पृष्टः तेन द्विजन्मना तदेव मुहूर्त्तं दत्तं ततोनंतरं राज्ञा राजपत्नी पृष्टा रे पत्नि कन्या नवा
यौवनवती जाता अतो वरयोग्या वर्त्तते एतस्याः सुंदरस्वामिनः सकलसंपन्नगुणस्तस्यान्वेषणं करिष्यामि [illegible]
श्चाद्राजपत्न्या प्रोवाच भो राजन् एको राजपुत्रः सकलगुणसंपन्नो वर्त्तते तस्य देया एवं चिंतयित्वा ताभ्यां [illegible] द्वि
जः पृष्टः तेन विचार्य तदेव मुहूर्त्तं दत्तं राज्ञे ततो सा महानागनाम्नी पात्रं नित्यमेव नृत्यं करोति परं राजानं प्रणय
ति तया विश्वसिद्धियोगं विचार्य नृत्यं प्रारब्धं ततो राज्ञा मनसि चिंतितं यदेतस्या वारांगनया नेकधा सेवितो हं

द्विजेन

परं मया सर्वपेचाग (?) प्रसादो [illegible] स्येन दत्तः अतोयं सिद्धियोगो महान् वत्सरो मया प्राप्तः अतो देयमस्याः दानं एवं वि
चिंत्य मूल्यानि वस्त्राणि स्वर्णमया हाराः एवं विधं बहुततरं दानं सुमुहूर्त्ते उचितं कृतं स्थापितं च तदेव मु
हूर्त्ते सर्वेषामागतं तस्मिन्नेव मुहूर्त्ते तया वारांगनया नृत्यं प्रारब्धं ते सर्वे नृत्यविलोकनायागताः संति
सा वारांगना नृत्यं कुर्वतीसती निद्रया ताल-- तस्या गंधर्वेण संगीतभेदेन ज्ञातं यदीयं ताल ते न गंधर्व
ण रागं कृत्वा एकः श्लोकः पठितः गतं बहुततरं कालमिति॥ तच्छ्लोकं श्रुत्वा सर्वैश्चिंतितं मन्योन्यं अस्मा
कं कथितं राजपुत्रेण स्वर्णमयो हारो दत्तः नव्यानि वस्त्राणि दत्तानि राजपुत्र्या कुसुमहारो दत्तः शा
स्त्रपाणिना कंकणं दत्तं एतैः सर्वैः दानं दत्तं तद्दृष्ट्वा राजा कुपितः रे मदैः मामग्रे प्रथमं दानं कथं दत्तं तान्सर्वा
ना कार्यं राजा पृच्छति स्म ततः सर्वैः स्ववृत्तांतं कथितं राज्ञो ग्रे अस्मानिरेतदुपायः पूर्वं कृतो न भवति अस्माभि
यं वृत्तांतमनेन गंधर्वेण विज्ञप्तं सर्वेभ्यः अतोस्माभिः प्रथमं दानं दत्तं तत्र प्रधानपुत्रः क्षुरिकया शि
खाः विच्छेद स प्रधानः हर्षयुक्तः सन् नृत्यं अकुर्वत् तं प्रधानपुत्रं राजा पृच्छति स्म रे पापिष्ठ त्वया स्वपितुः
शिखा केन कार्येण छेदिता स आह राजन् न वज्निरेतस्य पुत्रस्यानेकं धर्मशास्त्र [illegible] कला अध्यापिता
अयं शस्त्रपाणिरपि स्वपित्रा विचक्षणः कृतः एते गंधर्वशब्दं श्रुत्वा चेतनां प्राप्ताः परं मत्पित्रा हे मूर्खेति रक्षितः
अतः किंचिदपि मया न ज्ञातं अतो मया पितुः शिखा छेदिता पश्चाद्राजा प्रधानं पृच्छति स्म रे मंत्रि केन कार
णेन त्वया सहर्षेण नृत्यं कृतं प्रधानः प्राह राजन् शृणु अद्य मया पुनर्जिवितं अतोहं सहर्षो जातः राज्ञोक्तं
ईदृशं किं कष्टं न भवतो प्रधान कथयति राजन् येन शिखा छेदिता तेन शिरोपि कथं न छेद्यते राजोवाच सत्य
मेतत् मूर्खेण किं क्रियते ततोनंतरं राजा राजपुत्राय राज्यं दत्तं राजकन्या तेन शस्त्रपाणिना सह विवाहिता

तस्यैवारोगतायै: अनेकदानानि दत्तानि अवसरे तैः सर्वैर्मिलित्वा कार्यं कृतं तर्हि सर्वेषामेव कष्टं जातं अतोहं
ब्रवीमि इत्थं विचार्य मयापि कार्यं कृतं तर्हि कष्टान्निःसृत्याहं सुखी स्यात् ततोनंतरं सुवर्णसिद्धिश्चक्रधर
स्याज्ञां गृहीत्वा स्वस्थानं गतः गत्वा सुखी बभूव: ततोनंतरं एकदा श्रीमहादेवः सपत्नी कथयति: संसारे मनु
नां भावविलोकनाय आकाशमार्गेण गच्छन् सन् चक्रधरं ददर्श पार्वति तं दृष्ट्वा अत्यंतं आश्चर्यं प्राप शिवं प्रति
कथयति भो स्वामिन् प्राणेश एतस्य पुरुषस्य शिरसि चक्रं केन कारणेन भ्रमति शिवः कथयति अस्या त्यंतं लो
भोस्ति तदा पार्वत्युवाच भो मृत्युंजय अस्यापि तस्यानुग्रहः कार्यः भवतां दर्शनं निष्फलं न भवति एवं महा
ऋषयः कथयंति तदुक्तं अमोघा मधुरा वाणी अमोघा देवदर्शनं अमोघा वासरे विद्युत् अमोघा निशग
र्जितं ॥५४॥ तेन भो स्वामिन् तस्योपरि कृपां कृत्वा श्रीदयालुः स्वं विना शितव्यं च। शिवेन तस्य मस्तकाच्चक्रं भिन्नं
कृतं तस्य अणिमादि अष्टसिद्धिं दत्वा गृहं मार्गो दर्शितः सोपि शिवाज्ञां गृहीत्वा स्वगृहं प्रति प्रस्थितः शिवस्तु
तिं कृतवान् आत्मनां उन्नतमाः समर्थाः मनोरथान् पूरयितुं न नीचाः धराधरा एव धराधराणां निदाघदाघः
प्रशमंति नद्यः ॥५५॥ इत्थं स्तुतिं कृत्वा शिवं कथयति स्वामिन् श्रीमज्जिरहं कृतार्थः कृतः भवद्दर्शनेनाहं सुखी॥ ८३
बभूव ॥ दारिद्र्यितोहं अहं धनाढ्यो जातः मद्दत्तां दर्शनं कस्योन्नतिकारकं न भवति अपि सर्वेषां भवति इत्थं
भणित्वा स्वगेहं गत्वा कुटुंबपरिवारं मिलित्वा सुखी बभूव॥ ॥इति श्रीमत्पंडितविष्णुशर्मा विरचिते नीति
शास्त्रे पंचोपाख्याननाम्नि ग्रंथे अपरीक्षितकारकं नाम पंचमं तंत्रं समाप्तिप्रकाणं॥५॥ इत्थं अथेनिसह विष्णु
शर्मणा राजपुत्राणां पंचतंत्रं अध्यापितं तदनंतरं राजपुत्राः राजनितौ व्युत्पन्नाः संजाताः राज्ञापि विष्णुशर्मणे पंचा
ग्रामादो दत्तः स्फारेश्चापि वस्त्रं दत्वा प्रसन्नः कृतः ततोनंतरं पुस्तकं लिखित्वा सर्वत्र प्रयुक्तं राजापि सुखी बभूव।

यत्रैतत्पठ्यते नित्यं नीतिशास्त्रं शृणोति यः सः सर्वत्र विद्वान् भवति॥ इति श्री पंचोपाख्यान समाप्तं
॥संवत् १८७५ नावर्षे ज्येष्ठमासे शुक्लपक्षे सप्तमि तिथौ गुरुवासरे भद्रावचनगरे पं। दयाल विजयेन लखि
तं पं। रवांति विजयेन पठनार्थं॥ ॥शुभं भवतु॥ कल्याणमस्तु॥ ॥श्री॥ ॥श्री॥ ॥छ
॥श्री॥। ॥श्री॥। ॥ह्रीं॥। ॥ऐं नमः॥। १

प३८४

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

[illegible]